# MASTERS OF ARTS
# IN
# SANSKRIT

## DIFFERENT SCHOOLS OF KAVYASHASTRA

**Paper-16**

NAAC ACCREDITED A+

**UTKAL UNIVERSITY**

**VANI VIHAR, BHUBANESWAR, ODISHA-751004**

**Name of the Study Material:** Systems Language & Literature

**Author Name:** ...................................................................

Edition: 2019

Copyright © Laxmi Publications Pvt Ltd.

No part of this publication which is material protected by this copyright notice may be reproduced or transmitted or utilized or stored in any form or by any means now known or hereinafter invented, electronic, digital or mechanical, including photocopying, scanning, recording or by any information storage or retrieval system, without prior permission from the publisher.

Information contained in this book has been published by Laxmi Publications Pvt Ltd and has been obtained by its authors from sources believed to be reliable and are correct to the best of their knowledge. However, the publisher and its author shall in no event be liable for any errors, omissions or damages arising out of use of this information and specially disclaim and implied warranties or merchantability or fitness for any particular use.

**Printed and Published by:**
**Laxmi Publications Pvt Ltd.**
113, Golden House
Daryaganj, New Delhi-110 002.
Tel: 011-43532500, E-mail: info@laxmipublications.com

**For:**
**Directorate of Distance & Continuing Education**
Utkal University, Vaniihar, Bhunabeswar-7, Odisha
Email: helpline@ddceutkal.ac.in
Website: www.ddceutkal.ac.in

Book Code - C–
Typeset at: Friends Enterprises, Delhi Printed at:

**DIRECTORATE OF DISTANCE & CONTINUING EDUCATION**
**UTKAL UNIVERSITY : VANI VIHAR**
**BHUBANESWAR-751007**

# From the Director's Desk

The Directorate of Distance & Continuing Education, originally established as the University Evening College way back in 1962 has travelled a long way in the last 52 years. 'EDUCATION FOR ALL' is our motto. Increasingly the Open and Distance Learning institutions are aspiring to provide education for anyone, anytime and anywhere. DDCE, Utkal University has been constantly striving to rise up to the challenges of Open Distance Learning system. Nearly one lakh students have passed through the portals of this great temple of learning. We may not have numerous great tales of outstanding academic achievements but we have great tales of success in life, of recovering lost opportunities, tremendous satisfaction in life, turning points in career and those who feel that without us they would not be where they are today. There are also flashes when our students figure in best ten in their honours subjects. Our students must be free from despair and negative attitude. They must be enthusiastic, full of energy and confident of their future. To meet the needs of quality enhancement and to address the quality concerns of our stake holders over the years, we are switching over to self instructional material printed courseware. We are sure that students would go beyond the course ware provided by us. We are aware that most of you are working and have also family responsibility. Please remember that only a busy person has time for everything and a lazy person has none. We are sure, that you will be able to chalk out a well planned programme to study the courseware. By choosing to pursue a course in distance mode, you have made a commitment for self improvement and acquiring higher educational qualification. You should rise up to your commitment. Every student must go beyond the standard books and self instructional course material. You should read number of books and use ICT learning resources like the internet, television and radio programmes etc. As only limited number of classes will be held, a student should come to the personal contact programme well prepared. The PCP should be used for clarification of doubt and counselling. This can only happen if you read the course material before PCP. You can always mail your feedback on the course ware to us. It is very important that one should discuss the contents of the course materials with other fellow learners.

We wish you happy reading.

**DIRECTOR**

# Paper-16. Different Schools of Kavyashastra

| | |
|---|---|
| Unit-I | Origin of Kavya-shastra, Alankara and Riti |
| Unit-II | Dhvani and its opponents |
| Unit-III | Rasa, Vakrokti and Auchitya |
| Unit-IV&V | One Essay relating to the Core Elective Unit.-30 |
| | One Expansion of Idea relating to the Core Elective group B - 10 |

**Books Recommended:**

1. History of Poetics, P.V. Kane, Motilal Banarsidass, New Delhi
2. History of Poetics, S.K. Dey, Firma K.L. Mukhopadhyaya, Calcutta
3. Bharatiya Kavyashastra ki Parampara, Nagendra, Nasanala Publishing House, 1964

# अध्याय : १

# काव्य शास्त्र की उत्पत्ति

## १.१ प्रस्तावना

प्रस्तावना

प्रथम पाठे काव्यप्रकाशे वर्तमानो मंगलश्लोक: काव्यप्रयोजनं च विचारितं भवद्भिरधीतं च। तत्र प्रतिपादितं यत् कविनिर्मित: कथं नियतिनियमेन रहिता, आनंदमात्रस्वभावा कवेस्तत्प्रतिभाया एवाधीना, नवरसा, रमणीया च भवति। एवं यश:, अर्थ:, धनम्, अमंगलविनाश:, लोकोत्तरो रसास्वादनजन्य आनन्द:, कान्तासम्मित उपदेशश्चेति काव्यस्य षट् प्रयोजनानि प्रतिपादितानि, आनन्दस्यैव मुख्यं प्रयोजनत्वं निरूपितं च। अनेन सह 'लोकोत्तरवर्णननिपुणकविकर्म काव्यम्' इति काव्यपदस्य निर्वचनमपि कृतम्। तस्य काव्यस्य कारणं निष्कृष्टं लक्षणं च किमिति जिज्ञासाया: शमनाय द्वितीये पाठेऽस्मिन् मम्मटानुसारेण काव्यस्य कारणं प्रयोजनं च निरूप्यते।

काव्यस्य कारणम्

लोकोत्तरवर्णनायां निपुणस्य कवेर्यल्लोकोत्तरवर्णनारूपं कर्म काव्यमभिहितम्, तस्य कारणं किं वर्तते कथं कश्चित् तस्यां लोकोत्तरवर्णनायां निपुणत्वम् अधिगच्छति वेति जिज्ञासां शमयितुं मम्मट: काव्यकारणस्य प्रतिपादिकाया: कारिकाया अवतरणिमदं लिखति -''एवम् अस्य प्रयोजनम् उक्त्वा कारणम् आह'' इति। ''एवम्='काव्यं यशसेऽर्थकृते' इत्यादिरूपया कारिकाया 'कालिदासादीनामिव यश:'। इत्यादिरूपया वृत्त्या च, अस्य = लोकोत्तरवर्णनानिपुणकविकर्मरूपस्य काव्यस्य, प्रयोजनम् = यश: प्रभृति फलम्, उक्त्वा = निरूप्य, कारणम् = हेतुम्, आह = मम्मट: कथयति निरूपति, इत्यवतरणवाक्यस्यार्थो विद्यते। काव्यकारणस्य प्रतिपादिका मम्मटस्य कारिकैवं विद्यते-

शक्तिर्निपुणता लोकशास्त्रकाव्याद्यवेक्षणात्।

काव्यज्ञशिक्षयाभ्यास इति हेतुस्तदुद्भवे।।इति।

अस्या: कारिकाया अन्वयो भवद्भिरेवं द्रष्टव्य: - शक्ति:, लोकशास्त्रकाव्याद्यवेक्षणात् निपुणता, काव्यज्ञशिक्षया अभ्यास: - इति तदुद्भवे हेतु: (वर्तते)। शक्ति:, निपुणताऽभ्यासश्च समुदितरूपेण काव्यस्य हेतुर्भवति - इति कारिकाया मूलभूतोऽर्थो वर्तते। अस्या: कारिकाया अर्थो मम्मटेन विस्तेरण वृत्त्या स्वयं निरूपित:। स कथमिति

भवद्भिरेवं ज्ञातव्यम् -

शक्तिः - कारिकायां शक्तिशब्दः प्रयुक्तः। शक्लृधातोः करणे क्तिन्प्रत्यये शक्तिशब्दो निष्पद्यते। अयं योगरूढः शब्दः। शक्नोति काव्यं कर्तुं भावयितुं चानयेति व्युत्पत्तिलभ्योऽर्थो वर्तते। अस्य रूढः कोऽर्थ इति जिज्ञासायां शक्तिपदार्थं विवृण्वन् मम्मटेन वृत्तौ 'शक्तिः कवित्वबीजभूतः संस्कारविशेषः' इत्युक्तम्। संस्कारविशेषः शक्तिरुच्यते। संस्कारशब्दस्यार्थो भावनाख्या वासना भवति। सा देवताराधनादिजन्या भवति। देवताराधनादिजन्यत्वं संस्कारे विशेषो वर्तते। अथवा तस्मिन् संस्कारे काव्यक-रणक्षमत्वं विशेषो वर्तते। अथवा नवनवविषयाकारेण तस्य संस्कारस्य परिणामो विशेषो वर्तते। एवं संस्कारविशेषशब्दस्यार्थोऽत्र प्रतिभा मन्यते। समाहिते मनसि काव्यघटनानु-कूलानाम् अक्लिष्टानां पदानां वाक्यानां पदार्थानां वाक्यार्थानां च स्फुरणं प्रतिभा निगद्यते। प्रतिभायाः स्वरूपं काव्यकौतुके प्रतिपादितम्- स्मृतिर्व्यतीतविषया मतिरागामिगोचरा।

बुद्धिस्तात्कालिकी प्रोक्ता प्रज्ञा त्रैकालिकी मता।।

प्रज्ञा नवनवोन्मेषशालिनी प्रतिभा मता।।इति

एवं रुद्रटेनापि निगदितम्-

मनसि सुसमाधिनि विस्फुरणमनेकधाऽभिधेयस्य।

अक्लिष्टानि पदानि च विभान्ति यस्यामसौ प्रतिभा।।इति।

एवमेव पंडितराजजगन्नाथेन 'काव्यघटनानुकूलशब्दार्थोपस्थितिः प्रतिभा' इति प्रतिभाया लक्षणं कृतम्। एवं संस्कारविशेषशब्देन प्रतिभा विवक्षितेति बहूनां टीकाकारणां मतं वर्तते। एषा प्रतिभा कारिकायां शक्तिपदेन कथिता। कश्चित् कविरनया काव्यं कर्तुं शक्नोति कश्चन सहृदयोऽनया काव्यं भावयितुं शक्नोति चेति प्रतिभा शक्तिपदेन कथ्यते। तत्र कविगता प्रतिभा काव्यस्य जनिका भवति, सहृदयगता तु सा काव्यार्थभ्-ावनायाः कारणम् = भावयित्री भवति। प्रतिभाविषये गोकुलनाथः काव्यप्रकाशविवरण एवं वदति - 'साच प्रतिभा पदगोचनाऽर्थगोचरेति द्विविधा। द्विविधापि कवेरपेक्षिता। पदस्य वाक्यस्य च तदर्थयोः प्रतिसंधानद्वारा संदर्भरचनायामुपयुज्यते। इयं जनिका शक्तिरित्युच्यते। सहृदयस्य तु काव्यैकदेशीभूतस्यार्थस्योद्भवाय तद्गोचरा केवलम-पेक्ष्यते। सैवासाधारणीकृतविभवादि स्मार यित्वा तदुपवृंहितं स्थायिभावम् उल्लासयति। सा चोल्लास किा शक्ति रिति व्यवह्रियते।'' इति। एवं शक्तिपदवाच्या प्रतिभा द्विधा भवति - जनिका = कारयित्री, उल्लासिका = भावयित्री च। एते क्रमेण कवौ सहृदये च भवतः। केषांचन मते सारस्वतेच्छा प्रतिभा मन्यते। तादृशीच्छा सर्वं प्रति साधारणं कारणं भवतीति काव्यस्यैव कारणस्य प्रसंगे तस्याः शक्तिपदेन ग्रहणं समीचीनं न वर्तते।

अतोऽत्र शक्तिपदेन संस्कारविशेषपदेन च नवनवोन्मेषशालिनी प्रज्ञा ग्रहणीया भवति। एषा कथितसंस्कारविशेषरूपा शक्ति: कवित्वस्य = लोकोत्तरवर्णनानिपुणत्वस्य बीजं वर्तते। बीजं यथा वृक्षस्य प्रधानम् उपादानं कारणं वा भवति तथा शक्ति: काव्यवृक्षस्य मुख्यं कारणं वर्तते। अथवा कवित्वे = कविपदप्रवृत्तिनिमित्ते बीजभूत: = प्रधानं कारणं संस्कारविशेष: = शक्तिरेव भवति। शक्तिं विना कश्चिदपि कविपदेन वक्तुं न शक्यते। शक्तिरेव कविपदबोध्ये पुरुषे लोकोत्तरवर्णनायां निपुणत्वरूपस्य कवित्वस्य जनकं भवति। एवं सहृदये सहृदयताया बीजं संस्कारविशेषरूपा उल्लासिका शक्तिरेव वर्तते। तद्वशेनैव कश्चन वर्णनीयकाव्यार्थे तन्मयीभूय रसमनुभवति संख्यावदर्थकेन कविपदेन सोऽभिधीयते च 'अयं कवि: = पंडित:' इति।

शक्तेरभावे काव्यस्याप्यभावं सहृदयतायाश्चाप्यभावं मम्मट एवं दर्शयति - 'यां विना काव्यं न प्रसरेत् प्रसृतं वोपहसनीयं स्यात्' इति। अस्यायमर्थो वर्तते - याम् = जनिकां शक्तिं प्रतिभां वा विना काव्यम् = लोकोत्तरा वर्णना न प्रसरेत् = प्रकर्षेण उदियात् नोत्पद्येत, प्रतिभाया अभावे योजितयोर्यत्किन्चिच्छब्दर्थयो: प्रकर्षाभावेन काव्यत्वं न सिद्धयति, प्रसृतं वा = कालिदासबाणभट्टादिभ्य: उत्पन्नमपि वा काव्यं मेघदूतकादम्बरीप्रभृति उल्लासिकां शक्तिं विनोपहसनीयं स्यात्। उल्लासशक्त्या रहितै: श्रोत्रियजरन्मीमांसकादिभिरुपहस्यत एव काव्यम्। उक्तं गोकुलनाथेन काव्यप्रकाशस्य विवरणे - 'प्रतिभाव्यतिरेके शब्दतदर्थप्रतिसंधानं विना प्रवचनमनुपपन्नमिति भाव:। उल्लासशक्ते: काव्यार्थपरामर्शे व्यतिरे कमाह - प्रसृतंवेति। बाणादिशक्त्या प्रसृतं कादम्बर्यादिकाव्यं विभावा दिपरामर्शरहितै: मीमांसका दिभिरुपहसनीयं स्यात्।..... प्रसृतंवेत्यत्रवाकारोऽप्यर्थ:। तेन काव्यप्रसणाभावप्रयोज्यत्वम्उपहसनीयत्वेबोध्यमानं प्रतिभाव्यतिरेकप्रयोज्यत्वं प्रकटयति।'' इति। अथवोक्तवृत्तरेयमप्यर्थो भवितुमर्हति - शक्तिं विना काव्यस्य प्रसारस्य = उत्पत्ते: संभावना नास्ति, यदि कथंचित् काव्यम् = वर्णनासामान्यं प्रसृतं भवति तदा तद् उपहसनीयं वा = एव भवति, न तु तद् वर्णना-सामान्यं काव्यं भवति। उक्तवृत्तौ प्रयुक्तं काव्यपदं वर्णनासामान्यस्य बोधकं वर्तत इति मधुमतीटीकायामृ एवं कथितम् - ''यां विनेति। काव्यपदं वर्णनासामान्यपरम्। न प्रसरेत्। प्रायेणेति शेष:। प्रसृतं वेति। अत्राऽव्ययानाम् अनेकार्थत्वात् 'वा' शब्द एवकारार्थो भिन्नक्रमश्च। तेन तया विना यत् प्रसृतं तद् उपहसनीयमेव स्यात्-काव्यमेव न भवतीत्यर्थ:।'' इति। एवं वृत्तौ प्रयुक्तस्य 'वा' इति पदस्य अप्यर्थ एवार्थश्च मन्यते। इत्थं कारिकायां वृत्तौ च प्रयुक्तस्य शक्तिपदस्य कविसहृदयगता द्विधा प्रतिभाऽर्थ इति विवरणकारस्य, काव्यकारणप्रसंगे प्रयुक्तेन शक्तिपदेन कविगतैव प्रतिभाऽर्थत्वेन मन्तव्येति टीकाकारणामन्येषां मतम्। उभयमपि व्याख्यानं युक्तिसमन्वितत्वेन समीचीनमेव वर्तते। एतदग्रे भवद्भिर्विशेषतो ज्ञास्यते। निपुणता - अस्य शब्दस्यार्थो वर्तते व्युत्पत्ति:।

व्युत्पत्तिशब्दस्यार्थो वर्तते लोकस्वभावादीनां ज्ञानेन जन्यो दृढतर: संस्कार:, केषांचन मते तु सकलपदार्थपर्यालोचनकौशलं व्युत्पत्तिरभिधीयते। किंतु प्रथम एव पक्ष: समीचीनो भाति। शक्तिर्हि पूर्वं संस्कारविशेष उक्त:। तथा निपुणताऽपि संस्कारत्वेनैव स्वीकार्य:। सकलपदार्थपर्यालोचनकौशलं तस्य तादृशदृढतरसंस्कारस्य फलं विद्यते। निपुणताविषये कारिकायाम् ''निपुणता लोकशास्त्रकाव्याद्यवेक्षणात्' इत्यभिहितम्। लोकाश्च शास्त्राणि च काव्यानि चादीनि येषां तेषां लोकशास्त्रकाव्यादीनाम् अवेक्षणाद् सम्यग्ज्ञानाद् जायमाना निपुणता काव्यस्य हेतुरिति कारिकास्थपदस्यार्थो भवति। अत्र लोकशब्दो लोकवृत्तस्य लोकव्यवहारस्य = लोकाचारस्य लोकस्वभावस्य वा बोधको वर्तते। आदिशब्देन इतिहासादीनां ग्रहणं भवति। 'निपुणता लोकशास्त्रकाव्याद्यवेक्षणात्' इति कारिकाग्रंथो मम्मटेनैवं वृत्तौ व्याख्यायते - ''लोकस्य = स्थावरजंगमात्मकलोकवृत्तस्य = स्थावरा: पराधीनक्रिया जडा जंगमा: स्वाधीनक्रिया: चेतनाश्च आत्मान: स्वरूपाणि यस्य तस्य लोकस्य यद् वृत्तम् आचरणं स्वभावो वा तस्य, शास्त्राणाम् = छंदोव्याकरणाभिधानकोशकलाचतुर्वर्गगजतुरगखड्गादिलक्षणग्रंथानाम् = छंदश्च, व्याकरणं च, अभिधानानां नाम्नां संग्रहरूपोऽभिधानकोशश्च, चतु:षष्टिसंख्या नृत्यगीतादिरूपा: कलाश्च, चतुर्णां धर्मार्थकाममोक्षाणां वर्ग: चतुर्वर्गश्च, गजश्च तुरगश्च, खड्गश्चादीनि येषां तेषां लक्षणस्य स्वरूपस्य प्रतिपादकानां ग्रंथानाम्, काव्यानाम् = महाकविसंबंधिनाम् = वाल्मीकिकालिदासादिभि: प्रणीतानां रामायण-रघुवंशादीनाम्, आदिग्रहणाद् = कारिकायाम् 'काव्याद्यवेक्षणात्' इत्यत्रादिशब्दस्य प्रयोगात्, इतिहासानां च = धर्माद्युपदेशेन सह पूर्वकथाया अर्थात् पूर्वेतिवृत्तस्य प्रतिपादकानां महाभारतदिग्रंथानाम्, विमर्शनात् = पुन: पुनस्तत्तत्पदपदार्थादि - विचारणात्, व्युत्पत्ति: = दृढतर: संस्कार: भवति, या व्युत्पत्तिर्निपुणता कथ्यत इति भाव:।'' इति। अस्य वृत्तिग्रंथस्याभिप्रायोऽयं वर्तते-लोक्यन्ते दृश्यन्ते ज्ञायन्ते वेति जडा: पर्वतादयश्चेतना मनुष्यादयश्च लोका उच्यन्ते। एषां व्यवहार: स्वभावो ज्ञायन्ते वेति जडा: पर्वतादयश्चेतना मनुष्यादयश्च लोका उच्यन्ते। एषां व्यवहार: स्वभावो वा कारिकास्थेन लोकशब्देन गृह्यते। पद्यकाव्ये मात्रादिवर्णनियमस्य बोधकं पिंगलादिप्रणीतं शास्त्रं छन्द:शास्त्रमुच्यते। प्रकृतिप्रत्ययादिविभागपूर्वकं शुद्धानां शब्दानां स्वरूपस्य बोधकं पाणिन्यादिप्रणीतम् अष्टाध्यायीप्रभृति शास्त्रं व्याकरणं कथ्यते। नामपदानां लिंगवचनार्थादिबोधका अमरसिंहादिभि: प्रणीता अमरकोशादय: कोशग्रंथा: कथ्यन्ते। धर्मस्य प्रतिपादकं मीमांसामनुस्मृत्यादय:, कामस्य प्रतिपादका वात्स्यायनादिरचिता: कामसूत्रादय:, अर्थस्नू बोधकानि शुक्रवृहस्पतिकौटिल्यादिरचितानि नीत्यर्थशास्त्राणि, व्यासकपिलगौतमादिप्रणीतानि षड् वेदांत (ब्रह्मसूत्र) - सांख्यदिदर्शनानि उपनिषदश्चेति चतुर्वर्गस्य लक्षणग्रंथा: सन्ति। एवं गजस्य, अश्वस्यान्येषां च पशूनां लक्षणस्य प्रतिपादकानि शास्त्राणि सन्ति। एवं खड्ग-बाण-धनुरादीनामस्त्राणां शस्त्राणां च निर्माणादे:

प्रक्रियाया लक्षणानां च बोधकानि शास्त्राणि सन्ति। वृत्तौ 'खड्गादि' इत्यत्रादिपदेन धनुरादीनां ग्रहणं भवति। तथैव महाकवीनां विविधानि काव्यानि रामायणादीनि विराजन्ते। कारिकायां 'काव्यादि' इत्यत्रादिपदं प्रयुक्तम्। तेनेतिहासादीनां ग्रहणं भवति। इतिहासस्य लक्षणमेवं वर्तते-

धर्मार्थकाममोक्षाणामुपदेशसमन्वितम्।

पूर्ववृत्तकथायुक्तमितिहासं प्रचक्षते।।इति।

एवं यो ग्रंथो धर्माद्युपदेशे नातीतं वृत्तातं बोधयति स महाभारतादिग्रंथ इतिहास उच्यते। एवमर्थो भवति यद् यः कविर्भवितुमिच्छति तेन लोकस्वभावस्य शास्त्राणां महाकाव्यानाम् इतिहासानां चैषां पुनः पुनरवलोकनम् अनुसंधानं च कर्तव्यं येन लोकस्वभावादिविषयो दृढतरः संस्कारो भवेत्। अयमेव व्युत्पत्तिर्निपुणता च कथ्यते। एनां निपुणतां विना प्रतिभायां सत्यामपि कश्चन लोकाचारस्य सम्यग् वर्णनं कर्तुं न प्रभवति। शास्त्रज्ञानाभावे वर्णनायां विद्याविरुद्धत्वादयो दोषाः समायास्यन्ति। अशास्त्रज्ञः कामस्यास्त्रं चक्रं वर्णयेत्, विष्णोश्च पौष्पं धनुः। अलोकज्ञोऽश्वस्य द्विशफत्वं वर्णयेत्। महाकाव्यानाम् अनुशीलनेन काव्यरचनारीतिः सम्यगवगम्यते। अश्वादयः कथं वर्णनीया इति नैषधादिमहाकाव्यावलोकनेन प्रसिद्धमेव विद्यते। एवं निपुणता यथा कवेरनिवार्या तथा पाठकस्यापि कृते। उल्लासिकया शक्त्या संपन्नोऽपि पाठकस्तावद् रसं नानुभवितुमर्हति यावन्निपुणता न भवति। अतएव काव्यप्रकाशेऽभिनवगुप्तसम्मतरसस्वरूपस्य प्रतिपादने यत् स एव रसमनुभवति यो लोके प्रमदादिभिः स्थायिनोऽनुमाने पटुर्भवति-'लोकेप्रमदादिभिः स्थाय्यनुमानेऽभ्यासपादववताम्' इति। एवं निष्कर्षो वर्तते यल्लोकवृत्तादिविषयको लोकवृत्तादीनां पुनः पुनरनुसंधानेन जन्यो व्युत्पत्तिपदवाच्यो दृढतरः संस्कारो निपुणता कथ्यते। अनेन कवो पाठके च पदवाक्ययोः पदार्थवाक्यार्थयोः विभावादीनां वा परामर्शे कौशलमायाति। अभ्यासः = कारिकायाम् अभ्यास - विषये मम्मट एवं लिखति - 'काव्यज्ञशिक्षया अभ्यासः' इति। अभ्यासपदस्यार्थो वृत्तावेवं विषये मम्मद एवं लिखति - 'काव्यज्ञशिक्षया अभ्यासः' इति। अभ्यासपदस्यार्थो वृत्तावेवं प्रतिपादितः - 'करणे योजने च पौनः पुन्येन प्रवृत्तिः' इति। अत्र करणशब्दः कविमपेक्ष्य योजनशब्दस्तु सामाजिकमपेक्ष्य प्रयुक्तः। तेन कवेरपेक्षया काव्यस्वरूपस्य काव्यगतगुणदोषादीनां च विचारेण सह काव्यस्य निर्माणे पुनः पुनः प्रवृत्तिरभ्यास उच्यते। सामाजिकस्यापेक्षया तु काव्यगतरसप्रक्रियाया योजने= ज्ञाने पुनः पुनः प्रवृत्तिरभ्यास उच्यते। कविर्यदा काव्यस्य करणे पुनः पुनः प्रवर्तते तदैव काव्यसंदर्भं जनयति, प्रथमप्रवृत्त्या स काव्याभासमेव जनयति, न तु काव्यम्। एवं यदा सामाजिकः काव्यस्य ज्ञाने पुनः पुनः प्रवर्तते तदैव व्यंग्यार्थं ज्ञातुं प्रभवति। तत्र कविना सामजिकेन च काव्यस्य करणेऽनुसंधाने च काव्यज्ञस्य शिक्षया = उपदेशेन पुनः पुनः प्रवृत्तिरूपोऽभ्यासः करणीयः। यः काव्यं रचयितुं जानाति सोऽपि काव्यज्ञ उच्यते, तथा

च यः काव्यं न रचयति, अपितु काव्यं विचारयितुं भावयितुं च जानाति सोऽपि काव्यज्ञ उच्यते। ततः काव्यज्ञस्य कवेरुपदेशेन काव्यस्य करणे, काव्यविचारज्ञस्य सामाजिकस्य समालोचकस्य वा काव्यस्य ज्ञानेऽभ्यासः कर्तव्यः। 'काव्यशिक्षया' इति कारिकास्थस्य पदस्य विवरणं वृत्तावेवं वर्तते - 'काव्यं कर्तुं विचारयितुं च ये जानन्ति तदुपदेशेन = तेषाम् उपदेशेन' इति। एवं कविना काव्यस्य पुनःपुनःकरणं सामाजिकेन काव्यस्य पुनःपुनरनुसंधानं चाऽभ्यास उच्यते। उक्तं काव्यप्रकाशस्य विवरणे गोकुलनाथेन - 'काव्यज्ञपदं विवृणोति - काव्यमित्यादि। योजयितुं दोषगुणालंकारादिमत्तया बोधयितम्। विचारयितुमिति पाठेऽप्ययमेवार्थः। तदुपदेशेन काव्यस्वरूप-दोषगुणालंकारपरीक्षारूपेण करणे पुनः पुनः प्रवृत्तिः काव्यसंदर्भः जनयति। तेन प्रथमप्रवृत्त्या काव्याभास एव जन्यत इति व्यंज्यते। यत्र प्रथमत एव काव्यं कस्यचिद् बालस्य दृश्यते, तज्जन्मान्तराभ्यासात्। एवं काव्यज्ञोपदेशजनिता असंलक्ष्यक्रमध्वनिप्रक्रियाज्ञाने व्यंग्यार्थप्रत्ययार्थं पुनः पुनः प्रणिधानमुल्लासे जनकम्, न तु प्रथमप्रणिधानेनोल्लास इति। समुदायार्थः' इति। अन्येषां टीकाकारणां मते 'करणे योजने च पौनः पुन्येन प्रवृत्तिः' इति वृत्तिग्रंथस्यार्थोऽन्यथा विधीयते। तेषां मते काव्यस्य करणं पृथक्-पृथग्रूपेण निर्माणम्, तदनु योजनं प्रबंधरूपेण गुम्फनं वर्तते। तेन करण योजनशब्दाभ्याम् अभ्यासस्य विधिरुच्यते -पूर्वं काव्यं पृथक्-पृथक् करणीयम्, ततः प्रबंधरूपेण योजनीयम्' इति। अतोऽत्राभ्यासपदेन कवेरेव काव्यस्य पृथक्-पृथग्रूपेण करणे प्रबंधरूपेण योजने च पुनःपुनःप्रवृत्तिरुच्यते। माणिक्यचन्द्रः संकेते वृत्तिग्रंथमिमं द्विधा व्याख्याति - 'करणे योजने चेति। विशकलितरूपे, प्रबंधदीनां गुम्फरूपे च। यदि वा काव्यं कर्तुं ये जानन्ति तदुपदेशेन करणे निष्पादने, ये च काव्यं विचारयितुं जानन्ति तदुपदेशेन योजने विचारणे चेत्यर्थः।' इति। एवं काव्यज्ञस्य शिक्षया = उपदेशेन काव्यस्य करणे योजने च पुनः पुनः प्रवृत्तिरभ्यास उच्यते।

वस्तुतोऽत्राभ्यासपदेन पुनः पुनः करणेन योजनेन च जन्यः संस्कार एव विवक्षितो वर्तते। अत एवेह जन्मन्यभ्यासम् अकृतवतोऽपि क्वचिद् बालस्यापि जन्मान्तरीयसंस्काररूपेणाभ्यासेन काव्यस्य निर्माणं प्रबंधरूपेण योजनं रसभावनं च विलोक्यते। यथा शक्तिः संस्कारविशेषः, व्युपत्तिपदवाच्या निपुणता च संस्काररूपा तथाऽभ्यासोऽपि संस्काररूप एव बोध्यः। इदं रसगंगाधरस्य रसचन्द्रिकायां काव्यप्रकाशस्य काव्यकारणकारिकाया आनुषंगिके व्याख्याने स्पष्टं वर्तते। एवमत्र शक्तिनिपुणताभ्यासपदार्था विचारिताः। सम्प्रत्येषां समुदितानां काव्यं प्रति कारणता कथमिति ग्रंथदृशा प्रदश्र्यते।

इति हेतुस्तदुद्भवे - 'इति' शब्देन शक्तिः, निपुणता, अभ्यासश्चेति त्रयः समुदिता एव परामृश्यन्ते। उद्भवशब्द उद्भवनम् उद्भव इति व्युत्पत्त्या निर्माणम् = प्रादुर्भावम्, उत्कृष्टं भवनमिति व्युत्पत्त्या समुल्लासं च बोधयति। तेनोद्भवशब्दस्य निर्माणं समल्लासश्चार्थो विवक्षितौ। ततः शक्तिः निपुणता, अभ्यासश्च समुदिताः तस्य कास्योद्भवे

= निर्माणे समुल्लासे च हेतुरित्यक्षरार्थो लभ्यते। कारिकायां हेतुरित्यत्रैकवचनं प्रयुक्तम्। तस्याभिप्रायो वर्तते यत् समुदिताः = मिलिता एव शक्त्यादयः काव्यं जनयन्ति समुल्लासयन्ति च, न तु व्यस्ताः = पृथक्पृथग्रूपेण स्थिताः प्रत्येकम्। क्वचिद् अनेकानि कारणानि सम्मिल्यैकं कार्यं जनयन्ति। यथा दंडः, चक्रम्, मृत्तिका, कुंभकारः, चीवरं चेति सम्मिल्यैव घटरूपं कार्यं दंडादिष्वन्यतमस्याप्यभावे घटरूपस्य कार्यस्य सिद्धिर्न भवितुमर्हति। क्वचित्वनेकानि कारणानि पृथक्पृग्रूपेण परस्परापेक्षां विनैव कार्यं जनयन्ति। यथा वंशनामकं तृणं संघर्षेणानलं जनयति, एवमरणिरप्यनलं जनयति, तथा सूर्यकांतमणिरप्यनलं जनयति। अनलस्य जनने वृंशतृणम् अरणेः सूर्यकान्तमणेर्वाऽपेक्षां न करोति, एवमरणिर्मणिश्चानलस्य जनने स्वभिन्नस्यापेक्षां न कुरुतः। तृणादिषु प्रत्येकम् अन्यस्यापेक्षां विनैवानलस्य जनने समर्थं भवति। एवं पदार्थगतस्य कार्यकारणभावस्य निर्णयो द्विधा भवति - दंडचक्रादिन्यायेन तृणारणिमणिन्यायेन च। तत्र दंडादिदृष्टान्तेन कार्यकारणभावस्य स्थले 'दंड-चक्र-मृत्तिका-चीवर-कुंभकारा घटस्य हेतुः' इत्युच्यते हेतुपद एकवचनं प्रयुज्य समुदितेषु दंडादिषु फलोपधायकत्वं (मिलितत्वेन फलजनकत्वं) सूचयितुं प्रयुज्यते। तृणादिदृष्टान्तेन कार्यकारणभावस्य स्थले तृणारणिमणयोऽनलस्य हेतवः' इति हेतुपदे बहुवचनं प्रयुज्यते तृणादिषु प्रत्येकं व्यस्तरूपेणानलरूपफलोपधायकत्वं सूच्यते च। प्रकृते दंडचक्रादिन्यायेन काव्योद्भवं प्रति समुदितानामेव शक्तिनिपुणताभ्यासानां फलोपधायकत्वं विवक्षितं वर्तते। अत एव इति=शक्तिनिपुणताभ्यासाः समुदिता दंडचक्रदिन्यायेन काव्यस्योद्भवे हेतुः' इति हेतुपद एकवचनस्य प्रयोगेण ध्वनितम्, न तु 'व्यस्ताः तृणारणिमणिन्यायेन हेतवः' इति हेतुपदे बहुवचनं प्रयुक्तम्। शक्त्यादिषु त्रिषु प्रत्येकं स्वरूपयोग्यतया कारणता विद्यते, किंतु फलोपधायकता तेषां त्रयाणां समुदाये भवति। अतोऽत्र काव्योद्भस्य कारणताया अवच्छेदकं शक्त्यादिगतं शक्तित्वादि भवति, न तु समुदितत्वं मिलितत्वं वा कारणताया अवच्छेदकम्। अत एव 'शक्तिः कारणम्, निपुणता कारणम्, अभ्यासः कारणम्' इति व्यवहारो भवति। एवमेव 'दंडो घटस्य कारणम्, चक्रं घटस्य कारणम्' इत्यादयो व्यवहाराः दंडादिस्थलेऽपि भवन्ति। हेतुारित्यत्रैकवचनं समुदितस्य फलोपधायकत्वमेव सूचयितुं वर्तते, न तु स्वरूपयोग्यतारूपां प्रत्येकं कारणतां निषेद्धुम्। इदं सर्वे काव्यप्रकाशस्य बालबोधिन्यां स्पष्टं वर्तते। समुदितस्य शक्त्यादित्रयस्य काव्योद्भवं प्रति फलोपधायकत्वमेवं प्रतिपादितम् - ''इति त्रयः समुदिताः = मिलिताः, न तु व्यस्ताः = परस्परनिरपेक्षाः तस्य काव्यस्योद्भवे निर्माणे समुल्लासे च हेतुः, न तु हेतवः।''इति।

''त्रयः शक्तिनिपुणताभ्यासाः काव्योद्भवं प्रति हेतुः' इति वाक्ये हेतुरिति पदं

शक्तिनिपुणताभ्यास इति पदस्य विशेषणं वर्तते, शक्तिनिपुणताभ्यासा इति पदं तेन विशेष्यं भवति। विशेष्ये विशेषणे च समानं वचनं भवति। यथा 'कृष्णा: गाव:' इत्यत्र। तथा शक्तिनिपुणताभ्यासा इति विशेष्ये बहुवचनस्य प्रयोगेण 'हेतव:' इति विशेषणे हेतुपदेऽपि बहुचनमेव समुचितं वर्तते, मम्मटेन तथा कथं न कृतम् इति प्रश्न उदेति। अस्य समाधानं वर्तते यद् यत्र विशेषणवाचकेन विशेष्यवाचकेन च समाना संख्या विवक्षिता भवति तत्रैव विशाष्यविशेषणवाचकयो: पदयो: समानवचनकत्वं भवति। यत्र तु विशेषविशेष्यपदाभ्यां विरुद्धा संख्या विवक्षिता वर्तते, विशेष्यवाचकेन तु बहुत्वसंख्या। अतोऽत्र भिन्नवचनकत्वे दोषो न वर्तते।

उक्तरीत्या मम्मटेन कृतस्य काव्यकारणनिरूपणस्य द्विधाऽभिप्राय आगच्छति। तत्र प्रथमो गोकुलनाथस्य वर्तते। तत्र कारिकाग्रंथस्य वृत्तिग्रंथस्य च विचारेण द्वावभिप्रायौ भवत:। तत्र प्रथमो वर्तते यत् कारयित्री प्रतिभा, निपुणता, अभ्यासश्च समुदितरूपेण काव्यस्य निर्माणं प्रति दंडचक्रादिन्यायनेन हेतुर्भवति। द्वितीयो विद्यते यद् भवयित्री प्रतिभा, निपुणताऽभ्यासश्च समुदिता दंडचक्रादिन्यायेन। सामाजिके काव्यसमुल्लासं प्रति हेतुर्भवति। एवं शक्तिनिपुणताऽभ्यासपदै: कविसामाजिकगतानाम् उभयेषां शक्तिनिपुणताभ्यासानां ग्रहणं मम्मटस्य विवक्षितम्। कविगतानामेव शक्त्यादीनां ग्रहणे तु काव्यस्य निर्माणे सत्यपि सामाजिकगतानां तेषामभावे काव्यस्य सामाजिक उल्लासो न संभवेत्। ततश्च काव्यस्य सामाजिकगतानां व्यवहारज्ञान-नरनिर्वृति-कान्तासम्मितोपदेशानां प्रयोजनानां पूर्वग्रंथेन प्रतिपादनं व्यर्थं भवेत्। सामाजिकगतशक्त्याद्यभावे काव्यमुपहसनीयमेव भवेत्। कवे: सामाजिकस्य चाभिप्रायेण कारिकागतस्योद्भवपदस्य निर्माणरूप: समुल्लासरूपश्चार्थ: कृत:। अभिनवगुप्तेन ध्वन्यालोकलोचनस्य प्रारंभे 'सरस्वत्त्यास्तत्वं कविसहृदयाख्यं विजयते' इति काव्यस्य कविसहृदयगामित्वं प्रतिपादितम्। तेन सामाजिकगतानां शक्त्यादीनामभावे काव्यसमुल्लासो न संभवति।

द्वितीयोऽभिप्रायोऽन्येषां टीकाकारणां मते वर्तते। तेषामभिप्रायो वर्तते यत् कविगतानामेव शक्तिनिपुणताभ्यासानां विवेचनं वर्तते। काव्यकारणस्य प्रसंगे सामाजिकगतस्य शक्त्यादेर्निरूपणं समीचीनं न वर्तते। ततोऽर्थो भवति यच्छक्तिनिपुणताभ्यासा: त्रयो दंडचक्रादिन्यायेन काव्यस्योद्भवम् = निर्माणरूपाम् उत्पत्तिं प्रति समुल्लासरूपम् उत्कर्षं च प्रति, दंडचक्रादिन्यायेन हेतुर्भवति। एवं काव्यं प्रति फलोपधायकत्वरूपं कारणत्वं शक्तिनिपुणताभ्यासानां समुदाय एव तथा भवति यथा 'जात्याकृतिव्यक्तय: पदार्थ:' इति पदार्थपद एकवचनेन बोधितं पदार्थत्वं जात्याकृतिव्यक्तीनां समुदाये भवति।

मम्मटस्येदं काव्यकारणनिरूपणं भामहं दण्डिनं चानुगच्छति। भामह: स्वकाव्यालंकारे काव्यकारणमेवं निरूपयति-

गुरूपदेशादध्येतुं शास्त्रं जडधियोऽप्यलम्।

काव्यं तु जायते जातु कस्यचित् प्रतिभावतः।

शब्दाश्छंदोऽभिधानार्था इतिहासाश्रयाः कथाः।

लोको युक्तिः कलाश्चेति मन्तव्याः काव्यगैह्यमी।।

शब्दाभिधेये विज्ञाय कृत्वा तद्विदुपासनाम्।

विलोक्यान्यनिबन्धांश्च कार्यः काव्यक्रियादरः।।इति।

एवं दंडिनाऽपि कथितम्-

नैसर्गिकी च प्रतिभा श्रुतं च बहु निर्मलम्।

अमन्दश्चाभियोगोऽस्याः कारणं काव्यसम्पदः।।

प्रथमवाग्भटः स्वालंकारग्रंथे वदति यत् प्रतिभा काव्यस्य जनने, व्युत्पत्तिः (निपुणता) काव्यस्य विभूषणे, अभ्यासो बाहुल्ये च कारणं भवन्ति-

प्रतिभा कारणं तस्य व्युत्पत्तिश्च विभूषणम्।

भृशोत्पत्तिकृदभ्यास इत्यादि कविसंकथा।।इति।

मम्मटोऽपि मन्ये करिकागतोद्भवपदस्य 'निर्माणे समुल्लासे' इत्र्थस्य करणेन शक्तेः काव्यस्य निर्माणं प्रति, निपुणताया विभूषणरूपमुत्कर्षं प्रति, अभ्यासस्य बाहुल्यं प्रति च कारणतामाह। प्रतिभया काव्यस्य जन्म, व्युत्पत्त्योकर्षः, अभ्यासेनाधिकानां काव्यानां चोत्पत्तिरनुभूयत एव। वृत्तिस्थेन समुल्लासशब्देन भूषणरूपोत्कर्षस्य भृशोत्पत्तेश्च ग्रहणं विवक्षितम्। कारिकास्थेनोद्भवशब्देनैवं जन्मभूषणभृशोत्पत्तयो विवक्षिताः। ततः शक्तिनिपुणताभ्यासानां काव्यस्योद्भवं प्रति दंडचक्रादिन्यायेन कारणत्वस्य कथनं विरुद्धं न भवति। एकस्याप्यभावे हि काव्यस्य तादृश उद्भवो न सिद्धयति। गोकुलनाथेनापि काव्यप्रकाशस्य विवरणेऽयमभिप्राय एवं प्रकटितः-

काव्यं हि जायते शक्तेर्वर्धतेऽभ्यासयोगतः।

अस्य चारुत्वनिष्पत्तौ व्युत्पत्तिस्तु गरीयसी।।इति।

मम्मटस्य काव्यकारणनिरूपणेन प्रभावितो जयदेवोऽपि काव्यं प्रति शक्त्यादीनां दंडचक्रादिन्यायेन कारणतां प्रतिपादयन् कथयति यत् कवितालताया उपादानकारणं प्रतिभा, निपुणतभ्यासौ च विवर्धनविभूषणादिद्वारा निमित्तकारणे भवतः, एवं त्रयाणां दंडचक्रादिन्यायेनैव काव्यं प्रति कारणता भवति। उक्तं चन्द्रालोके-

प्रतिभैव श्रुताभ्याससहिता कवितां प्रति।

हेतुर्मृदम्बुसम्बद्धबीजमाला लतामिव।।इति।

एवं भवद्भिः काव्यप्रकाशे निरूपितं काव्यकारणमधीतम्। सम्प्रति काव्यस्य लक्षणं ज्ञायतव्यम्।

काव्यस्रू लक्षणम्

एवं काव्यस्य कारणं प्रतिपाद्य मम्मटोऽग्रे काव्यस्य लक्षणं निरूपयितुम् 'एवमस्य कारणमुक्त्वा स्वरूपमाह' इत्यवतरणवाक्यं लिखति। अस्मिन्नवतरणवाक्ये स्वरूपशब्दस्यार्थः 'स्वं लक्ष्यभूतं काव्यं रूप्यते = इतरभेदेन ज्ञाप्यतेऽनेन' इति व्युत्पत्त्या लक्षणं वर्तते। लक्षणं नाम कस्यचित् पदार्थस्यासाधारणो धर्मो भवति, येन स पदार्थ इतरेभ्यः पदार्थेभ्यो भेदेन ज्ञायते। यथा गंधः पृथिव्या लक्षणमुच्यते। गंधेन पृथ्वी स्वभिन्नेभ्यो जल-ादिपदार्थेभ्यो भेदेन ज्ञायते। एंव काव्यस्येतरस्माद् भेदस्य ज्ञाने कारणं लक्षणं किं वर्तत इति प्रश्नस्योत्तरं दातुं कारिकाकारेण मम्मटेन काव्यस्य लक्षणमनेन वाक्येन प्रतिपाद्यते - 'तददोषौ शब्दार्थौ सगुणावनलंकती पुनः क्वापि' इति। अत्र तदिति पदेन काव्यस्य परामर्शो विद्यते। अत्र 'शब्दार्थो' इति विशेष्यदलं वर्तते, अदोषौ, सगुणौ, अनलंकती-इति त्रीणि शब्दार्थयोर्विशेषणानि सन्ति। अत्र लक्षणवाक्ये प्रयुक्तानां पदानामर्था विचार्यन्ते, ततो लक्षणवाक्यस्यार्थः प्रतिपादयिष्यते-

शब्दाथौ तत् - शब्दश्चार्थश्च शब्दाथौ तत् = काव्यमुच्यते। अत्र द्वंदसमासेन शब्द-ार्थयोरुभयोरेव काव्यत्वं प्रतिपाद्यते। न केवलः शब्दः काव्यं भवति, नापि च केवलोऽर्थः, अपितूभावेव काव्यम्। शब्द एव प्रधानमर्थ एव वा प्रधानमिति वक्तुं न शक्यते। द्वंद उभयोरेव पदार्थयोः प्रधानता भवति। शब्दशब्देनात्र वाक्यस्यार्थपदेन वाक्यार्थस्य च ग्रहणं विवक्षितम्। 'आप्तवाक्यं शब्दः' इत्यादिप्रयोगेण मुख्यरूपेण वाक्य एव शब्द-शब्दस्य प्रयोगो निश्चीयते। किंच 'शब्दार्थौ' इति प्रथमाद्विवनेन शब्दत्वरूपाऽर्थत्वरूपा च जातिरुच्यते। व्यक्तौ द्विवचनस्य स्वीकार एकमपि पदं शब्दांशेनार्थाशेन च काव्यं स्यात्। एकस्मिन् पदे सगुणालंकारत्वादि न संभवति। अतो वाक्यवाक्यार्थो काव्यमित्यर्थः करणीयो भवति। आस्वादस्य रसस्य वोद्बोधकत्वं व्यंजकत्वं वा शब्देऽर्थे च समानरूपेण वर्तते, 'काव्यं श्रूयते, काव्यं बुद्धयते' इति शब्दांशेऽर्थाशे चोभयविधो व्यवहारो दृश्यते च। तेनोभयोरेव शब्दार्थयोः काव्यत्वं व्यासज्यवृत्त्या मन्यते। 'नामरूपे व्याकरवाणि' इत्यादौ श्रुतौ, 'वागर्थाविव सम्पृक्तौ' इत्यादौ कालिदासवचने च द्वंदे शब्दस्य पूर्वम्, अर्थस्य च पंचादुपादानं प्रसिद्धं वर्तते। तेन द्वंदेऽभ्यर्हितत्वेन शब्दस्योपादानात् काव्ये शब्दांशस्यैव प्राधान्यमिति शं्का न कर्तव्या।

अदोषौ-रसस्यापकर्षको दोष उच्यते। सप्तम उल्लासे 'मुख्यार्थहतिर्दोषो रसश्च मुख्यः.......हतिरपकर्षः' इत्यादिना रसापकर्षकत्वरूपं दोषस्य लक्षणं प्रतिपादितम्।

एतादृशेन दोषेण युक्तयो: शब्दार्थयो: काव्यस्य लक्षणं न गच्छेदिति शब्दार्थयोर्विशेषणम् 'अदोषौ' इति दत्तम्। 'न वर्तते दोषो रसापकर्षकतत्वं च्युतसंस्कृतित्वादि ययोस्तौ शब्दार्थौ काव्यमुच्यते। तेन दोषाभावविशिष्टौ = निर्दोषौ शब्दार्थौ काव्यमित्यर्थ: फलति। केचनाऽत्र 'अदोषौ' इतिपदस्य तात्पर्य दोषसामान्यस्याऽभावम् रसरूपोद्देश्यप्रतीा-तिप्रतिबंधकानां च्युतसंस्कृतित्वादीनां दोषविशेषणाम् अभावं च वर्णयन्ति। तत्र प्रथमेव तात्पर्यं समीचीनं वर्तते। एकस्यापि दोषस्याभाव: काव्ये विवक्षित:। 'शब्दार्थो सहितौ काव्यम्' इति भामहवचनानुसारेण काव्यलक्षणं विदधत् कारिकाकारो मम्मट: काव्ये दोषसामान्यस्यैवाभावम् अभिप्रैति। भामहेन काव्य एकस्यापि दोषस्य सत्वं निषेधति मने। उक्तं भामहेन-

सर्वथा पदमप्येकं न निगाद्यमवद्यवत्।

विलक्ष्मणा हि काव्येन दु:सुतेनेव निन्द्यते।

नाऽकवित्वमधर्माय व्याधये दंडनाय वा।।

कुकवित्वं पुन: साक्षात्मृतिमाहुर्मनीषिण: ।इति।

एषा शंका न कर्तव्या यत् ''क्वचिदपि सर्वथा दोषाभावो न संभवति, अत: काव्यस्य निर्विषयत्वं प्रविरलविषयत्वं च स्यात्, 'नि:शेषच्युतचन्दनं स्तनतटम्' इत्युत्तमकाव्यस्योदाहरणे स्तनतटरूपस्योद्देश्यस्य पश्चात् 'नि:शेषच्युतचन्दनम्' इति विधेयस्य पूर्वं च कथनेन 'अनुवाद्यमनुक्त्वैव न विधेयमुदीरयेत्' इति नियमस्य अतिक्रमणेन विधेयाविमर्शदोषस्य सत्वात् काव्यत्वं न स्याद् उत्तमकाव्योदाहरणत्वं विरुद्धं च भवेत्'' इति, यत: काव्यस्य प्रविरलविषयत्वम् इष्टमेव वर्तते, एकस्यापि वाक्यस्य निर्दुष्टत्वेन काव्यस्य निर्विषयत्वं न संभवति, 'नि:शेषच्युचन्दनम्' इत्यादौ निर्दोषांश एवोत्तमकाव्यत्वं मम्मटस्याभिप्रेतं वर्तते, किंच रसप्रतिबंधकत्वाभावेन नात्र विधेयाविमर्शस्य दोषता वर्तते, अथवा कविशक्त्या तिरस्कृतत्वेनाऽभानाद् विधोयाविमर्शस्य दोषत्वमेव नावभाति। अतोऽदोषाविति विशेषणेन दोषसामान्याभाव एव विवक्षित:। तेन दोषसामान्याभाववन्तौ शब्दार्थौ काव्यमिति फलितं भवति।

सगुणौ - गुणै: सहितौ शब्दार्थौ काव्यमित्यर्थ:। यद्यपि गुणा रस एव वर्तन्ते, तथापि तेषां विद्यमानता व्यंजकतासंबंधेन शब्दार्थयोरपि संभवति। शब्दार्थौ हि माधुर्यादीनां त्रयाणां गुणानां व्यंजकौ भवत:। अतो गुणवृत्त्या गुणानां स्थिति: शब्दार्थयोरपि संभवतीति मम्मटेन सप्तम उल्लासे 'गुणवृत्त्या पुनस्तेषां वृत्ति: शब्दार्थयोर्मता' इति वचनेन प्रतिपादितम्। तेन गुणाभिव्यंजकौ शब्दार्थौ काव्यमित्यर्थो भवति। अनेन सगुणत्व विशेषणेन शब्दार्थयो: सरसत्वमर्थत: प्रतिपादितम्। गुणानां हि रसेन सह नित्य: सम्बंधो वर्तते। गुणा रसं विना स्थातुं न शक्नुवन्ति। यत्र तु रसे विवक्षा न भवति तत्र चित्रकाव्ये गुणाभिव्यंजकयो:

शब्दार्थयो: सत्त्वम्। अत एव चित्रकाव्यनिरूपणस्य प्रसंगे मम्मटेन 'चित्रं गुणालंकारयुक्तम्' इत्यभिहितम्। अत्र गुणपदं गुणाभिव्यंजकपरं विद्यते।

पुन: क्वापि अलंकृती - इदं शब्दार्थयो: तृतीयं विशेषणं वर्तते। न अलंकृति: अनुप्रासोपमादिरूप: अलंकारो ययोस्तौ अनलंकृती इति 'अनलंकृती' पदस्य विग्रहो विद्यते। अत्र प्रयुक्तो नंशब्द ईषदर्थे वर्तते। ईषत्त्वेनेह अस्फुटत्वं विराजते। तेन पुन: = किंतु क्वापि = स्फुटरसस्य स्थले अनलंकृती = अस्फुटालंकारौ = स्फुटेनालंकारेण रहितावपि शब्दार्थौ काव्यमित्यर्थो भवति। 'अनलंकृती' इति लक्षणघटकं पदं नास्ति, अपितु 'सालंकारौ' इति विशेषस्य ग्राहकं मन्यते। तेन सर्वत्र सालंकारौ, क्वचित्वस्फुटालंकारावपि शब्दार्थौ काव्यमित्यर्थ: फलिता भवति। अयमभिप्राय: काव्यप्रकाशे 'क्वापीत्यनेन एतदाह यत् सर्वत्र सालंकारौ, क्वचित्तु स्फुटालंकारविरहेऽपि न काव्यत्वहानि:' इति। भावोऽयं विद्यते यत् काव्यं चमत्कारसारं भवति। चमत्कारस्य कारणं रसोऽलंकारश्चेति तत्वद्वयं वर्तते। यत्र रस: स्फुटस्तत्र रसेनैव चमत्कारात् शब्दार्थयो: स्फुटस्यालंकारस्यापेक्षा न भवति। अत एव ध्वनिकारेण 'स्वत एव रसानुगुणार्थविशेषनिबंधनम् अलंकारविरहेऽपि छायातिशयं पुष्णाति' इति। अस्यार्थो वर्तते यदलंकारविरहेऽपि स्फुटरसौ शब्दार्थौ काव्यं भवति। किंतु यत्र रसो न भवति तत्र स्फुटस्यालंकारस्यापेक्षा भवत्येव। रसस्यालंकारस्य चाभावे नीरसयोर्निरलंकारयोश्च शब्दार्थयो: काव्यत्वं चमत्काराभावेन स्वीकर्तुं न शक्यते। नीरसयोर्निरलंकारयो: काव्यपदस्य प्रयोगो लाक्षणिक एव भवति, नतु मुख्य:। अयममेवाभिप्रायो मम्मटेन 'अनलंकृती पुन: क्वापि' इति कथनेन प्रतिपादित:। अत्र पुनर्भवतां जिज्ञासा स्यादेव यत् तत् स्थलं किं वर्तते यत्र रसो वर्तते, कन्तु कश्चिदप्यलंकार: स्फुटो नास्तीति। अस्या जिज्ञासाया: प्रशमनार्थं मम्मट: तत् स्थलं प्रदर्शयति यत्र रस: स्फुटो वर्तते, कश्चिदपि अलंकारस्तु स्फुटो नास्ति। भवन्त: पद्यमिदं पश्यन्तु-

य: कौमारहर: स एव हि वरस्ता एव चैत्रक्षपा

ते चोन्मीलितमालतीसुरभय: प्रौढा: कदम्बानिला:

सा चैवास्मि तथापि तत्र सुरतव्यापारलीलाविध

रेवारोधसि वेतसीतरुतले चेत: समुत्कंठते।।इति।

भवन्तोऽस्य पद्यस्यान्वयं तदर्थं च पूर्वं जानन्तु-

अन्वय: - हि य: कौमारहर: स एव वर: (अस्ति), (हि) चैत्रक्षपा: ता: एव (सन्ति), (हि) उन्मीलितमालतीसुरभय: प्रौढा: कदम्बानिला: ते च (सन्ति), (हि) अस्मि च सा एव (अस्मि), तथापि (तत्र) रेवारोधसि (तत्र) वेतसीतरुतले तत्र सुरतव्यापारलीलाविधौ चेत: समुत्कण्ठते।

पदार्थाः - हि = यद्यपि, यः कौमारहरः = कुमारावस्थायामेव संभागगस्येच्छाया जननेन मम कौमारं बाल्यम् असंभुक्तावस्थां हृतवान् चोरितवान् स कौमारहरः, स एव = पूर्वमुपभुक्त एव वरः प्रियमतमः पतिर्वर्तते, (हि = यद्यपि) चैत्रक्षपाः = चैत्रमासस्य रात्रयः, ताः = पूर्वमुपुभुक्ता एव सन्ति, (हि=यद्यपि) उन्मीलितमालतीसुरभयः = उन्मीलिताभिः मालतीभिः वासन्तिकलताभिः सुरभयः मनोहरसुगंधयुक्ताः प्रौढाः = रतेद्दीपने समर्थतमाः, कदम्बानिलाः = धूलिकदम्बनामकस्य पुष्पविशेषस्य अनिलाः वाताः, ते = पूर्वमनुभूताः, च = एव सन्ति, अस्मि च = अहं च, सा एव = पूर्वा एव, न तु नवीनाऽस्मि, तथापि = वरादीनां पूर्वमेवोपभुक्तत्वेन नवीनत्वाभावेऽपि (तत्र = पूर्वमेवोपभुक्ते) रेवारोधसि = रेवानामिकाया नद्याः रोधसि तटे, (तत्र = पूर्वमेवोपभुक्ते) वेतसीतरुतले = वेतसीनां तरूणां तलेऽधः (तत्र = पूर्वमेवोपभुक्ते) सुरतव्यापारलीलाविधौ = सुरतस्य संभोगस्य ये व्यापारा आलिंगनचुम्बनादयो लीलाः क्रीडाः सन्ति तेषां विधौ विधाने करणे, चेतः = मनः, समुत्कण्ठते = सम्यक् उत्कण्ठितम् = उत्सुकं भवति।

भावार्थः - अयं कवयित्र्याः शिलाभट्टारिकायाः श्लोको वर्तते। अत्र काचन स्वाधीनपतिका नायिका वरेण कुमारावस्थात एवाऽसकृद् उपभुक्ता अपि पूर्वम् उपभुक्तानामपि वरादीनां प्रतिक्षणं नवनवताम् = रमणीयताम् अत्यन्तोपादेयतां च प्रतिपादयन्ती स्वसखीं प्रति कथयति - सखि! मम वरः स एव वर्तते यो मया कुमारदशायामेव चैर्येण पूर्वमुपभुक्तः। अद्य स एव वरो विराजते येन पूर्वं मयि कुमारावस्थायामेव संभोगस्येच्छा जनिता मम कौमार्यं हृतं च। यदा मम कौमार्यं हृतं तदानीं याः चैत्रमासस्य रात्रय आसंस्ता एवाद्यापि समुपस्थिताः सन्ति। एवं ये विकसितानां वासन्तिकलतानां सौरभं दधाना धूलिकदम्बवनाद् वान्तो ये वाता आसंस्त एवाधुनापि सन्ति। एतेषां चैत्ररात्रीणां विविधसौरभवतां वातानां च कामोद्दीपकत्वं पूर्वमेवानुभूतम्। अहमपि नवीना नास्मि, सैवास्मि। एवं रेवायास्तदेव तटम्, तदेव वेतसीनां तरुणां शीतलं तरुतलम्, त एव चुंबनालिंगनादयः संभोगक्रीडाश्च भाविनः सन्ति, तथापि कस्यचिन्नवीनस्य वस्तुनोऽभावेऽपि संभोगक्रीडां विधातुम्=वरादीन् उपभोक्तुं मम मन उत्कण्ठितं भवति। प्रियैरसकृदुपभुक्तैरपि वरपेपकरणादिभिर्मनो न संतोषमनुभवति। एते वरादयो नवनवायन्ते। प्रेम्णोऽवसानं न भवति। प्रेमाऽमरं वर्तते। उपभोगा असकृत् संतोऽपि त एव जीर्णा भवन्ति, नतु कदाचन प्रेम जीर्यति। प्रेमवशादेव उपभुक्ता अपि पदार्था नवनवायमाना उत्कण्ठां जनयन्ति।

अपि अत्र श्लोके 'हि' शब्दो यद्यप्यर्थे वर्तते चैत्रक्षपादिभिरन्यैरपि सम्बद्धयते च, एवं 'तत्र, शब्दस्यापि रेवारोधसा वेतसीतरुतलेन चापि संबंधो वर्तते। 'अस्मि' इति पदम् अहमर्थे वर्तते। अत्र श्लोके वर आलम्बनविभावः, चैत्रक्षपाः, विकसिता वासन्तिकलताः, सुरभयो वाताः, रेवातटम्, वेतसीतरुतलं चोद्दीपनविभावाः सन्ति, नायिकायास्तथा कथनं गम्या रोमांचादयश्चानुभावाः सन्ति, एवं हर्षोत्कण्ठादयो व्यभिचारिणः सन्ति।

एभिर्नायिकाश्रया रतिरभिव्यज्यते। एवं विभावादिभिरभिव्यज्यमाना सहृदयगता रतिः संभोग-श्रृंगारतामेति। एवमिह संभोग-श्रृंगारो रसः स्फुटो वर्तते। किंतु कश्चनापि अलंकारः स्फुटो नास्ति। अत एव मम्मटेन 'अत्र स्फुटो न कश्चिद् अलंकारः' इति प्रोक्तम्। यद्यपि श्लोकेऽस्मिन् नवीनत्वस्यार्थाद् वरादीनाम् अनुपभुक्तत्वस्य उत्कंठाकारणस्य अभावेऽपि उत्कंठारूपस्य कार्यस्योद्भवस्य वर्णनेन कारणाभावेऽपि कार्योत्पत्तिवर्णनरूपाया विभावनायाः, एवं वरादीनाम् उपभुक्तत्वरूपस्य कारणस्य सत्त्वेऽपि अनुत्कंठारूपस्य कार्यस्यानुद्भवस्य वर्णनेन कारणसत्त्वेऽपि कार्यानुत्पत्तिकथनरूपाया विशेषोक्तेश्च विद्यमानत्वेन विभावना-विशेषोक्त्योरलंकारयोः संदेहसकरो वक्तुं शक्यते, तथापि स स्फुटो नास्ति। यतो हि यत्र कारणाभावस्य कार्याभावास्य च बोधको नांदिः = नकारादिः प्रयुज्यते तेन कारणाभावः कार्याभावश्च साक्षान्निषिध्यते तत्रैव विभावना विशेषोक्तिश्च स्फुटे भवतः। अत्र त्वनुपभुक्तत्वरूपस्य कारणस्याभावस्य, अनुत्कंठारूपस्य कार्यस्याभावस्य च साक्षान्नांदिना निषेधो नास्ति। अतो विभावना विशेषोक्तिश्च स्फुटे न स्तः। तयोरस्फुटत्वेन तयोः संदेहसंकरोऽपि अस्फुट एव वर्तते। 'हरो वरः, मीलितमालती' इत्यादावनुप्रासः सन्नपि प्रकृतस्य श्रृंगारस्य तथोपाकरकत्वाभावेनालंकर एव न वर्तते। ध्वनिकारेण 'नानुप्रासः प्रकाशकः' इति वचनेनानुप्रासस्य श्रृंगारंप्रकाशकता निरुद्धा वर्तते। किंचानुप्रासोऽत्र कवितात्पर्यविषयत्वाभावेन न स्फुटः। 'अस्मि' इति पदमत्राऽहमर्थकं विर्तते तेन तस्य क्रियावाचनकत्वमंगीकृतय वरादिषु प्रकृतेषु 'अस्मि, अस्ति, सन्ति' इत्यादिवचनादिपरिणामेनाऽन्नये क्रियादीपकालंकारः स्फुट इति वक्तुं न शक्यते। किंच तथवचनादिपरिणाम एव दीपकस्य स्फुटत्वं निषेधति। एवं 'तद्' इतिपदेन बोधितस्य उपभुक्तत्वरूपस्य धर्मस्य वरादिषु प्रकृतेषु सर्वत्रान्नयेन तुल्ययोगिताऽलंकारः स्फुट इत्यपि वक्तुं न शक्यते। यतोहि वरादिषु औपम्यं न वर्तते। उपमागर्भत्व एव तुल्ययोगिता दीपकं वा भवति। अतः तुल्ययोगिताया दीपकस्य वा संभवो नास्ति। एवं 'स एव हि वरः' इत्यादौ स्मरणालंकारोऽपि वक्तुं न शक्यते। यतोहि सादृश्यस्यैव ज्ञानेन प्रयोज्यं स्मरणं कविसम्प्रदाये स्मरणालंकार उच्यते। किंचात्र स्मरणमेव नास्ति, यतः 'सोऽयं वरो यो मया पूर्वमुपभुक्तः' इत्याद्याकारेण प्रत्यभिज्ञाऽत्र विद्यते। एवमत्र 'भामहोद्भटादिमतेन प्रतीयमानः श्रृंगाररसो वाच्यस्योपस्कारकत्वेनाऽलंकारो वर्तते, अतो रसवदलंकारः स्फुटः' इत्यपि वक्तुं न शक्यते, यतोहि रसोऽत्र प्रधानं विद्यते, प्रधानं त्वलंकारो न भवति, अपित्वलंकार्यो भवति। एवं रसस्य प्राधान्येन तस्यालंकारता वक्तुं न शक्यते। अत एव मम्मटेन 'रसस्य च प्राधान्यन्नालंकारता' इति कथितम्। रसस्तत्रालंकारो भवति यत्र स कस्यचिद् अन्यस्योपकारकत्वेनांगं भवति। इंद पंचमोल्लासे मम्मटः स्वयमेव प्रतिपादयिष्यति। आनंदवर्धनेनापि ध्वन्यालोके-

प्रधानेऽन्यत्र वाक्यार्थे यत्रांगं तु रसादयः।

काव्ये तस्मिन्नलंकारो रसादिरिति में मति:।।इति प्रतिपादितम्।

एवमत्र श्लोके कश्चिदप्यलंकार: स्फुटो नास्ति। किंतु रस: स्फुटो वर्तते। एतादृशे स्थले स्फुटालंकाररहितावापि शब्दार्थौ काव्यं भवति। 'अनलंकृती पुन: क्वापि' इति कथनस्याभिप्रायोऽयमेव वर्तते।

काव्यलक्षणवाक्यार्थनिष्कर्ष:-

लक्षणवाक्ये प्रयुक्तानि पदानि तदार्थाश्च विचारिता:। इदानीं भवन्तो लक्षणवक्यार्थस्य निष्कर्षं जानन्तु। दोषरहितौ, गुणाभिव्यंजकौ, सरसौ, सर्वत्र सालंकारौ, स्फुटरस्थले स्फुटालंकाररहितावापि शब्दार्थौ = वाक्यवाक्यार्थौ काव्यमुच्यते। काव्यत्वं तादृशयो: शब्दार्थयोव्र्यासज्यवृत्त्या वर्तते। न केवल: शब्द:, नापि च केवलोऽर्थ:, अपितूभौ तादृशौ शब्दार्थौ काव्यम्। काव्यप्रकाशस्य बालबोधिनीटीकायां प्रदीपादिमतमाश्रित्य काव्यलक्षणवाक्यस्य पडर्था: प्रतिपादिता:-

'१ सरसं स्फुटालंकारसहितम् २. सरसम् अस्फुटालंकारसहितम् ३ सरसम् अलंकारशून्यम् ४ नीरसं स्फुटालंकारसहितम् ५ नीरसम् अस्फुटालंकारसहितम् ६ नीरसम् अलंकारशून्यम्। अत्र मम्मटमते प्रथमद्वितीयचतुर्थपंचमानां काव्यत्वम्। प्रदीपमते आदितश्चतुर्णां काव्यत्वम्। यदि त्वित्यादिमते प्रथमद्वितीयचतुर्थानामेव काव्यत्वम्' इति।

अर्थान्मम्मटमते, स्फुटालंकारौ सरसौ, अस्फुटालंकारौ सरसौ, स्फुटालंकारसहितौ नीरसौ, अस्फुटालंकारौ नीरसौ च शब्दार्थौ काव्यमिति लक्षणवाक्यस्य फलितोऽर्थो भवति। किन्त्वस्फुटालंकारयोर्नीरसयो: शब्दार्थयो: काव्यत्वं मम्मटलक्षणवाक्यान्न सिद्धयति। अतो मम्मटमते प्रथम-द्वितीय-चतुर्थस्थल एव काव्यत्वमिति प्रतिभाति।

'तददोषौ शब्दार्थौ....' इति वाक्यविषये टीकाकारणां वैमत्यम्-

गोकुलनाथ उपाध्यायो काव्यप्रकाशस्य विवरणे वदति यत् 'तददोषौ शब्दाथौ....' इति वाक्यं काव्यस्य लक्षणं न प्रतिपादयति, अपितु काव्ये कवेर्नैपुण्यस्य प्रतिपादकं वर्तते। कविना काव्ये दोषाभावालंकारादयो ग्रहणीया: तेन च कवौ नैपुण्यम् आगमिष्यतित्येवाननेन वाक्येन मम्मटो वक्ति। इहापि वस्तुतो दोषाभावादिग्रहणरूपं चतम्कारस्यासाधारणं कारणमेव प्रतिपाद्यते। काव्यलक्षणं तु 'लोकोत्तरवर्णनानिपुणकविकर्म काव्यम्' इति वाक्येनैव चमत्कारिवर्णना काव्यस्वरूपत्वेन प्रतिपादिता। उक्तं विवरणे - 'दोषाणामभाव:, तदुनसंधानाभावो वा चमत्कारप्रतिबंधकाभावत्वेन सर्वत्राऽपक्ष्यत इति चमत्काराऽसाधारणकारणान्येव परिगणितनि। लक्षणंतुचमत्कार निपुणकविकर्मत्वम्।' इति।

मधुमती प्रतिपादयति यत् पूर्वं कविर्मण: काव्यत्वं प्रतिपादितम्, अनेन वाक्येन

तस्य कविकर्मरूपस्य काव्यस्य धर्मिणौ = आश्रयभूतौ शब्दार्थौ प्रतिपाद्येते। अन्यथा लोकोत्तरवर्णनारूपं कविकर्म कुत्र भवतीत्याकाड्.क्षा शांता न स्यात्। यत्र कविकर्म भवति तौ शब्दार्थौ दोषाभावादिना विशिष्टौ भवेतामिति प्रतिपाद्यते 'तददोषौ' इत्यादिना वाक्येन। उक्तं मधुमत्याम् 7 'प्रासंगिक कारणाभिधानं सामप्य पूर्वोक्तकाव्यस्य धर्मिणमाह - एवमिति। एवं व्याचख्युः काव्यदर्पणे पितृचरणाः। भास्करादयस्तु - स्वरूपं काव्यस्वरूपमित्याहुः। तत्र पूर्वं साधीयः। उत्तरत्र तु पूर्वकाव्यस्वरूपविरोधः। तत्र कविकर्मणः, अत्र तु त द्विषयीभूतशब्दार्थयोः काव्यत्वाभिधानात्।....यथासूत्रपुष्पयोः साधारण्येऽपिग्रथनमेवमालाकार व्यापारः, तथाअत्रापि शब्दार्थयोः साधारण्येऽपि योजनमेव कविव्यापार इति बोध्यम्। तदेव च काव्यम्।' इति। एवं कवेश्चमत्कारिवर्णनमेव काव्यमिति मधुमतीकार आह। किंतु व्यापारो धर्मिणं विषयं विना स्वरूपं न लभते। कविव्यापारस्य विश्रान्तेराश्रयो शब्दार्थाविव। सहृदयस्यापि चमत्कृतिः शब्दार्थयोरेव विश्राम्यति, न तु कविव्यापारे। अतः 'तददोषौ' इति वाक्यं काव्यस्वरूपस्यैव प्रतिपादकं वर्तते। दोषाभावादिविशिष्टयोः शब्दार्थयोरेव काव्यत्वं स्वीकरणीयम्। 'वागर्थाविव सम्पृक्तौ' इत्यादिमहाकविवचनैः, 'शब्दार्थौ सहितौ काव्यम्' इत्यादिभामहादिलक्षणैश्च शब्दार्थयोरेव काव्यतवं प्रामाणिकम्, न तु कविव्यापारस्य। कविव्यापारस्तु तादृशशब्दार्थरूपस्य काव्यस्य कारणं वर्तते। लोकोत्तरवर्णनारूपं निपुणं कविकर्म = कविव्यापारो यत्र भवति तौ शब्दार्थौ काव्यमित्यर्थस्य करणेन, कविव्यापारे लक्षणया काव्यशब्दस्य प्रयोगेण वा काव्यप्रकाशग्रंथस्य पूर्वापरविरोधो न भवति। एवमन्येषां टीकाकारणां सिद्धांतभूतः अभिप्रायो वर्तते। तस्मात् 'तददोषौ शब्दार्थौ....' इति वाक्येन काव्यस्यैव लक्षणं प्रतिपाद्यत इति ज्ञातव्यम्। अत एव ध्वनिकाव्यलक्षणे शब्दार्थलस्यैवोत्तमकाव्यत्वमुक्तम्, न तु तादृशव्यापारस्य। तेन दोषाभावादिविशिष्टौ शब्दार्थाविव काव्यम्। के दोषा गुणा अलंकाराश्चेति ग्रंथकारः सप्तमेऽष्टमे नवमे दशमे चोल्लासे प्रतिपादयिष्यति। अत एवोक्तं मम्मटेन - 'दोषगुणालंकारा वक्ष्यन्ते' इति।

विषयसंग्रहः-

एवमस्मिन् पाठे काव्यस्य कारणं लक्षणं च काव्यप्रकाशस्य दृशा विचारितम्। तत्र प्रतिपादितं यत् प्रतिभारूपा संस्कारविशेषपदेन प्रतिपादिता शक्तिः, लोकव्यवहारादिज्ञानजन्या दृढसंस्काररूपा व्युत्पत्तिपदेनापि वाच्या निपुणता, काव्यस्य करणे समायोजने च पुनःपुनःप्रवृत्तिरूपो वस्तुतः तज्जन्यसंस्काररूपोऽभ्यासश्चेति समुदितास्त्रयः काव्यस्योद्भवं प्रति दंडचक्रादिन्यायेन कारणं भवति। काव्यकारणस्य प्रतिपादिका

'शक्तिर्निपुणता' इत्यादिरूपा कारिका कवे: सहृदयस्य चाभिप्रायेण टीकाकारै: कथं व्याख्यातेत्यपि निरूपितम्। तत: काव्यस्य लक्षणं प्रतिपादितं तस्य प्रतिपादिका कारिका व्याख्याता च। इदमपि कथितं यद् दोषरहितौ, गुणाभिव्यंजकौ, सरसौ, सर्वत्र सालंकारौ, रसस्थलेऽस्फुटालंकारौ च शब्दार्थौ = वाक्यवाक्यार्थौ काव्यं वर्तते। 'तददोषौ' इत्यादि विवरणटीकाया मधुमतीटीकायाश्च मते काव्यस्य लक्षणं नास्ति, काव्यस्य लक्षणं तु 'लोकोत्तरवर्णनानिपुणकविकर्म काव्यम्' इति पूर्ववाक्येनैव चमत्कारिवर्णनारूप: कविव्यापार एव काव्यस्वरूपत्वेनोक्त:। 'तददौषौ' इत्यादिवाक्यं तु काव्ये नैपुण्यस्य प्रतिपादकं कविव्यापाररूपस्य काव्यस्य धर्मिण: = शब्दार्थरूपस्याश्रयस्य निरूपकं वा वर्तते। किंतु सिद्धांतरूपेण 'तददोषौ' इति वाक्यं काव्यस्वरूपस्यैव प्रतिपादकं मन्यते। कविव्यापारो विषयं विना स्वरूपं लब्धुं नार्हति, तस्य सहृदयस्य च विश्रान्ते: स्थानं शब्दार्थयुगलमेव भवति। अतो दोषाभावादिविशिष्टयो: शब्दार्थयो: युगलमेव काव्यमिति सिद्धांततया स्वीकृतम्। एवमत्र भवद्भि: मम्मटमतेन काव्यस्य कारणं लक्षणं च पठितम्।

1.0 प्रस्तावना-

वेदो देवस्य काव्यमिति प्रसिद्धि:। इदं काव्यं न ममार न जीर्यति। अस्मिन् देवकाव्ये वेदे काव्यस्य सर्वाणि तत्वानि विलसन्ति। अलंकारस्तेष्वेकतम:। यदि वयं केवलमृग्वेदं पश्यामस्तत्र नैकेष्वार्षदृष्टमंत्रेषु विराजन्तेऽनुप्रासोमारूपकादयोऽलङ्.कारा:। एतेषालङ्.काराणां चारुतम: प्रयोगस्तत्र द्रष्टुं शक्यते। यथा-

उत त्व: पश्चन् न ददर्श वाचं उत त्व: शृण्वन् न शृणोत्येनाम्।

उतो त्वस्मै तन्नं विसस्रे जायेव पत्ये उषती सुवासा।।

(ऋ. ७१०.७१.४)

अत्र पत्ये सुवासा जाया इव इत्यस्मिन् प्रयुक्तोपमाया: सौन्दर्यं त्वनिर्वचनीयम्।

एवमन्यो मन्त्र:-

द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते।

तयोरन्य: पिप्पलं स्वाद्वत्ति अनश्नन्नन्यो अभिचाकषीति।।

(ऋ. ७१.१६४.२०)

अत्रैकस्मिन्नेव मन्त्रेऽनुप्रासरूपकविभानाविशेषोक्त्यलंकारा: विराजन्ते। अयं दर्शनतत्वप्रतिपादको मंत्रोऽलङ्कारचमत्कारभाण्डार एव प्रतीयते। एवं वेदेभ्य एव काव्यालङ्.काराणां प्रवर्तनमिति निश्चप्रचम्।

२.0 अलङ्.कारस्येतिहास:-

अलङ्.करणं कस्मै न रोचते? को नाभिषत्यात्मानमलङ्.कर्तुम्? मानवस्य विकासेन सहैव तस्य सौन्दर्यानुभतेरपि विकासः। विकासस्तु सततप्रक्रिया या प्राकृत-कालादारभ्याऽधुनापि निरन्तरं प्रवर्तते, न कदापि विघिनता विरमति। यथा यथा मानवो विकसति तथा तथा तस्य सौन्दर्यानुभूतिरपि सौन्दर्यबोधोऽपि 'सामान्यतस्तत्सुन्दरं येन मनः सुखमनुभवति' यन्मनः सात्त्विकं निरवद्यं शिवसंकल्पं तस्मै मनसे यद्रोचते तत्सुन्दरम्। सुंदरस्य भावः सौन्दर्यम्। सौन्दर्यम्। सौन्दर्यमलङ्.कारः। किमिव हि मधुराणां मण्डनं नाकृतीनाम्? इति कालिदासः। तथापि शकुंतला प्रियमंडना रूपिता तेनैव महाकविना। अतो निसर्गसुंदरोऽपि मण्डनं भूषणलङ्.करणं वा वांछति।

अलङ्.करणमलङ्.कृतिर्वाऽलङ्.कारः। अलङ्.क्रियतेऽनेनेत्यलङ्.कारः। यद्वा अलङ्.करोतीत्यलङ्.कारः। यथा लोकेऽलङ्.करणप्रवृत्तिस्तथैव काव्येऽपि। लोके शरीरं गृहं भोजनमन्यानि च वस्तून्यलङ्.क्रियन्ते, काव्येऽपि शब्दार्थशरीरमलङ्.क्रियते। सौन्दर्यानुभूतिरेवालङ्.कारप्रवृत्तिं जनयति। एवं हि यथा लोके अलङ्.काराणां विकासेतिहासस्तथैव काव्यजगत्यपि तेषां विकासेतिहासः।

वेदाः प्रमाणमस्येतिहासास्य। यतो ह्ययं तत एव प्रभवति। ऋग्वेदे अरंकृतिः, अरंकृतः, प्रभृतिपदानि प्रयुक्तान्युपलभ्यन्ते-

वायवायाहि दर्शतिमे सोमा अरंकृताः। (ऋग्वेदः, १.२.१)

त्वमग्ने द्रविणोदा अरंकृते। (तत्रैव २.१.७)

का ते अस्त्यरंकृतिः। (तत्रैव १.२.३)

आदित्यानामरंकृते (तत्रैव ८.७.३)

यज्ञकामो अरंकृत्या। (तत्रैव १०.४.५)

यमकादौ भवेदैक्यं रलयो डलयो वबयोः शषयोस्तथा इति नियमेन रलयोरभेदः। अत्रापि भाष्यकारेण सायणाचार्येण 'अरंकृताः' 'अरंकृते' अरंकृतिरेतेषां कृते क्रमशः - 'अलंकृताः', 'अलंकृते', 'अलंकृतिश्च' पदानि प्रयुक्तानि। कालांतरे एते ऋग्वेदीयाः शब्दाः ब्राह्मणग्रंथेषु रकारं हित्वा लकारं गृहीतवन्तः। शतपथब्राह्मणे स्थलद्वये 'अलंकार' इति शब्दः प्रयुक्तः-

सिकताभिरनुविकरत्यलंकारोऽन्नेष सिकता भ्राजन्त इव (श.ब्रा.३.५.१.३६)

अंजनाभ्यंजने प्रयचत्येष ह मानुषोऽलंकारः (तत्रैव १३.८.४.७)

उपनिषत्स्वपि 'अलंकार' इत्यस्य प्रयोगो दृश्यते-

'वसनेन अलंकारेणेति संस्कुर्वन्ति' (छान्दोग्योपनिषद् ८.८.५)

निरुक्तेऽपि एष अलंकारशब्द उपलभ्यते। एवं हि वैदिकवाड्.मयेऽलंकारशब्दस्य प्रयोगः प्राप्यते किन्निदं स्पष्टं नास्ति यत्तत्रायं शब्दः काव्यालड्.कारार्थे प्रयुज्यते स्म न वेति। निरुक्तात्प्राग् निघण्टुग्रंथे उपमावाचकानां द्वादशनिपातानामुल्लेखो लभ्यते। ''इदमिव। इदं यथा। आनिर्नय। चतुराश्चिद्ददमानात्। ब्रह्मणा व्रतचारिणः। वृक्षस्य नु ते पुरुहूतवयाः। जार आ भगम्। मेषो भूतो३ भिन्नयः। तद्रूपः। तद्वर्णः। तद्वत्। तथेत्युपमाः ।3. ।3।। महर्षिपाणिनिप्रणीतायामष्टाध्यायय्यामलंकारः अलंकारेष्णुः प्रभृतिशब्दानां तु बाहुल्यमस्त्येव। उपमावाचकशब्दाभिधेयानि सूत्राण्यपि सन्ति। महाभाष्यकारः पतंजलिः उपमासम्बद्धान् शब्दान् व्याकरोति तथा च 'गौरिव गवयः' इत्युदाहरणेनोपमायाः शास्त्रीयमाधारं पुष्णाति। दर्शनशास्त्रे अनुमानप्रमाणमुपमानप्रमाणंचोपमाबलेनैव वस्तुज्ञानं कारयन्ति। एवं वैदिकवाड्.मयात्प्रचलितोऽलड्.कारः इतस्तंतो सामान्यविशेषरूपैर्भूषितः काव्यजगति पदमर्पयति।

सर्वप्रथमं भरतमुनिना नाट्यशास्त्रे चत्वाराः काव्यालड्.काराः समुल्लिखिताः - उपमा (पंचधा), रूपकं, दीपकं, यमकं (दशधा) च। इमे चत्वारोऽलड्.काराः क्रमशो भामहादिभिराचार्यैरुपसेविताः शतमपि संख्यामतिक्रम्य गम्यमाना दृश्यन्ते। भामहोऽलंकारसम्प्रदायस्य प्रवर्तक इति प्रतिष्ठितः। अलड्.कारसम्प्रदाये ये मान्या आचार्यास्ते न केवलं नूतनानलड्.कारान् कल्पितवन्तोऽपितु तेषां सुदृढमाधारं स्थापितवन्तो व्यवस्थितरूपेण वर्गीकरणमपि कृतवन्तः। एवं शब्दालड्.कारा अर्थालड्.कारा उभयालड्.काराश्चेत्यलड्.कारास्त्रिधा विभक्ताः। यद्यपि 'शब्दार्थौ काव्यम्' किंतु तत्रार्थालड्.काराणामेव संख्यातिभूयसी। अर्थालड्.काराणां मूलं प्रायः सादृश्यमेव। अत उपमाया महती प्रतिष्ठा सर्वालड्.कारमूलत्वात्। एतावानेवाऽलड्.कारसंसार इति वक्तुं न युज्यते। यतो हि ध्वन्यालोककार आनंदवर्धनः प्राह - 'अनंता हि वाग्विकल्पास्तत्प्रकारा एव चालड्.काराः'। केचनालड्.कारपक्षपातिन आचार्यास्त्वलड्.कारं काव्यस्य जीवितं मन्यमनानास्तं विना काव्यमेव न स्वीकुर्वन्ति। यथाऽऽचार्यजयदेवश्चन्द्रालोके आचार्यमम्मटमुद्दिश्य सरोषमाह-

'अड्.गीकरोति यः काव्यं शब्दार्थावनलड्.कृती।

असौ न मन्यते कस्मादनुष्णमनलं कृती।।'

अनयैव धिया नैके विद्वांसो लघुत्रयीमवमत्य बृहत्तयीं प्रतित धावन्ति। अतोऽलं विस्तेरण मन्ये अलड्.कारो नेतिहासवस्त्वद्यापि तस्य साम्प्रतिकत्वादिति।

3.0 आचार्यभामहस्तस्य स्थितिकालश्च-

भरतमुने: पश्चादपर आचार्यो भामह एव योऽलङ्.कारशास्त्रस्येतिहासे द्वितीयोप्यद्वितीयं स्थानं भजते। वस्तुत: स अलङ्.कारप्रस्थानस्य प्रवर्तकोऽप्रतिम आचार्य:। आचार्यभामहस्य विषये वयमद्याप्यविदितवृत्ता:। यतो हि स महात्मा क्वचिदप्यात्मवृत्तं नैवोल्लिखितवान्। केवलं स्वोपज्ञग्रंथस्य काव्यालङ्.कारस्यान्ते स्वकीयं पितरं समुल्लिख्य, तस्य पुत्रेणायं ग्रंथो निर्मित इत्याख्याय विरमति-

अवलोक्य मतानि सत्कीवनामवगम्य स्वधिया च काव्यलक्ष्म।

सुजनावगमाय भामहेन ग्रथितं रक्रिलागेमिसूनुनेदम्।।६.६४।।

अनेन केवलमिदं ज्ञायते यदयं ग्रंथो भामहेन विरचित:। स भामहो रक्रिलगोमिन: पुत्र आसीत्। अर्थात् भामहस्य पितुर्नाम रक्रिलगोमी अस्ति। अन्यत्किमपि तस्य जन्मस्थानविषये, निवासविषये, कुटुम्बविषये न ज्ञायते। भामहस्य धर्मविषये किन्चिदूह्यं वर्तते। काव्यालङ्.कारस्य प्रथमं मंगलश्लोकं वीक्ष्य केचन विद्वांस: 'भामहो बौद्धमतानुयायी आसीदिति' निश्चेतुं यतन्ते। तं श्लोकं पश्यामस्तावत्-

प्रणम्य सार्वसर्वज्ञं मनोवाक्कायकर्मभि:।

काव्यालंकार इत्येष यथाबुद्धि विधास्यते।।

इत्यत्र सार्वसर्वज्ञ: काव्यालंकारकारेण नमस्कृत:। 'सर्वज्ञ: सुगतो बुद्ध:' इत्यमरवचनं परिलक्ष्य केचन काव्यशास्मीमांका: सुधिय: सर्वज्ञं तं बुद्धं मत्वा 'यो बुद्धं प्रणमति स बौद्ध' इति निष्कर्षमाकृष्य, 'भामहो बौद्ध' इति स्थापितवन्त:। नेदं साधु अविचारितमतमिदमसमीचीनं स्वीकृतिसरणिं नारोहति। तत्रैवामरकोशे 'कृशानुरेता: सर्वज्ञो धूर्जटिर्नीललोहित:' इत्यपि पठित:। अत्रापि 'सर्वज्ञ: शिवस्यार्थे गृहीत:। अत्र 'सर्वज्ञ' इति शब्दं शिवस्यार्थे न गृहीत्वा बुद्धस्यार्थे ग्रहीतुं को विशेष:। मंगलपद्ये न केवलं सर्वज्ञमपितु 'सार्वसर्वज्ञं' पठितम्। सार्वमिति विशेषणपदं यस्यार्थ: 'सर्वहितकर:' इति। इदं पदं यथा बुद्धेन संगच्छते तथैव शिवेन। अतोऽनया युक्त्या 'भामहो बौद्ध:' इति निश्चेतुमसंगतम्। एतद्विरुद्धं काव्यालङ्.कारे नैकानि स्थलानि सन्ति यत्र वैदिकधर्मे देवेषु चास्था प्रकटिता। यथा-

उदात्तशक्तिमान् रामो गुरुवाक्यानुरोधक:।

विहायोपनतं राज्यं यथा वनमुपागमत्।। (३.११)

युगादौ भगवान् ब्रह्मा विनिर्मित्सुरिव प्रजा: (२.५५)

पातां व: शम्भुशर्वाण्याविति प्राहुर्विसन्ध्यद:। (४.२७)

रथाङ्.गशूले बिभ्राणौ पातां व: शम्भुशार्गिणौ। (४.२१)

अत एभिरन्त:साक्ष्यै: स वैदिकधर्मावलम्बी शैव एव प्रतीयते न तु बौद्ध:। अपि भवेन्नाम सार्वसर्वज्ञ: तस्य भामहस्य विद्यागुरु: ? गुरोर्महिमा न भवति कस्मादपि देवान्न्यून:। सर्वानपि श्रद्धेयानतिरिच्य गुरु: परमश्रद्धेय: पूज्य: प्रणम्यश्च मत:। भामहस्तमेव सार्वसर्वज्ञं स्वकं गुरुं मनोवाक्कायकर्मभि: प्रणमति। इदं हि समाधानं निरापदं कल्पनीयम्। एवं बौद्धादिधर्मविवादेनालम्।

आचार्यभामहस्य स्थितिकाल:-

यथा भामहस्य परिचयोऽविदितस्तथैव तस्य स्थितिकालोऽप्यनिर्णीत:। क्वचिदपि स्पष्टोल्लेखनस्याभावे, स कदाऽभूदिति निश्चयपूर्वकं वक्तुं न शक्यते। कैश्चित्साक्ष्यैरनुमानबलेन तस्य सम्भावित: स्थितिकालोऽनुमातुं शक्यते। काव्यालड्.कारस्य पंचमे परिच्छेदे न्यायनिर्णयनिरूपणप्रसंगे 'प्रत्यक्षं कल्पनापोढम्' इत्याचार्यदिड्.नागकृतं प्रत्यक्षप्रमाणलक्षणमद्धृतम्। दिड्नागस्य स्थितिकाल: 500 ख्रिष्टाब्द इति प्रायेण स्वीक्रियते। आचार्यदिड्.नागस्य व्याख्याकारो धर्मकीर्तिरिदं दिड्.नागकृतं प्रत्यक्षलक्षणं परिवर्ध्य संशोध्य च कल्पनापोढमभ्रान्तं प्रत्यक्षं निर्विकल्पमिति कृतवान्। किंतु भामहेनोद्धृते लक्षणेऽभ्रान्तमिति पदं नास्ति। अतो भामहस्य स्थितिकालो धर्मकीर्ते: प्रागेव स्यात्। धर्मकीर्ति: प्राय: 620 ख्रिष्टाब्दकाले आसीत्। इत्थं भामहो दिड्.नागधर्मकीत्र्योर्मध्ये (500-620 ख्रिष्टाब्दे) स्थितोऽभवत्। भामहस्य कालनिर्धारणे इदं पुष्टं प्रमाणम्।

भामहेन सह भासकालिदासन्यासकारदण्डिप्रभृतीनामाचार्यकवीनां पौर्वापर्यविषयका बहवो वादा: स्थितिकालप्रसंगे सन्ति। ते नात्रालोच्यन्ते विस्तरभिया। अत: पर्याप्तमिदं वक्तुं यद् भामह: षष्ठशततमे ख्रिष्टाब्दे वर्तमान आसीत्।

4.0 आचार्यभामहस्य कर्तृत्वम्-

'काव्यालड्.कार' इत्येकैव कृतिर्भामहस्य सम्प्रति समुपलब्धा, नान्या काचित्। किंतु साहित्यग्रंथेषु तट्टीकासु चाचार्यभामहो बहुधा समुद्धृत:। अभिज्ञानशाकुंतलस्य स्वोपज्ञटीकायां राघवभट्ट: छंदोविषयकमेकमुद्धरणं भामहोक्तमित प्रस्तौति-

'क्षेमं सर्वगुरुर्दत्ते मगणो भूमिदैवत:' इति भामहोक्ते:। अनेन प्रतीयते यद् भामह: छंदोनिरूपकं कमपि ग्रंथं विरतिचवानिति। एवमेव तट्टीकायामन्यत्रापि राघवभट्टो भामहं स्मरति-तल्लक्षणमुक्तं भामहेन-

'पर्यायोक्तं प्रकारेण यदन्येनाभिधीयते।

वाच्यवाचकशक्तिभ्यां शून्येनावगमात्मना।'

उदाहृतं च हयग्रीववधस्थं पद्यम्-

'यं प्रेक्ष्य चिररूढापि निवासप्रीतिरुज्झिता।

मदेनैरावणमुखे मानेन हृदये हरेः।'

राघवभट्टः पर्यायोक्तालङ्.कारस्य यल्लक्षणमुदाहरणंचात्रोद्धृतवान् तल्लक्षणमुद-ाहरणंच भामहनाम्ना वर्तमानोपलब्धे काव्यालङ्.कारग्रंथे नास्ति। अस्मिन् काव्यालङ्.कारे पर्यायोक्तलक्षणं सोदाहरणमेवमस्ति-

पर्यायोक्तं यदन्येन प्रकारेणाभिधीयते।

उवाच रत्नाहरणे चैद्यं शाङ्.र्गधनुर्यथा।। (३.८)

राघवभट्टो यल्लक्षणमुद्धृतवान् तल्लक्षणं केनचिदन्तरेणोद्धटस्य काव्यालङ्.कारे उपलभ्यते किंतु हयग्रीववधोदाहरणं तत्रापि नास्ति। काव्यप्रकाशे इदमुदाहरणं पर्यायो-क्तस्योलभ्यते। एकेनैव साक्ष्येण भामहकृतोऽन्यः काव्यशास्त्रीयग्रंथो न कल्पनीयः। भवेन्नामराघवभट्टस्यान्तिकं काव्यालङ्.कारस्य काचित्तादृशी पाण्डुलिपिः स्याद्यस्यामिदं पाठान्तरं भवेत्। आचार्यभामहश्छन्दःशास्त्रविषयकं कमपि ग्रंथं विरचितवानिति संभ-ावना दृढं प्रतीयते। पूर्वतो राघवभट्टटीकाया एकं साक्ष्यमुद्धृतम्। एममेव द्वितीयं साक्ष्यं वृत्तरत्नाकरस्य टीकायां नारायणभट्टकृतमुद्धरणमत्र द्रष्टव्यम्। तदुक्तं भामहेन-

'अवर्णात् सम्पत्तिर्भवति मुदिवर्णात् धनशता-

न्युवर्णात् अख्यातिः सरभसमृवर्णाद्धरहितात्।

तथा ह्येचः सौख्यं ङ.-ण-नरहितादक्षरगणात्

पदादौ विन्यस्ताद् भ-र-ब-ह-ल-हाह्यविरहितात्।।'

तदुक्तं भामहेन-

देवतावाचकाः शब्दाः ये च भद्रादिवाचकाः।

ते सर्वे नैव निन्द्याः स्युर्लिपितो गणतोऽपि वा।

कःखो गो घश्च लक्ष्मीं वितरति वियशो ङ.स्तथा चः सुखं छः

प्रीतिं जो मित्रलाभं भयमरणकरौ झणौ टठौ खेद्दुःखे।

ड. शोभां ढो विशोभां भ्रमणमथ च णस्तः सुखं थश्च युद्धं

दो धः सौख्यं मुदं नः सुखभयमरणक्लेशदुःखं पवर्गः।।

यो लक्ष्मीं रश्च दाहं व्यसनमथ लवौ शःसुखं षश्च खेदं

सः सौख्यं हश्च खेदं विलयमपि च लः क्षः समृद्धिं करोति।

संयुक्तं चेह न स्यात् सुखमरणपटुर्वर्णविन्यासयोग:

पद्यादौ गद्यवक्त्रे वचसि च सकले प्राकृतादौ समोऽयम्।।

अतश्छन्द:शास्त्रविषयक: कश्चिद्ग्रंथो भामहेन नूनमेव विरचित आसीत्। भामहट्टनाम्ना वररुचिकृतस्य 'प्राकृतप्रकाशस्य', 'प्राकृतमनोरमा' नाम्नी टीकोपलभ्यते। प्राकृतव्याकरणे महत्त्वपूर्णा खल्वियं टीका। पिशेलप्रभृतय: प्राकृतव्याकरणविद्वांस: काव्यालड्.कारस्य प्राकृतमनोरमायाश्च कर्ता स एक एव भामह इति मन्यन्ते। एवं 'काव्यालड्.कार:', 'प्राकृतमनोरमा' चेमौ द्वावपि ग्रंथौ आचार्यमहकृतौ। तृतीयोऽपि छन्द:शास्त्रविषयको ग्रंथो भामहेन निर्मित: स्यादिति संभावना निषेधसहा न प्रतीयते।

काव्यालड्.कार: -

आचार्यभामहकृत: 'काव्यालड्.कार:' खल्वलड्.कारशास्त्रस्य प्रथमो ग्रंथ:। पश्चाद्वर्तिभिरपि कैश्चिदाचार्यै: स्वोपज्ञग्रंथानां नामकरणं 'काव्यालड्.कार' इति कृतम्। प्रायस्ते ग्रंथा: प्रसिद्धा: समुपलब्धा अपि सन्ति। नामसाम्यतो भ्रान्तिर्न स्यादिति निर्मातृणां नामग्रहणेन तेषामपि ज्ञानम्। भामहकृत: काव्यालड्.कारोऽलड्.कारशास्त्रस्य स्वतंत्रो ग्रंथ:। काव्यालड्.कार: षट्परिच्छेदेषु विभक्तोऽस्ति। ग्रंथस्यान्ते गंथकारो भामह: काव्यालड्.कारस्य रचनायोजनां विषयसंग्रहेण सह निरूपयति-

षष्ट्या शरीरं निर्णीतं शतषष्ट्या त्वलड्.कृति:।

पंचाशता दोषदृष्टि: सप्तत्या न्यायनिर्णय:।।

षष्ट्या शब्दस्य शुद्धि: स्यादित्येवं वस्तु पंचकम्।

उक्तं षड्भि: परिच्छेदै: भामहेन क्रमेण व:।।

अयं काव्यालड्.कारस्य संक्षिप्तो विषयानुक्रम:। काव्यालड्.कारस्य प्रतिपाद्यं व्यवस्थितरूपेणैवं प्रस्तूयते-

| परिच्छेदसंख्या | श्लोकसंख्या | विषय: |
|---|---|---|
| प्रथम: | 60 (59, | काव्यशरीरम्-काव्यप्रयोजनम्, सत्काव्यप्रशंसा कु-कविनिन्दा, काव्यस्वरूपम्, काव्यविभाजनम्, महाकाव्यम्, वैदर्भगौडमार्गौ, काव्यदोषा:। |
| द्वितीय: | 96 (160) | गुणालड्.कारनिरूपणम् |
| तृतीय: | 58 | अलड्.कारविवेचनम् |
| चतुर्थ: | 50(51) | दोषनिरूपणम् |
| पंचम: | 70 (69) | प्रतिज्ञाहीनहेतुहीनदृष्टान्तहीनानां विवेचनम्। अथ च |

न्यायनिर्णयः

षष्ठः 60 (66)

400 (399) शब्दानां शुद्धयद्धिविवेकः। अपाणिनीयप्रयोगानां विवरणम्।

अत्र कोष्ठकेषु प्रदर्शिता संख्या तत्तपरिच्छेदानां श्लोकसंख्या मुद्रिते पुस्तके (आचार्यदेवेन्द्रनाथशर्मसम्पादिते) समुपलभ्यते। एतासां संख्यानां योगोऽस्ति 399 (नवनवत्यधिकं शतत्रयम्)। किंतूपर्युक्ते श्लोके भामहप्रदत्ता संख्या निष्कोष्ठकतया प्रदर्शिता तासां च योगः 400 (शतचतुष्टयम्) वर्तते। भामहेन द्वितीयतृतीययोः परिच्छेदयोः मिलितासंख्याशतषष्टिः (160) समुल्लिखिता वर्तते। परिच्छेगतासु संख्यासु तासां योगे च भिन्नत्वं चिन्त्यमपि चानुसन्धेयम्।

5.0 काव्यालङ्.कारस्य टीका अनुवादाश्च-

एतच्छूयते यत्कश्मीरनरेशस्य राजसभायाः प्रमुख आचार्योभटः काव्यालङ्.कारमधिकृत्यैकं टीकाग्रंथं 'भामहविवरणम्' विरचितवान्। किंतु 'भामहविवरणम्' अद्यावधिपर्यन्तं नोपलब्धम्। अतस्तस्मिन् विषये किमपि वक्तुं न शक्यते। उद्भटप्रणीतः 'काव्यालङ्.कारसारसङ्.ग्रह' इति ग्रंथ उपलभ्यते। अयं ग्रंथः प्रतिहारेन्दुराजेन 'लघु-विवृत्तिरिति' टीकया सनाथीकृतः। अस्यां टीकायां प्रतिहारेन्दुराजेन तद् 'भामहविवरणम्' उल्लिखितम्। तद्यथा - 'विशेषोक्तिक्षणे च भामहविवरणे भट्टूभटेन एकदेशशब्द एवं व्याख्यातो यथेहास्माभिर्निरूपितः।' अपि च ध्वन्यालोकलोचनेऽभिनवगुपत्पादेनानेकत्र भट्टोद्भटविरचितं भामहविवरणमुल्लिखितम्। भामहविवरणमतिरिच्य काव्यालङ्.कारस्यान्या टीका न क्वचिदुल्लिखिता। काव्यालङ्.कारस्य आचार्यदेवेन्द्रनाथशर्मकृतं हिन्दीभाष्यं बिहारराष्ट्रभाषापरिषदा प्रकाशितम् (1962 ख्रि.)। अतः पूर्वमस्य ग्रंथस्य यानि संस्करणनि प्रकाशितानि तेषां विवरणमधोलिखितम्-

1. के.पी.त्रिवेदिना सम्पादितस्य प्रतापरुद्रयशोभूषणस्य परिशिष्टे काव्यालङ्.कारः सर्वप्रथमं मुद्रितः प्रकाशितश्च। (बंबई संस्कृत एंड प्राकृत सीरिज 1909 ख्रि)

2. साङ्.ग्लभाषानुवादः काव्यालङ्.कारः - श्रीनागनाथशास्त्रिसम्पादितः (तंजौर, 1927 ख्रि)

3. काव्यालङ्.कारः - सम्पादकौ श्रीबटुकनाथशर्माश्रीबलदेवोपाध्यायौ (चैखम्बा संस्कृत सीरिज, काशी 1929 ख्रि)

4. काव्यालङ्.कारः - संस्कृतवृत्तिसहितः, वृत्तिकारः श्रीशैलताताचार्यः, (श्रीनि-वासप्रेस, 1934 ख्रि)

5. काव्यालड्.कार: - सम्पादक: श्रीशंकररामशास्त्री (बालमनोरमा प्रेस, मद्रास, 1956 ख्रि)

6.0 (क) काव्यालड्.कारस्य मूल्याड्.कनम्-

'काव्यालड्.कार:' काव्यशास्त्रस्यालड्.कारशास्स्य वा प्रथमो लक्षणग्रंथ:। अत एवैष न तथा व्यवस्थितो यथाऽधुना वयं सम्भावयाम:। भामह एव स प्रथम आचार्यो य: कविकाव्योपयोगितत्वमयानि लक्षणानि निर्मातुं बुद्धिं बबंध। भतरमुनिप्रतिपादितस्यालड्.कारचतुष्टयस्य विशदं विस्तारं कृतवान्। वस्तुत: स एवालड्.कारशास्त्रस्य सूत्रधार आसीत्। काव्येष्वलड्.कारणां प्रतिष्ठा तेनैव कृता। अलड्.कारप्रस्थानस्य प्रवर्तक: स एव। आचार्यभामहप्रणीत: काव्यालड्.कारोऽलड्.कारशास्त्रस्य विकासस्य प्रथमं सोपानम्। काव्यालड्.कारस्य मूल्यांकने आचार्य देवेन्द्रनाथशर्मा तस्य महत्वं प्रतिपादयति-

''भामह: काव्यशास्त्रस्याऽऽद्य आचार्य:। तस्मादेव काव्यशास्त्रस्येतिहास: प्रवर्तते। भामहस्य परवर्तिभिराचार्यै: भट्टोद्भटवामनानंदवर्धनकुंतकाभिनवगुप्त-मम्मटरुय्यकप्रभृतिभि: सादरं भामहस्य मतानि चोद्धृतानि। प्रतापरुद्रयशोभूषणकारो विद्यानाथस्तं प्रणम्य निजं ग्रंथमारभते'' पूर्वेभ्यो भामहादिभ्य: सादरं विहितांजलि:।' (नायकप्रकरणम्, कारिका 2) इति। भामहं प्रति तस्मिन्नादरप्रदर्शने तस्य किमपि वैशिष्ट्यमेव कारणम्। तद्यथा-

1. पूर्ववर्ति समग्रं काव्यशास्त्रीयं वस्तु भामहेनानुशीलितम्। तस्मिन् यद्ग्राह्ममासीत्तद् गृहीतं शेषं परित्यक्तम्। यत् संशोध्यमासीत् तत्संशोधितम्। आचार्यवामनस्य शब्दे स आसीदरोचकी न तु सतृणाभ्यवहारी। स भामह: स्वयमेव प्रोक्तवान् ''गिरामलड्.कारविधि: सविस्तर: स्वयं विनिश्चित्य धिया मयोदित:'' (3.58)।

2. काव्यस्य प्रयोजने स प्रेयसा सह श्रेयसमपि गृहीतवान्। काव्यमपवर्गसाधनमिति प्रथमोद्घोष:। काव्ये औदात्तकल्पनाया इदं प्रथमं प्रमाणम्।

3. भरतमुनिना नाट्यं विनोदजननमिति प्रतिपादितम्। भामह: काव्यमानंदजननमिति प्रतिपादितवान्। विनोदानन्दयोर्महदन्तरम्।

4. काव्यशास्त्रपरम्परायां काव्यस्य प्रेरणापक्षं भामह: सर्वप्रथममिंगितवान्।

5. आचार्येषु प्रथमो भामहो यो काव्यहेतुं निर्दिष्टवान्। एतदुत्तरवर्तिभिराचार्यैराधारूपेण गृहीतोऽयं पक्ष:।

6. भरतमुनिप्रतिपादितान् दशकाव्यगुणान्निकृष्य स केवलं गुणत्रयमोज: प्रसादमाधुर्यमेव स्वीकृतवान्। अयं भामहस्य तत्वग्राहिणीबुद्धे: परिणाम:।

7. देशभेदतो रीतिभेद इत्यपि मतं भामह: परित्यक्तवान्। कविस्वभाव एव रीतेराधार इति भामहस्य स्वोपज्ञं चिन्तनम्।

8. काव्यस्य निष्पादकं तत्वं वक्रोक्तिरिति भामहस्य मान्यताया:। काव्यशास्त्रे दूरगामीप्रभावोऽभूत्। एवमतुलनीया खलु भामहस्य काव्यशास्त्रीया प्रतिभा। आचार्य अमरनाथपाण्डेयोऽपि भामहस्य विशदं मूल्यांकनं कृतवान्। स तस्य वैशिष्ट्यं प्रकाशयन्नाह - ''भामहस्य प्रारम्भिकै: श्लोकै: स्पष्टमेव प्रतीयते यत्स कवीनुद्दिश्य काव्यालङ्.कारं निर्माति। काव्यालङ्.कारमाध्यमेन कविनिर्माणमेवास्य प्रथमं प्रयोजनम्। अन्येभ्य: पाठकेभ्य: काव्यतत्वनिरूपणं तु गौणम्। यादृशी विचारणाशक्तिर्भामहे तादृश्येव स-र्जनाशक्तिरपि। द्वयोरपि समन्वयस्तस्मै रोचते। काव्यनिर्माणसमर्थं वाग्वैदग्धं तस्याभीष्टम्। विदग्ध: पण्डितश्च कविस्तस्य मान्य:। एतद्द्□यमेव काव्यालङ्.कारनिर्माणमूलम्। कवित्वं पाण्डित्यं चार्थात्प्रतिभा व्युत्पत्तिश्चेत्ययोर्नैकमप्युपेक्षणीयम्। एतदेव भामहस्य मूलं चिन्तनम्। काव्यालङ्.कार: स सन्मार्गो यमारुह्य कश्चिद् विद्वान् कविर्भवेत् सत्काव्यस्य च निर्माणं कुर्यादिति।''

6.0 (ख) परवर्तिष्वालङ्.कारिकेषु भामहस्य प्रभाव:-

भामहस्य परवर्तिन: प्रायेण सर्वे आलङ्.कारकिास्तस्माद् भृशं प्रमाविता दृश्यन्ते। काव्यशरीरस्य विषये भामहस्य 'शब्दार्थौ सहितौ काव्यम्' इति मान्यतां वामन-दण्डी-रुद्रट-मम्मट-वाग्भट्-हेमचन्द्र-विद्यानाथ-विद्याधरप्रभृतयो नैके आचार्या स्वीकृतवन्त:। प्रकारान्तरेणेदमाधारसूत्रं विश्वनाथो जगन्नाथोऽपि गृह्णाति। भट्टिकाव्यमिति शास्त्रकाव्ये काव्यालङ्.कारस्य प्रभावो दृश्यते। तत्रैक: श्लोक:-

'व्याख्यागम्यमिदं काव्यमुत्सव: सुधियामलम्।

हता दुर्मेधसश्चास्मिन् विद्वत्प्रियतया मया।। (२२.३४)

अस्मिन् श्लोके काव्यालङ्.कारश्लोकस्यास्य छाया स्पष्टमेव प्रतिभाति-

काव्यान्यपि यदीमानि व्याख्यागम्यानि शास्त्रवत्।

उत्सव: सुधियामेव हन्त दुर्मेधसो हता:।। (२.२०)

भट्टिकाव्ये प्रसन्नकाण्डस्य दशमे सर्गे ये काव्यालङ्.कारा: प्रयुक्तास्ते भामहनिरू-पतानामलङ्.काराणां लक्षणमनुहरन्ति। भामहकृतकाव्यालङ्.कारस्य प्रभावो दण्डिकृत काव्यादर्शे पर्याप्तरूपेण परिलक्ष्यते। काश्चिदुक्तयस्तु शब्दश: समानरूपा: सन्ति। ताश्च सन्ति-

1. सर्गबंधो महाकाव्यम् काव्यालङ्.कार: 1.19, काव्यादर्श: 1.14

2. मन्त्रिदूतप्रयाणाजिनायकाभ्युदयैरपि काव्यालङ्.कार: 1.20, काव्यादर्श: 1.17

3. 'कन्याहरणसङ्.ग्रामविप्रलम्भेदयादय:' काव्यालङ्.कार: 1.27, काव्यादर्श: 1.29

4. 'तद्भाविकमिति प्राहु: प्रबंधविषयं गुणम्' काव्यालङ्.कार: 3.53, काव्यादर्श: 2.364

5. 'अपार्थं व्यर्थमेकार्थं......विरोधि च' काव्यालङ्.कार: 4.1.2, काव्यादर्श: 1.125.26

6. 'समुदायार्थशून्यं यत्तदपार्थकमिष्यते' काव्यालङ्.कार: 4.8, काव्यादर्श: 3.128

7. 'आक्षेपोऽर्थान्तरन्यासो व्यतिरेको विभावना' काव्यालङ्.कार: 2.66, काव्यादर्श: 2.244

8. 'प्रेयो रसवदूर्जस्वि पर्यायोक्तं समाहितम्' काव्यालङ्.कार: 3.1, काव्यादर्श: 2.5

द्वयो: ग्रंथयोरन्यान्यपि स्थलानि सन्ति समानानि। अन्येषु केषुचिन्नाममात्रं भेद:। क्वचिच्च काव्यादर्शे भामहस्य मतानि समालोचितानि। एवं संक्षेपत: भामहस्य प्रभावो निरूपित:।

7.0 विषयसंग्रह:-

अस्मिन् पाठ्यांशे प्रथममलङ्.कारस्येतिहासो निरूपितस्ततश्च आचार्यभामहस्य कमपि परिचयमाविष्कर्तुं प्रयत्न: कृत:। अन्तर्बहि: साक्ष्यप्रमाणाभ्यां तस्य स्थिति-कालोऽपि निर्धारित:। आचार्यभामहस्य कर्तृत्वं विचारपथं नीत्वा काव्यालङ्.कारस्य कलेवरं विमृष्टम्। काव्यालङ्.कारस्य टीकाविषये यत्प्रमाणानि प्राप्तानि तान्यत्र प्रस्तुतानि। ततश्चाधुनिके कालेऽस्य ग्रंथस्य संस्करणैस्सहास्यानुवादविषये सूचना प्रदत्ता। काव्यशास्त्रविदां विदुषामभिमतमुद्धृत्य काव्यालङ्.कारस्य मूल्यांकनं कृतम् (महत्वं प्रतिपादितम्)। अन्ते च, परवर्तिष्वालङ्.कारिकेषु भामहस्य प्रभाव: संक्षेपतो प्रदर्शित:।

१.0 प्रस्तावना

साहित्यशास्त्रस्य विकासयात्रायां कालक्रमेण षट्सिद्धांता: प्रादुर्भूता:। काव्य-शास्त्रस्य रचनात्मके काले एते सिद्धांता आविर्भूता:। भरतमनु काव्यशास्त्रस्येतिहासे अनेकैराचार्यैरनुसंधानं विहितं यत् काव्येषु किन्चिदीदृशं तत्वं मूलभूतं विद्यते, यत्प्रति सहृदयजना आकर्षणमनुभवन्ति काव्यानंदन्च आस्वादयन्ति। येनाऽऽचार्येण यत्काव्यांगं

पति तथाभूतमाकर्षणमनुभूतं तेन तदेव काव्यांगं काव्यस्याऽत्मरूपेण प्रतिष्ठापितम्। तत्र केचन आचार्याः काव्येषु प्रमुखं तत्वं रसमनुभूतवन्तः। काव्यरचनायाः प्रमुखमुद्देश्यं रसनिष्पादनमेव वर्तते। रसमास्वाद्यैव सहृदयजना आह्लादमनुभवन्ति, अतो रस एव काव्यस्यात्मा। अन्ये आचार्याः मुख्यतमं सहृदयहृदशकर्षकमाह्लादजननं तत्वमलंकारं प्रतिपादितवन्तः। शब्दार्थशरीरं तावत्काव्यं, शब्दार्थालंकरणसमर्था अलंकारा एव काव्यस्यात्मेति तेषामभिप्रायः। अपरे मनीषिणः प्राहुः 7 पदसंघटनैव काव्यसौन्दर्यहेतुः। पदसंघटना रीतिः, अतो रीतिरेव काव्यस्यात्मा। परे जगदुः काव्येषु वैचित्र्यमेव सहृदयहृदयानामाह्लादकत्वस्य हेतुः। वैचित्र्यसंयुक्तोक्तिरेव वक्रोक्तिः। अथ च वैदग्ध्यभंगीभणितिः वक्रोक्तिः। सा वक्रोक्तिरेव काव्यजीवितम्। केचन आचार्या औचित्यमेव काव्यस्याऽऽत्मानं जगदुः। काव्येषु औचित्यमेव परमं रहस्यं सहृदयहृदयाह्लादकरं तत्वम्। अथ चाऽन्ये मीषिणो जगदुः - काव्येषु सौन्दर्यं व्यंग्यार्थेनैव सम्भवति। व्यंग्यार्थप्रधानं काव्यं ध्वनिरित्यभिधीयते। स ध्वनिरेव काव्यस्याऽऽत्मा। इत्थं षट्सिद्धांताः कालक्रमेण यथा- रसाऽलंकाररीति-ध्वनि-वक्रोक्त्यौचित्यसिद्धांताः स्थापिताः।

आभरतात् पंडितराजजगन्नाथविश्वेश्वरपर्यन्तं सर्वे एव काव्यशास्त्रकारा एतेषु षट्सिद्धांतेषु कंचिदेकं पक्षं परिपोष्य प्रमाणगर्भितयुक्तिभिस्तं समर्थितवन्तः। तेषु आचार्येषु 'रीतिरात्मा काव्यस्य' इत्यस्य प्रतिपादको वामनो महत्वपूर्णोऽस्ति। अतो रीतिसिद्धांतस्य प्रवर्तको आचार्यवामन एव।

अतः पाठेऽस्मिन् रीतिसिद्धांतस्य निरूपणं क्रियते।

२.0 रीतिसिद्धान्तस्य प्रारंभः-

रीतिरात्मा काव्यस्येति मतं सर्वप्रथमं वामनाचार्येण अष्टमाशताब्द्यां प्रतिष्ठापितम्। अस्मात् सिद्धांतात् पूर्वं दृश्यकाव्यनिरूपणप्रसंगे रससिद्धांतः श्रव्यकाव्यनिरूपणप्रसंगे च अलंकारसिद्धांत एव प्रतिष्ठतौ आस्ताम्। तत्पश्चात् वामनाचार्यस्याविर्भावो जायते। तेन विरचितो ग्रंथोऽस्ति काव्यालंकारसूत्राणि। तत्र ग्रंथेऽस्मिन् पंचाधिकरणानि सन्ति। तत्र प्रथमाधिकरणस्य नाम वर्तते शारीरम्, यत्र त्रयोऽयायाः सन्ति। दोषदर्शनं नाम्नि द्वितीयाधिकरणे द्वौ अध्यायौ स्तः। तृतीयाधिकरणे गुणविवेचनेऽपि द्वौ अध्यायौ स्तः। चतुर्थाधिकरणस्य नाम वर्तते आलंकारिकं यत्र त्रयोऽध्यायाः सन्ति। पंचमाधिकरणस्य नाम वर्तते प्रायोगिकं यत्र द्वौ अध्यायौ स्तः।

यद्यपि वामनात् पूर्ववर्तिभिराचार्यैरपि रीतिः मार्गो वा वर्णितोऽस्ति। परं काव्ये रीतितत्वस्य आत्मरूपेण प्रतिष्ठा तु वामनेनैव कृता। 'रीतिरात्मा' काव्यस्येति सूत्रेण वामनः सर्वप्रथमं काव्ये रीतेर्महत्वं प्रतिपादितवान्। तत्र रीतिगुणयोः परस्परं नित्यसंबंधमपि निरूपितवान्। यथा च तेनोक्तम् - 'रीतिरात्मा काव्यस्य।'' किं पुनरियं रीतिरित्याह

- विशिष्टा पदरचना रीतिः। कोऽसौ विशेष इत्यत आह - विशेषो गुणात्मा। अनेन एव साहित्यशास्त्रे रीतिसिद्धांतस्य प्रवर्तनं जातम्।

३.0 रीतिशब्दस्योत्पत्तिः-

साहित्ये रीतिपदप्रयोगोऽतिप्राचीना। रीतिपदस्य निर्वचनं रीङ्. गतौ धातोः निष्पद्यते। यस्यार्थो गमनं मार्गो गतिर्वा, इत्यर्थे प्रयुज्यते। यथा चोक्तं भोजराजेन सरस्वतीकण्ठाभरणे-

वैदर्भादिकृतः पंथाः काव्ये मार्ग इति स्मृतः।

रीङ्. गतावििति धातोः सा व्युत्पत्त्या रीतिरुच्यते।।

एवं रीतिपदं साहित्ये विभिन्नमार्गान् सूचयति। ऋग्वेदे रीतिपदप्रयोगोऽनेकशो बभूव। तत्र तस्यार्थः - गमनं मार्गो वा वर्तते। यथा - 'महीव रीतिः शवसा सरत् पृथक्। 'वातेवाजुर्या नद्येव रीतिः।' 'तामस्य रीतिं परशोरिव' इत्यादिषु स्थलेषु रीतिपदप्रयोगो गतिर्वा, धारा वा मार्गो वेत्याद्यर्थेषु समभूत। वैदिकसाहित्येऽन्येष्वपि स्थानेषु रीतिपदप्रयोग एतेष्वर्थेष्ववलोक्यते।

वर्तमानसमये समुपलभ्यमानेषु काव्यशास्त्रग्रंथेषु वामनकृतकाव्यालङ्.कारसूत्रगंथ एव प्रथमा कृतिर्यत्र काव्यगतरीतीनां विशदा सुस्पष्टा व्याख्या वर्तते। वामनात् पूर्वं भामहेन दण्डिना चैषा संकेतिता। परं तत्र रीतिपदप्रयोगो नोपलभ्यते। दण्डिनाऽत्र मार्गपदप्रयोगः कृतः। ताभ्यां पूर्वमपि मुनिना भरतेन प्रवृत्तिपदप्रयोगोऽनेनैवाऽभिप्रायेण कृत आसीत्। राजशेखरेण काव्यमीमांसायां लिखितम् - 'पूर्वं सुवर्णनाभाभिधानो हि आचार्यो बभूव, यो रीतिविषयकं ग्रंथं लिलेख।' परंतु वर्तमानसमये नाऽयं ग्रंथ उपलभ्यते।

पदसंघटनायै प्रथमं भरतेन प्रवृत्तिपदस्य प्रयोगो विहितः। इयं प्रवृत्तिर्विभिन्नप्रदेशैर्भूभागैर्वा सम्बद्धा आसीत्। भरत एव प्रथमं काव्यगतगुणान् व्याख्यातवान्। गुणान् आश्रित्योत्तरवर्तिभिराचार्यैः रीतीनां विशालप्रासादस्य रचना कृता।

४.0 रीतिरात्मा काव्यस्य-

रीतिं काव्यस्यात्मानं स्वीकुर्वाणो वामनाचार्यो रीतेः स्वरूपमित्थं निरूपयति-'विशिष्टा पदरचना रीतिः' विशेषो गुणात्मा।' इति। अर्थात् विशेषवतीपदानां रचना रीतिः। कोऽयं विशेष इत्यस्मिन् विषये सः कथयति ओजः प्रसादादिगुणस्वभाव एव विशेषः। गुणस्वरूपं स इत्थं निरूपयति-

'काव्यशोभायाः कत्रारो धर्मा गुणाः।। इत्थमात्मभूतरीतिनिष्ठा गुणाः काव्यशोभायाः कारकाः भवन्ति। वामनाचार्यस्याभिप्रायो वर्तते यत् काव्ये अलंकारेभ्योऽपि

किन्चिद् सूक्ष्मतरं तत्वं विद्यते, यद्विना काव्यरचना न तथा चमत्कारकारिणी सफला च भवति। तेनोद्घोषितम् - रीतिरेव तत्तत्वं वर्तते। रीतिरेव काव्यस्यात्मा, रीतिरेव सर्वप्रधानतत्वं विद्यते येन काव्येषु सौन्दर्यं चारुत्वंच आगच्छति। काव्यशरीरं ध्रुवं शब्दार्थनिर्मितं वर्तते, तयोश्च सौन्दर्यं तत्र चमत्कृतिमादधाति। परं यावत् पदसंघटनाया पदसन्निवेशे च औचित्यं न प्रतिष्ठते, तावत् काव्ये काव्यत्वं न प्रवर्तते। पदानामियं संघटनैव रीतिवर्तते। पदानां गुम्फनं, पदशय्या वा विशिष्टा भवति तदा एव रचना रमणीया भवति। रचनासु पदसंघटनायाः पदानां सन्निवेशस्य विशिष्टं महत्वं भवति, तेन काव्येषु चारुता वर्धते। अथ चेयं पदसंघटना गुणविशिष्टाऽपि भवितव्या, अतो वामनेनोक्तम् - विशिष्टा पदसंघटना रीतिः। विशेषो गुणात्मा।' वैशिष्ट्यमत्र गुणयुक्तत्वम् एव। एवंच वामनो रीतिं काव्यस्याऽऽत्मानं प्रतिपादितवान्, गुणांश्च रीतेरात्मानम् इति।

अनेन ज्ञायते यद् रीतयो गुणैः निष्पद्यन्ते। वामनो विंशतिगुणानां निर्वचनं कृतवान्। वामनात्पूर्वं भरतेन दशगुणाः व्याख्याताः। परं भामहेन त्रयो गुणाः निष्पादिताः, माधुर्यौजः प्रसादाश्च, दण्डिना भरतप्रतिपादिताः दशगुणाः स्वीकृताः। वामनेन भरतोक्ता एते गुणस्तु स्वीकृताः, परं तान् गुणान् द्विधा विभज्य तेषां संख्या विंशतिः प्रतिपादिताः दशशब्दगुणाः दशचाऽर्थगुणाः।

वामनेन गुणानां संबंधः साक्षाद्रूपेण रीतिभिः सह संस्थापितः। तेन तिस्रो रीतयः प्रतिपादिताः - 1. वैदर्भी 2. गौड़ी 3. पांचाली च। तिसृष्वेतासु रीतीषु वैदर्भीरीतिः समस्तगुणगुम्फिता भवति, गौडीरीतिर्विशेषत औजःकान्तिगुणसम्पन्ना भवति, पांचाली-रीतिश्च विशेषेण माधुर्यसुकुमारगुणाभ्यां युता वर्तते। वामनात्पूर्वं रीतीनां मार्गाणां वा भौगोलिकवैशिष्ट्यमपि काव्यशास्त्रकृद्भिः सम्पादितम्। तेषामेतत् प्रतिपादनं स्वीकृत्याऽपि रीतीः भौगोलिकसंबंधेभ्यो विच्छिद्य वामनास्ताः कविव्यवहाररूपेण प्रत्यापादयत्। यथा-

विदर्भादिषु दृष्टत्वात् तत्समाख्या। विदर्भगौडपांचालेषु देशेषु तत्रस्थैः कविभिर्यथ-ाास्वरूपमुपलब्धत्वात् देशसमाख्या न पुनर्देशैः किन्चिदुपक्रियते काव्यानाम्।

वामनस्य रीतिलक्षणमुत्तरवर्तिभिराचार्यैः प्रायशः स्वीकृतम्। गुणैः सह रीतीनां संबंधोऽपि तैः स्वीकृतः। रुद्रटेन समासैः सह संबंधोऽपि तासां स्वीकृतः। अथ च ध्वनि-वादिन आचार्याः वर्णविन्यासमपि रीतिलक्षणे नियोजितवन्तः।

५.0 वामनप्रतिपादिताः रीतयः-

रीतिं काव्स्यात्मानं प्रतिपाद्य, तस्याः गुणैः सह संबंधं निरुप्य, वामनाचार्यो रीतिभेदं प्रतिपादितवान्। वामनमते रीतिः त्रिधा भवति, यथा हि-वैदर्भी गौडीया पांचाली चेति। यथा च तेनोक्तम् - 'सा त्रेधा वैदर्भी गौडीया पांचाली चेति।''

अर्थात् या रीतिः काव्यस्यात्मतत्वरूपे स्वीकृता वामनाचार्येण सा त्रिविधा भवति। तत्र सकलगुणसन्निवेशात् समग्रगुणोपेत्तत्वात् वैदर्भ्याः रीत्याः प्रथमं निर्देश इति। अनन्तरयोरुभयोः स्तोकगुणत्वेऽपि प्रशस्तगुणसंस्कृतत्वाद् अनन्तरं गौडीयायाः, अवशिष्टाया अन्ते निवेश इति।

५.१ वैदर्भीरीतिः-

तत्र त्रिविधासु रीतिषु वैदर्भी रीतिः सर्वप्रथमा विशिष्ट चेति। तत्र वैदर्भीरीत्याः लक्षणमित्थं कृतं वामनाचार्येण - समग्रगुणा वैदर्भी।

अर्थात् ये दशशब्दगुणाः दशार्थगुणाश्च स्वीकृताः वामनाचार्येण। यथा हि-ओजःप्रसादश्लेषसमतासमाधिमाधुर्यसौकुमार्योदारताऽर्थव्यक्तिकान्तयो ये बंधुगुणाः भवन्ति। तैः सर्वैः ओजःप्रसादप्रभृतिगुणैरुपेता संयुक्ता वैदर्भी नाम रीतिर्भवति। अस्यां रीतौ सर्वे विंशतिगुणा अंतर्भूताः भवन्ति। अस्यां रीतौ दोषराहित्यं श्रवणमाधुर्यंच विशिष्टरूपेण प्राप्येते। यथा चोक्तं वामनेन-

अस्पृष्टा दोषमात्राभिः समग्रगुणगुम्फिता।

विपंचीस्वरसौभाग्या वैदर्भी रीतिरिष्यते।।

अस्याः वैदर्भीरीत्याः प्रशंसा कविभिरित्थं क्रियते-

सति वक्तरि सत्यर्थे सति शब्दानुशासने।

अस्ति तनन विना येन परिस्रवति वाङ्.मधुः।।

अर्थात् अस्याश्च वर्णनीयरसचमत्कारकारितया समग्रसौन्दर्यशालितया च कविकुलोपलालनीयतामाकलयति। वक्तरि शब्दे चाऽर्थे च साधौ सत्यपि येन विना वाङ्. मधु वाचां मधु न परिस्रवति न स्पंदते तद् वैदर्भीनामकं वस्त्वस्तीति योजना। इह मधुशब्देन मुख्यार्थासम्भवात् सहृदयहृदयैरास्वाद्यः समग्रसौन्दर्यसमुन्मिषितो रसो लक्ष्यते। वैदर्भीरीतेः उदाहरणं यथा-

गाहन्तां महिषा निपानसलिलं शृंगैर्मुहुस्ताडितं

छायाबद्धकदम्बकं मृगकुलं रोमन्थमभ्यस्यतु।

विस्रब्धं कुरुतां वराहविततिर्मुस्ताक्षतिं पल्वले

विश्रान्तिं लभतामिदं च शिथिलज्याबंधमस्मद्धनुः।।

'वैदर्भीरीतिसंदर्भे कालिदासः प्रगल्भते' इति कालिदासस्यैव पद्यं वामनेनादाहृतम्। शकुन्तलाविलोकनात् प्रेमाबद्धहृदयस्य मृगयाविहारविद्विषतो (विरक्तो)

दुष्यंतस्योक्तिरियम्। पद्येऽस्मिन् ओज:प्रसादादयो गुणा: परां प्रतिष्ठां लभन्ते। तथाहि - 'छायाबद्धकदम्बकं', 'शिथिलज्याबंधम्6 इत्यत्र बंधस्य गाढत्वादोज:। 'छायाबद्धकदम्बकं मृगकुलम्' इत्यत्र बंधस्य गाढत्वशैथिल्ययो: सम्प्लवात् प्रसाद:। 'महिषानिपानसलिलम्' इत्यत्र मसृणत्वात् श्लेष:। 'गाहन्ताम्' इत्यारभ्य येनैव मार्गेण प्रक्रमस्तेनैव मार्गेणोपसंहार इति मार्गाभेदात् समता। 'गाहन्ताम्' इत्यत्रारोह:, 'महिषा:' इत्यत्रावरोह:। एवमन्यात्रात्यारोहावरोहक्रमस्फुरणात् समाधि:। शृंगैर्मुहुस्ताडितम्' इति पृथक्पदत्वान्माधुर्यम्'। 'रोमन्थमभ्यस्यतु' इत्यादौ बंधस्याऽजरठत्वात् सौकुमार्यम्। 'शिथिलज्यबंधमस्मद्धनु:' इत्यत्र बंधस्य विकटत्वादुदारता। पदानामुज्जवलत्वात् कान्ति:। अर्थाभिव्यक्तिहेतुत्वादर्थव्यक्तिरिति। एवमन्येषामपि गुणानामत्र सद्भावो वर्तते। न केवलं शब्दगुणानामर्थगुणानामप्यवस्थितिरत्र वर्तते।

यथा हि उक्तं वामनाचार्येण - 'तस्यामर्थगुणसम्पदास्वाद्या' तस्यां वैदर्भ्यां न केवलं शब्दगुणा अपितु अर्थगुणसम्पत्तिरपि स्वयमेव आस्वद्या भवति। वैदर्भीरीतेराश्रयादर्थगुणलेशोऽपि आस्वादनीयो भवति। अस्यां नीरसमपि वस्तु सरस्त्वं प्रयाति। उक्तंचापि-

वचसि यमधिगम्य स्यन्दते वाचकश्री

र्वितथमवितथत्वं यत्र वस्तु प्रयाति।

उदयति हि स तादृक्क्वापि वैदर्भरीतौ

सहृदयहृदयानां रंजक: कोऽपि पाक:।।

अर्थात् वैदर्भीरीतौ पदानुपूर्व्यां असदपि वस्तु सदिवावभाति, प्रबंधप्रौढिप्रकटितपदकल्पनापरिपाटीवशात् कल्प्यं वस्तु प्रत्यक्षायमाणं प्रतिभासते इत्यर्थ। यदाहु: - अपारे काव्यसंसारे कविरेक: प्रजापति:। यथाऽस्मै रोचते विश्वं तथेदं परिवर्तते। इति। यस्मिन् वैदर्भीपाके निरसं वस्तु सरस्त्वं प्राप्नोति। तत्र वामनाचार्यस्याभिप्रायोऽस्ति यत् तस्यां वैदर्भ्यां यदि समासवत् पदं न भवति तदा सा शुद्धवैदर्भी भण्यते। यथा - ''साऽपि समासाभावे शुद्धवैदर्भी।'' इयं वैदर्भीरीतिरेव कविभि: ग्राह्या इति वामनस्याभिमतम्। यतो हि इयं वेदर्भीरीतिरुपादेयाऽस्ति गुणानां साकल्यात्। यथा हि उक्तम् - 'तासां पूर्वा ग्राह्या, गुणसाकल्यात्।'

तासां तिसृणां रीतीनां पूर्वा वैदर्भी ग्राह्या विद्यते, उपादेयाऽस्ति गुणानां साकल्यात्, अर्थात् सर्वगुणसम्पृक्त्वात् सा वैदर्भी विशिष्टा भवति। प्रतीयते यत् रीतिषु अपि वैदर्भीरीतिरेव काव्यस्यात्मा इति वामनस्याभिमतं वर्तते।

५.२ गौडीया रीति:-

वैदर्भीरीते: विवेचनादनन्तरं गौडीरीते: वर्णनं क्रियते। यथा - 'ओज:कान्तिमती

गौडीया।' ओज: कान्तिश्च विद्येते यस्यां सा ओज: कान्तिमती, गौडीया नाम रीति:। माधुर्यसौकुमार्ययोरभावात् समासबहुला अत्युल्बणपदा च भवति। प्रतिकूलयो: माधुर्य-सौकुमार्ययोरपवारणम्, अत एव दीर्घसमासत्वमत्युद्भटपदत्वं च सूचितम्। यथा चोक्तं प्राचीनाचार्यै:-

समस्तात्युद्भटपदामोज:कान्तिगुणान्विताम्।

गौडीयामिति गायन्तिं रीतिं रीतिविचक्षणा:।।

अर्थात् गौडीरीतौ समासपदानां बाहुल्येन प्रयोगो भवति। तत्रोद्भटवर्णानां परुषवर्णानां पदानां च प्रयोगो भवति। तत्र बंधस्य गाढत्वमोजोगुण:, बंधस्य उज्ज्वलत्वंच कान्तिर्भवति। अर्थगुणेषु च 'अर्थस्य प्रौढिरोज:' 'दीप्तरसत्वंच च कान्तिर्भवति। अर्थात् यत्र ओज: कान्तिश्च शब्दगुणौ, ओज: कान्तिश्च अर्थगुणौ तिष्ठत: तत्र गौडीयारीति: भवति। यथा चोदाहरणम्-

दोर्दण्डान्चितचन्द्रशेखरधनुर्दण्डावभंगोद्यत-

ष्टंकारध्वनिरार्यबालचरितप्रस्तावनाडिण्डिम:।

द्राक्पर्यस्तकपालसम्पुटमितब्रह्माण्डभाण्डोदर-

भ्राम्यत्पिण्डितचण्डिमा कथमहो नाऽद्यापि विश्राम्यति।।

एषा खलु, धनुर्धरधुनरन्धरेण रघुनन्दनेन गाढाकर्षणात् खण्डिते खण्डपरशो: कोदण्डे तद्भंगसङ्.घटितनिराघातघोषवर्णनोपोद्घातेन तस्यैव भुजबलभूमानमभिलक्षयतो लक्ष्मणस्योक्ति:।

अत्र समासबाहुल्यात् उत्कटपदत्वाच्च गौडीरीतिरस्ति। रघुनन्दनेन सीतास्वयंव-रावसरे गाढाकर्षणात् खंडितस्य भगवत: शिवस्य कोदण्डस्य टंकारध्वनि: ब्रह्माण्डोदरे समन्तात् पर्यटन् चिरातीतेऽपि टंकारे न विरमति। नवीनार्थप्रतिपादनादत्र कान्तिरपि अस्ति। लक्ष्मणस्यास्यामुक्तौ रामविषयकरतिनिरूपणात् रसाभिव्यक्तिरप्यस्त्येव। अर्थगाम्भीर्यं तु स्फुटमेव प्रतीयते। अत्र बंधस्य गाढौज्ज्वल्ययोरुत्कटत्वाद् उल्बणावोज: कान्तिगुणौ विद्येते। समासभूयस्त्वोल्बणपदत्वे चातिस्फुटे विद्येते, अतो गौडीरीतेरुदाहरणमिदं पद्यम्।

५.३ पांचालीरीति:-

गौडीयरीते: विपरीतच्छायोपपन्ना पांचाली रीतिरिष्यते। यथा हि-

'माधुर्यसौकुमार्योपपन्ना पांचाली।''

माधुर्येण सौकुमार्येण च गुणेनोपपन्ना पांचाली नामरीति:। अत्र प्रतिपक्षयोरोज:

कान्त्योरभावो भवति। ओज:कान्त्योरसद्भावे तु गौडीयारीति:। अत्र तु माधुर्यसौकुमार्ययो: गुणयो: योगो भवति। बंधस्य पृथक्पदत्वं माधुर्यं, अजरठत्वम् अर्थात् अपारुष्यं सौकुमार्यम्। इत्थं पांचालीरीतौ बंध: शिथिलो भवति, तत्र उत्कटपदानां, समासाधिक्यपदानां च प्रयोगो न प्राप्यते। संदर्भेऽस्मिन् प्राचीनोक्तिरप्यस्ति-

आश्लिष्टश्लथभावां तां पूरणच्छाययाश्रिताम्।

मधुरां सुकुमारां च पांचालीं कवयो विदु:।।

उदाहरणं यथा-

ग्रामेऽस्मिन् पथिकाय नैव वसति: पान्थाऽधुना दीयते

रात्रवत्रविहारमण्डपतले पान्थ: प्रसुप्तो युवा।

तेनोत्था खलेन गर्जति घने स्मृत्वा प्रियां तत् कृतं

येनाऽद्यापि करंकदंडपतनाशंकी जनस्तिष्ठति।।

कस्यचित् ग्रामीणस्य गृहे निद्रातुम् आगतं पथिकं प्रति कुलवृद्धाया: उक्तिरस्ति यदस्मिन् ग्रामे पथिकाय वासो न प्रदीयते यतो हि एकदात्र केनापि पथिकेन घनगर्जनं श्रुत्वा स्वीकायां प्रियां च स्मृत्वा तद्विरहे प्राणा: परित्यक्ता: अत्र 'प्राणा: परित्क्ता:' इत्यस्य स्थाने ''तत् कृतं येनाद्यापि करंकदंडपतनाशंकी जनस्तिष्ठति' इति यदुक्तं तेनात्र अपारुष्यसमावेशात् सौकुमार्यमागतं पृथक्पदत्वात् माधुर्यं तु अस्त्येव।

वामनमते यद्यपि एतासु तिसृष्वपि रीतिषु काव्यं प्रतिष्ठितं भवति। परं वैदर्भी प्रति वामनाचार्यस्य विशेषाग्रहो वर्तते। यथा हि तेनोक्तम्-

'एतासु तिसृषु रीतिषु रेखास्विव चित्रं काव्यं प्रतिष्ठितमिति।' तत्र - 'तासां पूर्वा ग्राह्या, गुणसाकल्यात्। न पुनरितरे स्तोकगुणत्वात्।''

एतेन प्रतीयते यदत्र वैदर्भीरीतिरेव काव्यात्मरूपेण स्वीकार्या वर्तते। वामन्ाचार्यानन्तरं यद्यपि केनापि रीति: काव्यात्मरूपेण न स्वीकृता परं प्रायश: सर्वैरपि परवर्तिभिराचार्यै: काव्योत्कर्षहेतुरूपेण रीतिमार्ग: संघटना व अंगीकृता।

६.0 रीतीनां संख्या-

संस्कृतकाव्यशास्त्रे रीतीनां संख्याविषयेऽपि मतैक्यं न दृश्यते। वामनात् पूर्ववर्तिनौ भामहदण्डिनौ वैदर्भगौडमार्गयो आविर्भावम् अकुरुताम्। दण्डी यद्यपि कविव्यवहारमेव मार्गं प्रतिपाद्य तस्य अनंतत्वं निरूपितवान् तथापि तेन ते काव्यमार्गा: द्वयोर्वर्गयोर्विभक्ता: - गौडो वैदर्भश्च। वामनेन तिस्रो रीतयो निरूपिता: - वैदर्भी पांचाली गौडी च।

रुद्रटेन वामनोक्तासु तिसृषु रीतिषु वैदर्भीगौडीपांचालीषु एकामन्यां लाटीं संयोज्य संख्या चतस्त्रः कृताः। काव्यशास्त्रे रीतीनां संख्या तिस्रो वा चतस्रो वा भूयिष्ठेन गण्यते। वामनराजशेखरकुन्तकानन्दवर्धनोद्भटमम्मटहेमचन्द्रविद्याधरसिंहभूपालजगन्नाथप्रभृतयः। शास्त्रकाराः तिस्रो रीतीः गणयन्ति। अथ च रुद्रटवाग्भटामृतानन्दजयदेवविश्वनाथादयो मनीषिणः चतस्रो रीतीः स्वीकुर्वन्ति। केचनाऽऽचार्याः रीतयस्ततोऽधिकमामन्ति। यथा भोजराजेन षड्रीतयो वैदर्भी, गौडी, पांचाली, लाटी, मागध्यवन्तिका प्रतिपादिताः।

तत्र सरस्वतीकंठाभरणे एते षड्रीतयः तेन निरूपिताः सन्ति। नरेन्द्रप्रभसूरिः अलंकारमहोदधिग्रंथे द्वादशरीतीः प्रतिपादितवान्। शारदातनयेनापि भावप्रकाशनग्रंथे वैदर्भीगौडीपांचालीलाटीसौराष्ट्रीद्राविडी चेति षड्रीतयो व्याख्यताः। विद्याधरेण तिस्रो रीतयो वैदर्भी गौडी पांली च व्याख्याताः। परं तासां सम्मिश्रणेन तिस्रोऽप्यन्याः मागधी लाटीया आवन्तिका चाऽपि तेनाऽऽविष्कृताः।

इत्थं रीतिसंख्याविषये यद्यपि विविधानि मतानि काव्यशास्त्रे प्राप्यन्ते तथापि वामनप्रतिपादिताः तिस्रो रीतय एव प्रायशः सर्वैराचार्यैरंगीकृताः। अत एव वैदर्भी गौडी पांचाली चेति तिस्रो रीतयः समादृताः काव्यशास्त्रे।

७.0 रीतीनां नियामकतत्वानि-

रीतिसिद्धांतप्रतिष्ठापको वामनो रीतिनियामकतत्वानि न निर्देशितवान्। परं ध्वनि-संस्थापकेन आनंदवर्धनेन पदसंघटनारूपाणां रीतीनां नियमनाय चत्वारि नियामकतत्वानि निर्दिष्टानि-रसवक्तृवाच्यविषयौचित्यानि। अत्र रचनासु रीतीनां नियमनं रसाधारेण, वक्तृ-आधारेण, वाच्याधारेण विषयाधारेण च भवेदिति। ध्वन्यालोकस्य तृतीयोद्योते तत्वानामेतेषां विस्तरेण व्याख्या वर्तते। मम्मटेनापि संघटनादयो गुणपरतन्त्रा इति प्रति-पादयन्नपि वक्तृवाच्यप्रबंधौचित्येन संघटनां नियन्तुं निर्देशितम्।

८.0 रीतीनां काव्यान्यतत्वैः सह संबंधः -

पदसंघटनारूपाया रीत्याः रसालंकारवृत्तिप्रवृत्तिशैलीभिः सह साक्षात् संबंधो वर्तते।

८.१ रीतयो रसश्च-

रीतयः काव्येषु महनीयतमं स्थानं भजन्त इति वामनाचार्यस्य मतम्। ताः काव्येष्वात्मस्थानीया वर्तन्ते। गुणास्तु रीतीनामुपादनकारणानि। तत्र कान्तिगुणे वामनेन रसानां समावेशः प्रतिपादितः। एवं रसाः काव्येषु रीतीनाअंगरूपेणाऽवतिष्ठन्ते न च तेषामवस्थितिरंगिरूपेणेति वामनस्याभिमतम्। एवं वामनः काव्येषु रसान् रीतीनाअंगत्वेन प्रतिपाद्य तेषामवस्थितिं हीनां व्यवस्थापितवान्। तन्न समीचीनम्। तत्रैव ध्वनिवादिभिराचार्यैः ध्वनि विशेषतो रसध्वनिः काव्यस्याऽऽत्मरूपेण व्यवस्थापितः। अंगिरूपेण रसास्तिष्ठन्ति

रीतयश्चाऽगरूपेणाऽवतिष्ठन्ते। इत्येव साधुः।

८.२ रीतयोऽलंकाराश्च-

वामनो रीतिनिर्धारणे गुणानामनिवार्यत्वं साधितवान्। गुणाः काव्यशोभायाः कर्त्तारोऽअलंकाराश्च काव्यशोभाया अतिशयहेतव इति प्रतिपाद्य वामनः काव्येषु गुणविशिष्टां रीतिमंगित्वेनाऽलंकारांश्चाऽगत्वेन न्यरूपयत्। यथा दण्डिना प्रोक्ता अलंकाराः काव्यशोभां सम्पादयन्ति, तथैव वामनोक्ताः गुणाः काव्यशोभाधायकाः भवन्ति।

एवं वामनेन अलंकाराणामपेक्षातो गुणानां गौरवं काव्ये प्रतिपादितम्। अलंकारास्तु गुणानामुत्कर्षका अंगत्वमेवाऽऽवहन्ति। अनेन वामनस्य धारणेयं संलक्ष्यते-काव्यस्याऽऽत्मरूपरीतिरन्तस्तत्वं वर्तते, शोभोत्कर्षकराश्चाऽलंकारा बाह्यतत्वानि सन्ति। काव्यस्याऽऽत्मरूपायाः रीतेलंकारा अंगत्वेनाऽवतिष्ठन्ते।

८.३ रीतयो वृत्तयश्च - रीतीनां वृत्तीनांचऽपि पारस्परिकसंबंधोऽत्र विचारणीयः। प्रसंगेऽस्मिन् प्रथमं वृत्तीनां स्वरूपमवधेयम्। काव्येषु द्विविधा वृत्तयः प्रकीर्तिताः - अर्थवृत्तयः शब्दवृत्तयश्च। नाट्यशास्त्रे भरतेन काव्यमातृकारूपिण्यश्चतुर्विधा वृत्तयः प्रोक्ताः-कैशिकी सात्त्वती आरभटी भारती च। आचार्यैरेताः वृत्तयोऽर्थवृत्तयः प्रोक्ताः। काव्येषु शब्दवृत्तयोऽपि भवन्ति, यासां संबंधः पदानां संघटनया भवति। शब्दवृत्तयः तिस्रो वर्तन्ते - उपनागरिका, परुषा कोमला च। रसौचित्येन वर्णक्रमौचित्येन चैताः नियोज्यन्ते। मम्मटेनोक्तम् - नियतवर्णगतरसविषयकव्यापारो वृत्तिरित्युच्यते। ध्वन्यालोके आनंदवर्धनेन शब्दगता अर्थगताश्च द्विविधाः वृत्तयः प्रदर्शिताः। रसाद्यनुगुणत्वेन शब्दार्थानामौचित्ययुतो व्यवहारः कैशिक्यादयो वृत्तयः। अथ च वाच्यवाचकाश्रयगतो व्यापारो ह्युपनागरिकादयो वृत्तयो वर्तन्ते। वृत्तिविषयकविवेचनेनाऽनेन स्पष्टमिदं यत् कैशिक्यादीनामर्थवृत्तीनां न कोऽपि साक्षात् संबंधो रीतिभिः सह संलक्ष्यते। यदि कश्चिदपि संबंधो वर्तत एव, सोऽप्यप्रत्यक्षरूपेण वर्तते। उपनागरिकादिवृत्तिषु रीतिषु च काव्यशास्त्रकृद्भिरभेदत्वं प्रतिपादितम्। मम्मटाचार्येण उपनागरिकादिवृत्तयो रीतयश्च अभेदत्वेन प्रोक्ताः। परंतु केचन मनीषिणो वृत्तय एता रीतीनामेकांशभूता एवाऽऽमनन्ति। हेतुरयमत्र वृत्तीनां संबंधः काव्येषु वर्णयोजनया वर्तते, रीतीनांच संबंधो वर्णयोजनया पदयोजनया चाऽस्ति।

८.४ रीतयः प्रवृत्तयश्च-

नाट्यशास्त्रे भरतेन चतुर्विधा प्रवृत्तयः प्रोक्ताः - आवन्ती दाक्षिणात्या पांचाली औड्रमागधी च। प्रवृत्तीनामासां निरूपणं भरतेन विविधप्रान्तगतवेश-भाषाचारवार्तामुपलक्ष्यविहितम्। यथा - 'प्रवृत्तिरिति कस्मात्? उच्यते - पृथिव्यां नानादेशवेषवार्ताः

ख्यापयतीति प्रवृत्तिः। देशादीनुपलक्ष्य राजशेखरसिंहभूपालप्रभृतिभि-र्मनीषिभिरेतासामेव चतसृणां प्रवृत्तीनां स्वरूपं वर्णितम्।

प्रवृत्तिरीतिसंबंधे विचारणीयमिदं यत् प्रवृत्तीनां संबंधो नियतरूपेण विविधदेशवेषभ-ाषाचारव्यवहारप्रभृतिभिः वर्तते, परं रीतीनां संबंधः केवलं वचनविन्यासेनाऽस्ति। अतो रीतीनां क्षेत्रं प्रवृत्त्यपेक्षातः संकुचितमेव। रीतिः काव्यस्वभावेन प्रवृत्तिश्च भूगोलेन सम्बध्यते।

९.0 रीतीनां काव्यात्मत्वसमीक्षा-

इत्थमुपर्युक्तेन विवेचनेन सिद्धमेव यत् काव्ये रीतीनां महत्वं ध्रुवं नियतं वर्तते, परंतु तत्र ताः साधनरूपेण प्रवर्तन्ते न तु साध्यरूपेण। कवीनां कवित्वं काव्येषु निहिते सहृदयहृदयाह्लादकत्वे भवति, तच्च रसध्वनौ वर्तते। पदसंघटनारूपा रीतयो रसादितत्-वानामुन्मीलनं कुर्वन्ति, तेषामुपकारिकाः भवन्ति। साधनरूपाः रीतयो न काव्यसर्वस्वं न च काव्यात्मरूपाः। तासां महत्वं काव्यस्याऽगत्वेन वर्तते न त्वंगित्वेन। अर्थात् रीतीनां महत्वं साधनरूपेण वर्तते न तु साध्यरूपेण। रीतयस्तु काव्यस्याऽऽत्मभूतस्य रसस्योत्-कर्षसाधनं न तु साध्यम्। विश्वनाथेन तु रीतयः काव्यस्य बहिरंगतत्वमिति स्वीकुर्वताऽपि तासां महत्वमनुभूतम्। साहित्यर्पणस्य समग्रं नवमं परिच्छेमसौ रीतिस्वरूपप्रदर्शनाय समर्पितवान्। रीतिं काव्यस्याऽऽत्मानमस्वीकुर्वन्नप्यसौ तां रसोत्कर्षकरूपेण प्रति-पादितवान्। पदसंघटनरूपा रीतिः काव्ये रसस्योपकारक-रूपेणाऽवतिष्ठते। अत आत्मरूपेणाऽनंगीकृतानामपि रीतीनां काव्यसमीक्षायां महत्वमसंदिग्धरूपेण भवत्येव।

१0.0 विषयसंग्रहः-

इत्थं पाठेऽस्मिन् साहित्यशास्त्रे रीतिसिद्धान्तस्य प्रवर्तनम्, रीतिशब्दस्योत्पतिः, रीतिरात्माकाव्यस्य वामनप्रतिपादितानां रीतीनां यथा वैदर्भी-गौडीया-पांचालीरीतीनां स्वरूपं साहित्यशास्त्रे रीतीनां संख्या, रीतीनां नियामकतत्वानि रीतीनां काव्यान्यतत्वैः सह संबंधः, रीतीनां काव्यात्मत्वसमीक्षा चेति विषयाः विवेचिताः। अनेन विवेचनेन साहित्यशास्त्रे रीतिसिद्धांतस्य प्रवर्तनविषये ज्ञानं भविष्यति।

१.0 प्रस्तावना-

संस्कृतकाव्यशास्त्रस्य विवेच्यतत्वेषु रीतितत्वमपि महत्वपूर्णमस्ति। तत्र काव्यरच-ना पदानां सन्निवेशेन एव जायते। यदि पदसंघटना रमणीयाऽस्ति तदा रचनाऽपि रमणीया सहृदयाह्लादकारिणी च भवति। तत्र पदसंघटना रूपा रीतिः काव्याय च विशिष्टा वर्तते

यतो हि पदसंघटनया काव्ये लालित्यमागच्छति, पदानां समुचितेन सन्निवेशेन, रसानुकुल-पदप्रयोगेण, वाच्यानुकूलपदसंयोगेन, विषयानुकूलपदानां सन्निवेशेन च काव्येषु शोभाया आगमनं जायते, अनेन काव्यसौन्दर्यं वर्धते। अत एवोच्यते विश्वनाथेन-उत्कर्षहेतवः प्रोक्ताः गुणालंकाररीतयः। अर्थात् रीतिरपि काव्यस्योत्कर्षहेतुः विद्यते। वामनाचार्यः 'रीतिरात्मा काव्यस्य' इत्युक्त्वा रीतिं काव्यस्यात्मानं प्रतिपादिवान्। तन्मते-विशिष्टा पदरचना एव रीतिः वर्तते।

काव्यशास्त्रस्य आदिकालादेव रीतिस्वरूपविषये रीतिसंख्याविषये स्थितिविषये च मतमतान्तराणि दृष्टिपथमायान्ति। पाठेऽस्मिन् काव्यशास्त्रे रीतीनां स्वरूपविषये संख्याविषये काव्येषु तासां स्थितिविषयेऽपि च निरूपणं क्रियते। यद्यपि साहित्यशास्त्रस्य विकासयात्रायां कालक्रमेण षट्सिद्धान्ता आविर्भूताः। तत्र काव्यस्यात्मतत्वविषये उत वा काव्यस्य सर्वप्रधानतत्वविषये आचार्येषु विचारपरिवर्तनं दृश्यते, परं भरतादारभ्य आधुनिककाव्यशास्त्रपर्यन्तं यावन्तः काव्यशास्त्राचार्याः संजाताः ते सर्वे स्व-स्वग्रंथेषु रीतितत्वस्य विस्तेरण विवेचनं कृतवन्तः। अतोऽत्र साहित्यशास्त्राचार्याणां रीतिविषयकं मतं कालक्रमेण प्रस्तूयते।

२.० भरतमुनिमने रीतितत्वम्-

वर्तमानकाले समुपलभ्यमानेषु ग्रंथेषु नाटयशास्त्रमेव प्रप्रथमः काव्यशास्त्रीयो ग्रंथोऽस्ति इति समीक्षकैराचार्यैश्च स्वीक्रियते। भरतमुनिप्रणीते नाटयशास्त्रे यद्यपि रीतिपदस्य प्रयोगो नैवोपलभ्यते। परं तत्र प्रवृत्तिपदस्य प्रयोगो दृश्यते। मन्ये इयं प्रवृत्तिरेव परवर्तिकाले रीतिपदेन समादृता। तत्र पांचाल्यावन्तीदाक्षिणात्यौड्रमागधी चेति चतस्रः प्रवृत्तयो निरूपिताः सन्ति। राजशेखरवचनानुसारं पूर्वं सुवर्णनाभाभिधानो हि आचार्यो बभूव, यो रीतिविषयकं ग्रंथं लिलेख। रीतिनिर्णयं सुवर्णनाभः इति। परंतु वर्तमानसमये नाऽयं ग्रंथ उपलभ्यते। काव्यसमीक्षासंविधाने रीतेर्वा मार्गस्य वा पदस्य प्रयोगः प्राचीनकाले भौगोलिकवैशिष्टयानि समुपलक्ष्य बभूव। आचार्यैः निर्दिष्टम्- 'विभिन्नप्रदेशेषु निवसन्तो मनीषिणो निजप्रदेशप्रचलितासु प्रसिद्धासु शैलीषु काव्यानि निबबन्धुः। यथा गौडीप्रदेशीया लेखकाः समासबहुलायां गौडीशैल्यां विदर्भवासिनश्च लेखकाः समसारहितायां वैदभाशैल्यां काव्यानि विरचितवन्तः। अत एवैताः शैल्यो मार्गा वा तत्तत्प्रदेशाभिधानेन प्रसिद्धाः संजाताः। परंतु परवर्तिकाले लेखनशैलीनामियं स्थितिः परिवर्तिता। प्रदेशविशेषेभ्यो लेखनशैल्याः यः संबंधः स्वीकृत आसीत् सः कवीनां निजप्रवृत्तिभिः सह स्थापितः।

इत्थं पदसंघटनायै प्रथमं भरतेन प्रवृत्तिपदस्य प्रयोगो विहितः। इयं प्रवृत्तिर्विभिन्नप्रदेशैः भूभागैर्वा भारतस्य सम्बद्धाऽवर्तत। भरत एव प्रथमं काव्यगुणान् व्याख्यातवान्। गुणानेवाश्रित्योत्तरवर्तिभिराचार्यैः रीतीनां विवेचना कृता। तत्र दशप्रकारकाणां काव्यग-

गुणानां वर्णनं नाटशास्त्रे प्राप्यते। ते च गुणा: सन्ति-

श्लेष: प्रसाद: समता समाधि: माधुर्यमोज: पदसौकुमार्यम्।

अर्थस्य च व्यक्तिरुदारता च कान्तिश्च काव्यार्थगुणा दशैते।।

अत: काव्यशास्त्रीयरीतितत्त्वस्य मूलं नाट्यशास्त्रस्य प्रवृत्तावेव दृश्यते।

३.0 भामहमते रीतितत्त्वम्-

काव्यशास्त्रसंदर्भे सर्वप्रथमं भामहाचार्येण तत्वमिदं वर्णितं परं तत्र रीति: मार्गो वा पदं नैव प्रयुक्तम् अपितु 'वैदर्भ गौडीयम्' इति पदद्वयमेव तत्र प्रयुक्तमस्ति। यथा प्रवृत्ते: संबंधं स्पष्टतो नानादेशैरथवा भूभागै: सह वर्तते। तथैव विकासस्य प्रथमयुगे रीतेरपि संबंधं भूभागै: सहैव दृश्यते। यस्य संकेतो भामहस्य काव्यालंकारे प्राप्यते। भामहेन एतत् तत्वमधिकृत्य काव्यविभाजनं नाअंगीक्रियते। अत एव काव्यालंकारे एषा संकल्पना अवमानिता एव दृश्यते। वैदर्भ गौडीयंच वर्णयन् भामहो निगदति-

वैदर्भमन्यदस्तीति मन्यन्ते सुधियोऽपरे।

तदेव च किल ज्याय: सदर्थमपि नापरम्।।

गौडीयमिदमेतत्तु वैदर्भमिति किं पृथक्।

गतानुगतिकन्यायान्नानाख्येयमेधसाम्।।

न चाश्मकवंशादि वैदर्भमिति कथ्यते।

कामं तथास्तु प्रायेण संज्ञेच्छातो विधीयते।।

अलंकारवदग्राम्यमर्थं न्यायमनाकुलम्।

गौडीयमपि साधीयो वैदर्भमितिनान्यथा।।

भामहस्तु अश्मकादि देशविशेषेण सह वैदर्भमार्गस्य संबंधं सर्वथाऽनुचितमेव घोषितवान्। यतो हि वैदर्भाद्यभिधानानि स्वेच्छयैव कृतानि सन्ति। अत्र 'अपरे' इत्यनेन पदेन ज्ञायते यत् भामहोऽत्र अन्येषामाचार्यणां मतमुदाहरति। 'अमेधसाम्' इत्यनेन च ज्ञायते यत् मतमिदं भामहाभिमतं न वर्तते। तन्मते-'न तु वैदर्भमार्गस्य प्रशंसा करणीया न वा गौडीमार्गस्य निंदा करणीया। सर्वापेक्षया गुणेषु ध्यानं देयम्। ते च गुणा: सन्ति-काव्यस्य वक्रोक्तियुक्तता, पुष्टार्थता, अग्राम्यता, अर्थसंपन्नता प्रभृतय:। इमे गुणा यत्र भविष्यन्ति तत्रैव काव्यता स्यात्, न तु मार्गभेदेन कमनीयकाव्यता भवति। कथनमिदं युक्तियुक्तमेव प्रतीयते, यतो हि गौडदेशीय: कविरपि वैदर्भीरीत्यां लिखत्येव। भामहात्पूर्वं वैदर्भमार्ग: सर्वगुणाश्रयत्वेन स्वीक्रियते स्म, गौडीयमार्गश्च तथा समादृतो नासीत्। अस्या विचारध-

ााराया: खण्डनं कृतं भामहेन।

४.0 दण्डिमते रीति: -भामहानन्तरं दण्डी रीतीनामधिकं वैज्ञानिकं विश्लेषणं चकार। परं तेनाऽपि मार्गपदस्यैव प्रयोगो विहित:। यथा-

अस्त्यनेको गिरां मार्ग: सूक्ष्मभेद: परस्परम्।

तत्र वैदर्भगौडीयौ वर्ण्येते प्रस्फुटान्तरौ।।

दण्डिना कथितम्- सूक्ष्मभेदात् काव्यरचनामार्गा अनन्ता: सन्ति। परंतु मुख्यौ मार्गौ द्वावेव स्त:। वैदर्भगौडो मार्गौ। तयोश्च भेदानां गणना न सम्भवा। प्रतिकवेर्मार्ग: पृथगेव भवति। यथा-

इति मार्गद्वयं भिन्नं तत्स्वरूपनिरूपणात्।

तद्भेदास्तु न शक्यन्ते वक्तुं प्रतिकविस्थिता:।।

इक्षुक्षीरगुडादीनां माधुर्यस्यान्तरं महत्।

तथापि न तदाख्यातुं सरस्वत्यापि शक्यते।।

अर्थात् सरस्वत्यपि मार्गानेतान् गणयितुमसमर्था। दण्डिन: समये मार्गयोरतयो: भौगोलिकवैशिष्टयं विद्यमानमासीत्। श्लेषादिदशगुणान् वैदर्भमार्गस्य प्राणतया स्वीकुर्वन दण्डी गौडीयमार्गात् वैदर्भमार्गमधिकमंगीकरोति। काव्यरचनाया मार्गयोरेतयो: संबंधं दंडी गुणै: सह स्थापित:। भरतप्रोक्ता दशगुणा दण्डिना मार्गाभ्यां सह संयोजिता:। यथा-

श्लेष: प्रसाद: समता माधुर्यं सुकुमारता।

अर्थव्यक्तिरुदारत्वमोज: कान्ति: समाधय:।।

इति वैदर्भमार्गस्य प्राणा: दश गुणा: स्मृता:।

एषां विपर्यय: प्रायो दृश्यते गौडवर्त्मनि।।

भामहाचार्यो माधुर्यमोज: प्रसादश्चेति गुणत्रयमेवाङ्.गीकरोति। इत्थं मार्गविषये चिरन्तनाचार्ययोर्मतभेद: स्पष्टमेव परिलक्ष्यते।

५.0 वामनमते रीति:-

वर्तमानसमये समुपलभ्यमानेषु काव्यशास्त्रग्रंथेषु वामनकृतकाव्यालङ्.कारसूत्रग्रंथ एव प्रथमा कृतिर्यत्र काव्यगतरीतीनां विशदा सुस्पष्टा व्याख्या वर्तते। तत्र रीतितत्वस्य साङ्.गोपाङ्.गं विवेचनं प्राप्यते। रीतिं काव्यस्यात्मानं स्वीकुर्वाण वामनाचार्यो रीते: स्वरूपमपि निरूपितवान्। यथा च तेनोक्तम् - रीतिरात्मा काव्यस्य। विशिष्टा पदरचना रीति:। विशेषो गुणात्मा। अर्थात् विशेषवती पदानां रचना रीति:। कोऽयं विशेष: इत्य-

स्मिन् विषये स: कथयति - ओज: प्रसाददिगुणस्वभाव एव विशेष:। इत्युक्ते रीतेरात्मा गुणा एव। तत्र गुणस्वरूपमित्थं निरूपयति वामन: - काव्यशोभाया: कत्त्रारो धर्मा गुणा:। रीतीनां गुणानांच नित्यसंबंधं प्रतिष्ठाप्य वामनो रसादीनां समावेशमप्यत्र चकार। वामनेन गुणानां संख्या विंशतिर्निर्धारिता:। गुणानां नामानि तु प्राचीनाचार्यप्रोक्तानि, परं दशशब्दगुणा दशचार्थागुणा भवन्तीत्युक्त्वा तान् विंशतिसंख्यकान् अगणयत्। इत्थ-मात्मभूतरीतिनिष्ठा गुणा एव काव्यशोभाया: कारका भवन्ति। वामनमते रीति: त्रिविधा भवति यथा हि - वैदर्भी, गौडीया, पांचाली चेति।

६.0 रुद्रटमते रीति:-

रीतीनां विकासस्येतिहासे रुद्रटस्य महत्तमं स्थानमस्ति। प्रथमोऽसावाचार्यो यो रीति: भौगोलिकबंधनेभ्यो विमोच्य काव्यव्यवहारपरम्परायां संयोजितवान्। वामनस्य तिसृभि: रीतिभि: सह रुद्रट एकामन्यां चतुर्थी रीतिं लाटीमयुद्धघाटितवान्। रुद्रटो रीतिभि: सह रसानां संबंधमपि प्रास्थापयत्। रीतीनां संयोजनं रसौचित्यमपेक्ष्य करणीयमिति व्यवस्था तेन स्थापिता। रीतिविभाजनं रुद्रट: समासमधिकृत्य अकरोत्। समासरहिता रचना वैदर्भीरीति: द्वित्रिपदसमासा पांचालीरीति:, पंचसप्तपदसमासा लाटीरीति:, समासबहुला च रचना गौडीरीतिरिति रीतीनां व्यवस्था वर्तते। यथा-

नाम्नां वृत्तिर्द्वेधा भवति समासासमासभेदेन।
वृत्ते: समासवत्यास्तत्र स्यु: रीतयतिस्र:।।
वृत्तेरसमासाया वैदर्भी रीतिरेकैव।
पांचाली लाटीया गौडीया चेति नामतोऽभिहिता:।
लघुमधयतविरचनसमासभेदादिमास्तत्र।।
द्वित्रिपदा पांचाली लाटीया पंच सप्त वा यावत्।
शब्दा: समासवन्तो भवति यथाशक्ति गौडीया।

रुद्रटेन प्रतिपादितं यतृ सुकुमाररसानां शृंगारप्रेय:करुणभयानकाअद्भुतानां विर्निवेशने वैदर्भी पांचाली च रीत्यौ प्रयोजनीये। कठोराणामोजायमानानांच रसानां रौद्रादीनां विनिवेशने लाटी गौडी च रीत्यौ प्रयुज्येते। यथा-

इह वैदर्भी रीति: पांचाली वा विचार्य रचनीया।
मधुरा ललिते कविना कार्ये वृत्तिस्तु शृंगारे।।
वैदर्भीपांचाल्यौ प्रेयसि करुणे भयानकाअद्भुतयो:।

लाटीयगौडीया रौद्रे कुर्याद् यथौचित्यम्।।

७.0 आनंदवर्धनाचार्येण रीतिपदस्य स्थाने संघटना इति पदं प्रयुक्तम्। पदानां सम्यक् रचना एव संघटना भवति। तेन संघटना त्रिधा स्वीकृता-

असमासा समासेन मध्यमेन स भूषिता।

तथा दीर्घसमासेति त्रिधा संघटनोदिता।।

परं ध्वन्यालोककारमते गुणाश्रया संघटना न भवति, संघटनाश्रया वा गुणा न भवन्ति। संघटनाया नियमे वक्तृवाच्ययोरौचित्यमेव हेतुरूपेण विराजते-यथा-

तन्नियमे हेतुरौचित्यं वक्तृवाच्चयोः।

विषयाश्रयमप्यन्यदौचित्यं तां नियच्छति।

काव्यप्रभेदाश्रयतः स्थिता भेदवती हि सा।''

इत्थं वक्तृवाच्विषयाणामौचित्यमेव संघटनाया नियामकतत्वमस्ति।

वचनविन्यासक्रमो रीतिरिति राजशेखरस्य मतमस्ति। सा च रीतिः त्रिविधा यथा च तेनोक्तम्-

वैदर्भी गौडीया पांचाली चेति रीतयस्तिस्रः।

आसु च साक्षान्निवसति सरस्वती तेन लक्ष्यते।।

राजशेखरो गौडीरीति दीर्घसमासां पांचालीरीतिमल्पससमासां वैदर्भींच रीतिं समासरहितां पदविन्यासयुतां मेने।

८.0 भोजराजमते रीतिः-

रीतीनां विवेचने भोजराजोऽपि महनीयं स्थानं भजते। शृंगारप्रकाशेऽसौ चतसृणां रीतीनां पांचालीगौडीवैदर्भीलाटीनां विश्लेषणं चकार। परं सरस्वतीकण्ठाभरणे तेन द्वे रीती आवन्तिका मागधी चाऽपि कल्पिते। एवमसौ षड्रीतीः प्रत्यापादयत्। भोजराजेन रीतिविवेचनप्रसंगे एकत्रैव पन्थामार्गरीतीरित्येतेषां पदानां प्रयोगो विहितः। कविमार्ग एव रीतिरित्युच्यते। अनेन षड्संख्यका रीतयोऽङ्गीकृताः। यथा हि-

वैदर्भी चाथ पांचाली गौडीयावन्तिका तथा।

लाटीया मागधी चेति षोडारीतीर्निगद्यते।।

(सरस्वतीकण्ठाभरणम् 2/5)

भोजराजेन गुणाः समासाश्च रीतीनां मूलत्वेन प्रस्थापिताः।

९.0 कुन्तकमते रीति:-

रीतीनां विकासक्रमे कुन्तकोऽपि सविशेषमुल्लेखनीयो विद्यते। कुन्तको रीति-पदप्रयोगस्य स्थाने मार्गपदं प्रयुनक्ति। तेन वैदर्भीरीति: सुकुमारमार्गनाम्ना, गौडीरीति: विचित्रमार्गरूपेण पांचालीरीतिश्च मध्यममर्गाभिधानेन कल्पिता। यथा हि-

सम्प्रति तत्र ये मार्गा: कविप्रस्थानहेतव:।

सुकुमारो विचित्रश्च मध्यमश्चोभयात्मक:।।

कुन्तकाचार्यो देशमाश्रित्य रीतेर्व्यपदेशं नैव स्वीकरोति। तेन कविस्वभावाधारे मार्गाणां त्रैविध्यं प्रकाशितम्। यथोक्तम्-

यद्यपि कविस्वभावभेदनिबंधनत्वादनन्तभेदभिन्नत्वमनिवार्यम्।

तथापि परिसंख्यातुमशक्यत्वात् सामान्येन त्रैविध्यमेवोपद्यते।।

-(वक्रोक्तिजीवितम् - 1/24)

अर्थात् मार्गाणामेतेषं न किन्द् भौगोलिकमहत्वमपितु ते कवीनामांतरिकगुणानां स्वभावानांच बाह्याभिव्यक्तयो वर्तन्ते। मार्गस्तु कविस्वभावेन सम्बध्यते। कविस्वभा-वानामनन्तत्वाद् मार्गा अप्यनन्ता: सम्भवन्ति। परंतु ते त्रिषु मार्गेषु वर्गीकर्तुं शक्यन्ते। कालिदासादिकवय: सुकुमारमार्गस्य, मातृगुप्तादयो मध्यममार्गस्य, बाणभट्टभवभूत्यादि-कवयश्च विचित्रमार्गस्य साधका: काव्यकर्तारो वर्तन्ते।

कुन्तकेन एतेषां मार्गाणां विशिष्टानां साधारणानांच धर्माणामपि कल्पना विहिता। सुकुमारमार्गस्य चत्वारो विशिष्टा: सन्ति-माधुर्यप्रसादलावण्याभिजात्या:। विचित्रमार्ग-स्याऽप्येते एव गुणा वर्तन्ते। परंतु अस्मिन् मार्गे ते पूर्वमार्गापेक्षयाऽतिशययुक्ता: संजायन्ते प्रयत्नसाध्यबाह्यशोभोत्पादकाश्च भवन्ति। मध्यममार्गेऽप्येते एव गुणा भवन्ति। पुन: तत्र एतेषु त्रिषु मार्गेषु द्वौ सामान्यगुणौ औचित्यसौभाग्यगुणौ च स्वीकृतौ कुन्तकाचार्येण।

१0.0 मम्मटाचार्यमते रीति:-

मम्मटेन प्रोक्तम् - वर्णानां विशिष्टविन्यासक्रम एव रीति:। रीतीनामन्तर्भावमसौ वृत्त्यनुप्रासान्तर्गतं चकार। वृत्तयश्च त्रिविधा भवन्ति-उपनागरिका परुषा कोमला च। मम्मटाचार्यमते माधुर्यस्याभिव्यंजकैर्वर्णैरुपनागरिका, ओजस: प्रकाशकैर्वर्णै: परुषा प्रसादस्य प्रकाशकैर्वर्णै: कोमला वृतिर्भवति। यथोक्तं-

माधुर्यव्यंजकैर्वर्णैरुपनागरिकोच्यते।

ओज: प्रकाशकैस्तैस्तु परुषा कोमलापरै:।।

(काव्यप्रकाश:-9/80)

एतास्तिस्रो वृत्तयो वामनादीनां मते वैदर्भी-गौडी-पांचाल्याख्यारीतयो मता:-

केषांचिदेता वैदर्भीप्रमुखा रीतयो मता:।

मम्मटमनुसृत्य पंडितराजजगन्नाथोऽपि हि उपनागरिकादिषु वृत्तिषु वैदर्भ्यादिषु रीतिषु चाऽभेदत्वमनुत। परन्त्वसौ रीतिषु केवलं वैदर्भीरीतिमेवाऽवर्णयत्। वैदर्भीरीतिरचनासु कविना सावधानेन भाव्यम्। यथा-

अस्याश्च निर्माणे कविना नितरामवहितेन भाव्यम्।

अन्यथा तु परिपाकभंग: स्यात्। (रसगंगाधर: - पृ. 117)

शारदातयमते रीति:-

शारदातनयो वचनविन्यासक्रममेव रीतीनां मूलं प्रतिपादितवान्। तत्र भावप्रकाशग्रंथे प्राचीनाचार्यै: प्रतिपादितानां चतसृणां रीतीनां वैदर्भीगौडीपांचालीलाटीनां वर्णनं कृत्वा शारदातनयो द्वयोरन्ययोरपि रीत्यो: सौराष्ट्रीद्राविडयो: प्रतिपादनं चकार। तेन देशविशेषे: सह रीतीनां संबंध: स्वीकृत:।

१२.0 विश्वनाथाचार्यमते रीति:-

ध्वनिवादिष्वाचार्येषु विश्वनाथो रीतीनां सविशदं विशेषवर्णनं कृतवान्। साहित्यदर्पणस्य नवमे परिच्छेदे रीतीनामेव निरूपणं विद्यते। तत्र साहित्यदर्पणस्य प्रथमे परिच्छेदे रीतयोरवयवसंस्थानविशेषवत् इत्युक्तवा उत्कर्षहेतव: प्रोक्ता: गुणालंकाररीतयोऽपि प्रतिपादितवान्। कविराजविश्वनाथमते यथा अड्.गविन्यास: सुसंगठिततया विशेषसान्दर्याधायक: सन् आत्मन उपकारको भवति तथैव पदसंघटनारूपा रीति: काव्यात्मभूतस्य रसस्योपकारिणी भवति। अर्थात् अड्.गसंस्थानवत् पदसंघटनारूपा रीति: रसानुपकरोति। रीतयश्च चतुर्विधा:-वैदर्भी-गौडी पांचाली लाटी च। यथा-

पदसंघटना रीतिरंगसंस्थानविशेषवत्।

उपकत्री रसादीनां सा पुन: स्याच्चतुर्विधा।।

वैदर्भी चाऽथ गौडी च पांचाली लाटिका तथा।।

रीतीनां निरूपणे विश्वनाथो वर्णानां विन्यासं समासंच विशेषहेतुत्वेन न्यरूपयत्। चिरन्तनायार्चाणां मतमनुसृत्य विश्वनाथेन वैदर्भादिरीतीनां लक्षणं कृतम्। यथा वैदर्भीरीति:-

माधुर्यव्यंजकैर्वर्णै: रचना ललितात्मिका।

अवृत्तिरल्पवृत्तिर्वा वैदर्भी रीतिरिष्यते।।

उदाहरणं यथा-

लताकुंजं गुंजन्मदवदलिपुंजं चपलयन्

समालिंगन्नअंगं द्रुततरमनंगं प्रबलयन्।

मरुन्मन्दं मन्दं दलितमरविन्दं तरलयन्

रजोवृन्दं विन्दन् किरति मकरन्दं दिशि दिशि।।

पद्येऽस्मिन् वैदर्भीरीतिर्विशिष्यते इति।

गौडीरीति:-

एतद्विरीता गौडीरीतिरस्ति-यथा-

'ओज: प्रकाशकैर्वर्णैबंध आडम्बर: पुन:।

समासबबहुला गौडी।

विश्वनाथेन संदर्भेऽस्मिन् पुरुषोत्तमस्य मतमुपस्थापितं यथा-

बहुतरसमासयुक्ता महाप्राणाक्षरा च गौडीया।

रीतिरनुप्रासमहिमपरतंत्रा स्तोकवाक्या च।।

अर्थात् यत्र वैदर्भीरीतौ समासाभाव उत वा अल्पसमासो दृश्यते, तत्र अल्पप्राणाक्षरा: प्रयुज्यन्ते, तत्रैव गौडीरीतौ समासबाहुल्यं दीर्घसमासं प्रयुनक्ति, तत्र महाप्राणाक्षरा प्रयुज्यन्ते।

उदाहरणं यथा-

चंचद्भुजभ्रमितचण्डगदाभिघात-

संचूर्णितोरुयुगलस्य सुयोधनस्य।

स्त्यानावनद्धघनशोणिशोणपाणि-

रुत्तंसयिष्यति कचांस्तव देवि भीम:।।

पद्येऽस्मिन् स्पष्टरूपेण गौडीया रीति: परिलक्ष्यते।

पांचालीरीति:-

प्रसादमात्रव्यंतजकैर्वर्णैर्युक्ता पंचषाणि पदान्येव यत्र समस्तानि भवनित सा पांचाली अभिमता-यथा

वर्णै: शेषै: पुनद्र्वयो:।

समस्तपंचषपदो बंधः पांचालिका मता।।

तत्र द्वयोर्नाम वैदर्भीगौडीरीत्योऽभिप्रेतमस्ति। उदाहरणं यथा-

मधुरया मधुबोधितमाधवी मधुस्मृद्धिसमेधितमेधया।

मधुकराड्.गनया मुहुरुन्मदध्वनिभृता निभृताक्षरमुज्जगे।।

तत्र भोजस्त्वाह-

समस्तपंचषपदामोजः कान्तिसमविन्नताम्।

मधुरां सुकुमारां च पांचाली कवयो विदुः।।

लाटीरीतिः-

विश्वनाथमते गौडीपांचाल्योर्मध्ये लाटीरीतिर्भवति यथा-

लाटी तु रीतिः वैदर्भीपांचाल्योरंतरे स्थिता।

उदाहरणं यथा-

अयमुदयति मुद्राभंजनः पद्मिनीना-

मुदयगिरिवनालीबालमन्दारपुष्पम्।

विरहविधुरकोकद्वन्द्वबन्धुर्विभिन्दन्

कुपितकपिकपोलक्रोडताम्रस्तमांसि।।

पद्येऽस्मिन् लाटरीरितर्विद्यते इति।

रीतीनां निरूपणसंदर्भे विश्वनाथाचार्यः कस्यचित्प्राचीनाचार्यस्य मतमित्थमुद्धरति-

गौडी डम्बरबद्धा स्याद्वैदर्भी ललितक्रमा।

पांचाली मिश्रभावेन लाटी तु मृदुभिः पदैः इति।।

यथा-

मुदृपदसमाससुभगा युक्तैर्वर्णैर्न चातिभूयिष्ठा।

उचितविशेषणपूरितवस्तुन्यासा भवेल्लाटी। इति।

कस्यचिद् आचार्यस्य मतं वर्तते यत् विश्वानाथेन साहित्यदर्पणे उपस्थापितम्।

यद्यपि सर्वासां रीतीनां लक्षणं प्रदत्तमाचार्येण, तासां नियमनं जातमस्ति तथापि वक्त्रौचित्याद् वाच्यौचित्याद् प्रबंधदीनामौचित्याच्च योग्यविपरीता अपि रचनादयोऽर्थात्

वृत्तिवर्णौ भवत:। यथा चोच्यते आनंदवर्धनेन-क्वचित्तु वक्त्राद्यौचित्यादन्यथा रचनादय:। इति।

रीती: निरूपयन् विश्वनाथो ध्वनिवादिनामाचार्याणां रीतिवादिनांचार्याणां मतानां समन्नये प्रयत्नं कृतवान्। रीति: काव्यस्य बाह्यं तत्वमिति मम्मटेन रीतयो रसाभिव्यंजकरूपेण न समर्थिता:। परंतु विश्वनाथो रीती: रसानामुपकारकत्वरूपेण प्रदर्शितवान्। पंडितराजेन विश्वनाथस्य विरोध: कृत:-वर्णरचनाविशेषो माधुर्यादिगुणनामभिव्यंजको भवेत्, न तु रसानाम्। यथा- ''वर्णरचनाविशेषाणां माधुर्यादिगुणानामभिव्यंजकत्वमेव न रसाभिव्यंजकत्वम्।'' इति।

इत्थं वामनाचार्यात्पूर्ववर्तिन: परवर्तिनश्चार्या: यद्यपि रीतिं काव्यस्यात्मरूपेण न स्वीकृतवन्त: परं काव्यशास्त्रे रीतीनां महत्वं सर्वे स्वीकुर्वन्त्यैव। अत एव न केवलं दण्डिप्रभृतय: चिरन्तनाचार्या अपितु मम्मटविश्वनाथादयोऽपि विद्वांस: स्वकीये ग्रंथे काव्यसौन्दर्योत्कर्षहेतुरूपेण रीतीनां महत्वं प्रतिपादयन्त्यैव।

रीतीनामुद्भवस्य विकासस्य च संक्षिप्तविवेचनेन स्पष्टमेवेदं यत् काव्यसमीक्षायां रीतितत्वव्यवहारो वामनाचार्यात्पूर्वमपि प्रावर्तत। परंतु तस्मिन् समये तत् तत्वं मार्गनाम्ना प्रसिद्धमासीत्। वामनात्पूर्वं द्वौ मार्गौ प्रवर्तते स्म-वैदर्भोगौडीयश्च। रीतितत्वस्य वैज्ञानिकी विशिष्टा च व्याख्या प्रथमं वामनेनैव कृता। अथ च तेन सा काव्यस्याऽत्मा प्रतिपादिना। वामनेन तिस्रो रीतय: प्रोक्ता:।

वामनानन्तरं रीतितत्वं काव्शास्त्रविद्धि: भूयिष्ठं विवेचितं परंतु कश्चिदपि समीक्षको तत् तत्वं काव्स्यात्मरूपेण समर्थनं न कृतवान्। केवलममृतानन्देन योगिना वामनस्य समर्थनं कृतम्। वामनो गुणानेव रीतीनां मूलं प्रोवाच, परंतूत्तरवर्तिन आचार्या: वर्णानां विन्यासं समासंचापि रीतिहेतुत्वेन प्रकलिपतवन्त:। प्राचीनाचार्या: रीतिस्वरूपनिरूपणे भौगोलिकस्थितिमपि हेतुरूपेण स्वीकृतवन्त आसन्, परमुत्तरवर्तिभिराचार्यै: कविस्वभाव एव तत्स्वरूपनिरूपणे प्रमुखहेतुत्वेन कल्पित:।

वामनो रीतिं काव्यस्याऽत्मानं प्रत्यापादयत्। रसादीनांच समावेशस्तेन कांतिगुणे स्वीकृत:। परमुत्तरवर्तिन आचार्या: रीतिस्वरूपं वर्णविन्यासक्रमं पदसंघटनांच संस्थाप्य, तामप्रत्यक्षरूपेण रसोपकारकरूपेणैव प्रतिष्ठितामकुर्वन् एवं वामनेन या: रीतय: काव्यसमीक्षासरण्यां महनीयतमा: प्रतिष्ठिता:, ध्वनिवादिभिराचार्येस्ता: रसोपकारकहेतुत्वेन कल्पिता: गौणीरूपेण च परिवर्तिता:।

१ ३ .0 रीतिलक्षणं गुणैश्च सह तासां संबंधः-

वामनपूर्ववर्तिनौ भामहदण्डिनौ काव्येष्वलङ्.कारान् महनीयतमतत्वरूपेण प्रस्थापितवन्तौ। परंतु वामनेनाऽनुभूतम्-यत् काव्ये किंचिदलङ्.कारेभ्योऽपि सूक्ष्मतरं तत्वं वर्तते, यद्विना काव्यरचना न तथा चमत्कारकारिणी सफला च भवति। तेनोद्घोषितं रीतरिव तत्तत्वं वर्तते। रीतिरेव काव्यस्याऽऽत्मा। काव्यशरीरं ध्रुवं शब्दार्थनिर्मितं वर्तते, तयोश्च सौन्दर्यं तत्र चमत्कृतिमादधाति। परं यावत् पदसंघटनायां पदसन्निवेशे च औचित्यं न प्रतिष्ठते, तावत् काव्ये काव्यत्वं न प्रवर्तते। पदानामियं संघटनैव रीतिवर्तते। अथ च चेयं संघटना गुणविशिष्टाऽपि भवितव्या। अतो वामनो रीतिलक्षणं जगाद-

विशिष्टा पदरचना रीतिः। विशेषो गुणात्मा।।

अत्र वैशिष्टयं विद्यते गुणयुक्तत्वम्।

अनेन ज्ञायते यत् रीतयो गुणैर्निष्पद्यन्ते। वामनो विंशतिगुणानां निर्वचनं कृतम्। वामनात्पूर्वं भरतेन दशगुणाः व्याख्याताः। परं भामहो निष्पादितेष्वपि त्रिषु गुणेषु माधुर्यौज:प्रासादेषु दंडीभरतोक्तान् दशगुणान् अंतर्भूतवान्। वामनेन भरतोक्ता एते गुणास्तु स्वीकृताः परं गुणान् द्विधा विभज्य तेषां संख्या विंशतिः प्रतिपादिता-दशशब्दगुणाः, दशचार्थगुणाः। वामनेन गुणानं संबंधः साक्षाद्रूपेण रीतिभि:सह संस्थापितः। असौ तिस्रो रीतीः प्रतिपादितवान् - वैदर्भी गौडीं पांचालीं च। तिसृष्वेतासु रीतिषु वैदर्भीरीतिः समस्तगुणगुम्फिता भवति, गौडीरीतिः विशेषत ओजकान्तिगुणसंपन्ना भवति पांचालीरीतिश्च विशेषेण माधुर्यसुकुमारताभ्यां युता वर्तते।

वामनस्य रीतिलक्षणमुत्तरवर्तिभिराचार्यैः प्रायशः स्वीकृतम्। गुणैः साकं रीतीनां संबंधोऽपि तैः स्वीकृतः। रुद्रटेन समासैः सह संबंधोऽपि तासां स्वीकृतः। अथ च ध्वनिवादिन आचार्याः वर्णविन्यासमपि रीतिलक्षणे योजितवन्तः।

१ ४ .0 रीतीनां पारस्परिकप्राशस्त्यम्-

वामनो गौडीं पांचालीं वैदर्भींचेति रीतित्रयं काव्यस्याऽऽत्मपदे प्रतिष्ठितवान्। तिसृष्वपि रीतिषु तेन वैदर्भीरीतिः विशेषेण हृदयाह्लाददायिनी अभिहिता। अत्र हेतुरयमेव यद् वैदर्भीरीतिः गुणानां स्फुटत्वात् समग्रगुणयुतत्वाच्च श्रेष्ठा। वैदर्भीरीत्यां तथाविधः सहृदयावर्जकोऽलौकिको भाव उदयति, यमवाप्य शब्दसौन्दर्यमपि चमत्कृतिमवाप्नोति। वामनात् पूर्वं तदन्तरंचाऽपि प्रायशः सर्वे समालोचकाः कवश्यचापि वैदर्भीरीतिमेव प्रशस्यतमामङ्.गीकृतवन्तः। केवलं कुन्तक एव रीतिषु नोत्तममध्यमाधमभावमङ्.गीकृतवान्। वामनात् पूर्ववर्ती दंडी वैदर्भगौडमार्गयोः वैदभमार्ग गुणवत्तरं गौडमार्गंच हीनं जगाद वैदर्भमार्गे दशगुणाः विद्यमानाः सन्ति, न गौडमार्गे। वामनानन्तरं काव्शास्त्र-

कर्तार: कवयश्च प्रायशो वैदर्भीरीतिमेव प्रशस्यतमां जगदु:। राजशेखरे वैदर्भीमेव श्रेष्ठां प्रोवाच। वैदर्भीरतिप्रयोगे महाकविकालिदास: सिद्ध:। कालिदासस्य वैदर्भमार्गो दण्डिना प्रशंसित: - यथा-

लिप्ता मधुद्रवेणाऽऽसन् यस्य निर्विष्टया गिर:।

तेनेदं वत्र्म वैदर्भ कालिदासेन शोभितम्।।

परिमलगुप्त: प्राचीनै: कविभि: कालिदासभर्तृमेण्ठादिभि: प्रदर्शितं वैदर्भमार्ग खड्गधारामिव कीर्तितवान्।

तिलकमंजर्या धनपालो वैदर्भीरीतिं प्रशंसितवान्। बिल्हणोऽपि वैदर्भीरीतिं भूयिष्ठं प्रशशंस। कर्णेष्वमृतवर्षिणी सरस्वतीबिलासभूमिरियं वैदर्भी कैश्चिदेव परमसौभाग्यशाा-लिभि: प्राप्यते। यथा-

अनभ्रवृष्टि: श्रवणामृतस्य सरस्वतीविभ्रमजन्मभूमि:।

वैदर्भरीति: कृतिनामुदेति सौभाग्याभप्रतिभू: पदानाम्।।

श्रीहर्षोऽपि वैदर्भीरीतिं बहुतरां प्रशंसितवान्। वैदर्भीरीतिं प्रशंसन् नीलकंठदीक्षितस्-त्वाह-इयम् (वैदर्भीरीति:) आस्वाद्यमानेषु पदार्थेषु प्रथमा, आरोहणे कविकौशलस्य पराकाष्ठा, सरस्वत्या: निश्वास:, शृंगारादिनवरसै: परमरमणीया वर्तते। पांचालीरीतिस्तु कविपरम्परैव। कवीनां वाणीषु वैदर्भीरीतिर्वर्तते, यत्र स्वर्गमोक्षयोरानन्दोऽपि तुच्छ एव। इत्थं साहित्यशास्त्रे रीतितत्वस्य उद्भवो विकासश्च संक्षेपेण निरूपित:।

१५.0 विषयसंग्रह:-

इत्थं पाठेऽस्मिन् साहित्यशास्त्रे रीतितत्वस्योद्भवो विकासश्च, साहित्यशास्त्रीयार्याणां मतेषु रीतितत्वम्, रीतीनां संख्या, रीतिलक्षणं गुणैश्च सह ताससां संबंध:, रीतीनां पारस्-परिकप्राशस्त्यं चेति विषया: विवेचिता:। अनेन विवेचनेन साहित्यशास्त्रे रीतितत्ववि-कासविषये ज्ञानं भविष्यति।

प्रस्तावना

तृतीये पाठे गुणालंकारयोरुद्गमो विकासश्च मुख्यरूपेण प्रतिपादितौ। तत्र ज्ञातं यद् गुणानाम् अलंकाराणां च स्वरूपसंख्याश्रयादिविषये के के मुख्या विचारा: काव्यशास्त्रे लभ्यन्ते अस्मिन् चतर्थे पाठे रीतेर्दोषस्य च विचार: कथं प्रारब्ध:, कथं च रीतिगुणयोरुद्गमो विकासश्च जात इति विचार्यते। तत: काव्यशास्त्रे प्रसिद्धानां षण्णां रसादिप्रस्थनानां परिचय: प्रदास्यते। एषां प्रस्थानानां प्रादुर्भवास्य मूलं काव्ये प्रधानतमस्य तत्वस्य विवेचनं विद्यते। एतत् सर्वमत्र पाठे क्रमेण प्रदश्र्यते।

रीतेरुद्गम:

काव्यशास्त्रे विशिष्टपदरचनारूपे रीतिशब्दार्थे प्रवृत्ति-वृत्ति-संघटना-मार्ग शब्दा: प्रयुज्यन्ते। रीतिशब्द: 'रीङ्. प्रस्रवणे' इति धातो: 'रीङ्. गतौ' इति धातोश्च क्तिन्प्रत्यये कृते निष्पद्यते। काव्यशास्त्रीयरीतितत्वस्योद्गमो वेदात् स्वीकर्तुं शक्यते। ''महीव रीति: शवसाऽसरत् पृथक्' (ऋग्वे. 2.28.14) प्रस्रवणार्थाद् रीङ्.धातोर्निष्पन्नो रीतिशब्दो धारार्थे प्रयुक्त:। तेनास्य मन्त्रस्यार्थो वर्तते यद् धारा विभज्याऽधो सरति, यथा गावो विभज्य स्वस्वदेवगृहं प्रविशन्ति। 'वातेवाजुर्यानद्येव रीति:' (ऋग्वे.2.39.5) अत्र गत्यर्थाद् रीङ्.धातोर्व्युत्पादितो रीतिशब्दो मार्गे गमने च प्रयुक्त:। 'तामस्य रीति: परशोरिव' (ऋग्वे.4.48.4) अत्र प्रयुक्तस्य रीतिशब्दस्य सायणानुसारेण स्वभावो गतिश्चार्थ:। 'रीतिरपाम्' (ऋग्वे.6.13.1) अत्र गमयिता गतिश्चार्थो विहित:। इदं जयमन्तमिश्ररचितकाव्यात्मीमांसायां विस्तरेण स्पष्टम्। एवं काव्यशास्त्रे प्रयुज्यमानस्य रीतिशब्दस्य वेदप्रयुकतरीतिशब्दस्य स्वभावमार्गोद्यर्थेन संबंधो वक्तुं शक्यते। काव्य-शास्त्रेऽपि हि रीत्यर्थे प्रवृत्तिमार्गाद्यर्था: प्रयुक्ता एव। वेदेऽनेकत्र समासरहितानां मन्त्राणां प्रयोगस्य दर्शनेन वैदर्भीरीते: सत्वं द्रष्टुं शक्यते। यद्यपि वैदिवाङ्.मये दीर्घसमासो न दृश्यते तथाप्यनेकत्रेन्द्रसूक्तादौ कठोरवर्णानां प्रयोगेण गौडया अपि लेखो लक्ष्यते। वस्तुतो भरतमुनेनर्नाटयशास्त्रे प्रयुक्त: प्रवृत्तिशब्दो रीतेर्मूलं वर्तते। भरतेन 'पृथिव्यां नानादेश-वेश-भाषाचारवार्ता: ख्यापयतीति प्रवृत्ति:' इति वचनेन प्रवृत्तिशब्दस्य संबंधो देशेन वेशेन व्यवहारेण भाषया च कथित:। यथा प्रवृत्तिशब्दस्य संबंधो देशेन भाषया च प्रतिपादित: तथाऽग्रे रीतिपदस्यापि संबंधो विदर्भादिदेशेन भाषया च जात:। भतरस्य प्रवृत्तिशब्दो वेषाचारादीनामपि कुक्षौ स्थापनेन व्यापको रीतिशब्दस्तु देशभाषाभ्यामेव संबंधेन व्याप्य:। एवं रीतेरुद्गमस्थलं वेदो नाटयशास्त्रं च मन्तुं शक्यते।

रीतेर्विकास:

अयं रीतिविकासो भरतात् प्रारभते। भरतेन पश्चात् प्रयुज्यमानस्य रीतिशब्दस्याप्यर्थे प्रवृत्तिशब्द: प्रयुक्त:। भरतेन अवन्त्यादिदेशसम्बद्धा आवन्ती-दाक्षिणात्या-पांचाली-आ-ड्रमागधीरूपाश्चतस्र: प्रवृत्तय उक्ता:-

''चतुर्विधा प्रवृत्तिश्च प्रोक्ता नाटयप्रयोगत:।

आवन्ती दक्षिणात्या च पंचाली चैड्रमागधी। (ना.शा.14/36)।

बाणभट्टेनापि हर्षचरिते रीते: संबंधो गौडादिदेशै:-

'श्लेषप्रायमुदीच्येषु गौडेष्वक्षरडम्बरम्।

उत्प्रेक्षा दाक्षिणात्येषु कृत्स्नमेकत्र दुर्लभम्।।'

इति वचनेन सूचितः। भामहेन रीतीनामश्मकादिभिर्देशैः संबंध उक्तः पश्चान्निराकृतश्च। वामनेनापि 'विदर्भादिषु दृष्टत्वात् तत्समाख्या। न पुनर्देशैः किन्चिद् उपक्रियते काव्यानाम्' इत्यभिधाय भामहस्य मतं समथितम् 'विशिष्टपदरचना रीतिः, विशेषो गुणात्मना' इति सर्वप्रथमं रीतेर्लक्षणं विहितम्, वैदर्भी-गौडी-पांचालीरूपास्तिस्रो रीतयो देशविशेषेण संबंधस्य निषेधेऽपि प्रायोवादाश्रयेण देशनाम्नैव स्वीकृताश्च। अग्रे कुन्तकेनापि देशविशेषेण सह रीतेः संबंधं निराकृत्य कविस्वाभावाश्रयेण मार्गशब्देन रीतयो व्यवस्थापिताः। तन्मते सुकुमार-विचित्र-मध्याभिधानाश्चत्वारो मार्गाः स्वीकृताः। उद्भटेन वृत्तिशब्देन रीतयः प्रतिपादिताः, उपनागरिका-परुषा-कोमाख्यास्तिस्रो वृत्तयोऽगीकृताश्च। मम्मटेनाप्युद्भटस्यैव मतनुसृतम्, ता एव तिस्रो वृत्तयः काव्यप्रकाशे प्रतिपादिताः, एता एव वैदर्भीप्रभृतिनामभिः स्वीक्रियन्त इति 'केषान्चिदेता वैदर्भीप्रमुखा रीतयो मताः' इति वचनेन सूचितं च। रुद्रटेन समासमाश्रित्य चतस्रो रीतयः प्रतिपादिताः। तत्र समासस्य सर्वथाऽभावे वैदर्भी, द्वयोस्त्रयाणां वा पदानां समासे पांचाली, पंचानां सप्तानां वा पदानां समासे मध्यसमासा लाटी, यथासंभवं दीर्घसमासा गौडी चेति चतस्रो रीतयः, समासरूपवृत्त्याश्रयेण स्वीकृताः।

उक्तं रुद्रटालंकारे-

'वृत्तेरसमासाया वैदर्भी रीतिरेकैव।

वृत्तेः समासवत्त्यास्तत्र स्यू रीतयस्तिस्रः।

पांचाली लाटीया गौडीया चेति नामतोऽभिहिताः।

लघुमध्यायतविरचनसमासभेदादिमास्तत्र।

द्वित्रिपदा पांचाली लाटीया पंच सप्त वा यावत्।

शब्दाः समासवन्तो भवति यथाशक्ति गौडीया।' इति।

अग्निपुराणेऽपि 'वाग्विद्यासम्प्रतिज्ञाने रीतिः साऽपि चतुर्विधा' इत्यादिवचनेन वैदर्भ्यादय उक्ताश्चतस्र एव रीतयः प्रतिपादिताः। आनंदवर्धनेन संघटनाशब्देनाऽसमासा, मध्यसमासा, दीर्घसमासा चेति त्रिधा रीतिरभिहिता, तस्या नियमनस्य हेतवो वक्तृवाच्यादयो निरूपिताः, रीतिगुणयोः संबंधश्च विस्तरेण विवेचितः। रीतिरूपायाः संघटनाया नियामकेषु रस एव प्रधानरूपेणाऽभिहितः। आनंदवर्धनेन काव्ये रीतिप्राधान्यवादिनोऽनेन वचनेन कटाक्षिताः-

'अस्फुटस्फुरितं काव्यतत्वमेतद् यथोदितम्।

अशक्नुवद्भिर्व्याकर्तुं रीतयः सम्प्रवर्तिताः।' इति।

राजशेखरेण 'वचनविन्यासक्रमो रीतिः' इति रीतेर्लक्षणं विहितम्, वैदर्भी-गौडी-पाञ्चालीरूपायाः तस्याः उद्भवः परिणीतायाः साहित्यविद्यावध्वा वशंवदात् काव्यपुरुषात् काव्यमीमांसायाम् 'तथाविधाकल्पयापि तया अवशंवदीकृतः समासवद् अनुप्रसावद् योगवृत्तिपरंपरागर्भं जगाद सा गौडीया रीतिः। तथाविधाकल्पयापि तया यदीषद्वशंवदीकृत ईषदसमासां ईशदनुप्रासम उपचारगर्भं जगाद स पंचाली रीतिः। यदत्यर्थं च स तया वशंवदीकृतः स्थानानुप्रासवद् असमासं योगवृत्तिगर्भं च जगाद सा वैदर्भी रीतिः' इति वचनेनाभिहितः, कर्पूरमंजर्याम् 'वैदर्भी तथा मागधी स्फुरतु' इत्यादिना मागध्यपि रीतिः सूचिता, काव्यमीमांसायां साहित्यविद्यया विदर्भस्थवत्सगुल्मनगरे काव्यपुरुषस्य विवाहं विधाय-

'वाग्देवता वसति यत्र रसप्रसूति-

र्लीलापदं भगवतो मदनस्य यच्च।

प्रेङ्खद्विदग्धवनिान्वितराजमार्गं

तत् कुण्डिनं नगरमेष विभुर्बिभर्ति।।''

इति वचनेन वैदर्भी प्रति श्रद्धातिशयः प्रदर्शितश्च। महिमभट्टेनापि विवक्षितस्य अनुवाद्यविधेयभावस्य प्रतीतेरभावेन समासरहिता वैदर्भी एव प्रशंसिता व्यक्तिविवेके-

'विनोत्कार्षापककर्षाभ्यां स्वदन्तेऽर्था न जातुचित्।

तदर्थमेव कवयोऽलंकारान् पर्युपासते।

तौ विधेयानुवाद्यत्वविवक्षैकनिबंधनौ।

सा समासेऽसत्मायातीत्यसकृत् प्रतिपादितम्।।

अतएव च वैदर्भी रीतिरेकैव शस्यते।

यत समाससंस्पर्शस्तत्र नैवोपपद्यते।'' इति।

भोजेन 'रीङ् गताविति धातोः सा व्युत्पत्त्या रीतिरुच्यते6 इति रीतिपदं व्युत्पाद्य रीतिर्मार्गः पन्थाश्च कथिता आवन्तिकामागधीभ्यां सह षोढा उक्ताः, रीतिभेदानाम् आधारा गुणाः स्वीकृताश्च सरस्वतीकण्ठाभरणे। मम्मटेन वृत्तिशब्दने त्रिधा रीतिरुक्तेति पूर्वमभिहितम्। रुय्यकेणालंकारसर्वस्वे गुणाः संघटनापदवाच्याया रीतेरेव धर्माः प्रतिपादिताः। नरेन्द्रप्रभसूरिणा वृत्त्यप्रासनिरूपणप्रसंगे द्वादश रीतयः प्रतिपादिताः। कवर्गस्यावृत्त्या

कार्णाटी, चवर्गस्यावृत्त्या कौन्तली, तवर्गस्यावृत्त्या कौन्कणी, पवर्गस्यावृत्त्या वनवासिका, अन्तस्थवर्णावृत्त्या त्रावणी, ऊष्मणामावृत्त्या माधुरी, द्वयोस्त्रयाणां वा वर्गाणामावृत्त्या मात्सी, एकवर्गस्थवर्णद्वयावृत्त्या मागधी, स्वान्त्यसंयोगिवग्र्यवर्णावृत्त्या ताम्रलिप्तिका, सरूपसंयुक्तवग्र्यवर्णावृत्त्या ऊंड्री, असंयुक्तवर्णावृत्त्या पौण्ड्री चेति द्वादश रीतयोऽभिहिताः। एतज्जयमन्तमिश्ररचितायां काव्यात्ममीमांसां द्रष्टुं शक्यते। शारदातनयेन प्रसिद्धासु चतसृषु रीतिषु सौराष्ट्री द्राविडी चापि रीत्यौ योजिते, पंचाधिकशतसंख्यकानां रीतीनां सूचना दत्ता, किंतु वचनपुरुषदेशभेदन रीतिभेदानामानन्तयस्य संभवेन चतस्र एव रीतयः स्वीकार्या इति परामर्शोऽपि प्रक्तश्च। उक्तं भावप्रकाशने-

''तत्र वैदर्भ-पांचाल-लाट-गौडविभागतः।

सौराष्ट्री द्राविडी चेति रीतिद्वयमुदाहृतम्।

प्रतिवचनं प्रतिपुरुषं तदवान्तरजातितः प्रतिप्रीति।

आनन्त्यात् संक्षिप्य प्रोक्ताः कविभिश्चतुर्विधेत्येषा।

तासु पंचोत्तरशतं विधाः प्रोक्ता मनीषिभिः।' इति।

विश्वनाथेनापि साहित्यदर्पणे रीतिस्वरूपम् उक्त्वा चतस्र एव रीतयः स्वीकृता लक्षिताश्च। तत्र चतसृणां रीतीनां लक्षणमेवं विद्यते-

'पदसंघटना रीतिरंगसंस्थाविशेषवत्।

उपकत्री रसादीनां सा पुनः स्याच्चतुर्विधा।

वैदर्भी चाथ गौडी च पांचाली लाटिका तथा।

माधुर्यव्यंजकैर्वर्णै रचना ललितात्मिका।

अवृत्तिरल्पवृत्तिर्वा वैदर्भी रीतिरिष्यते।

ओजःप्रकाशकैर्वर्णैर्बन्ध आडम्बरः पुनः।

समासबहुला गौडी वर्णैः शेषैः पुनर्द्वयोः।

समस्तपंचषपदो बंधः पांचालिका मता।

लाटी तु रीतिर्वैदर्भीपांचाल्योरन्तरे स्थिता।'इति।

एवं रीतेर्बहुधा विकासो जातः। स्वरूप-संख्याधार-महत्वादिविषये काव्यशास्त्रे वैमत्यं विलोक्यते। 'गुणविशिष्टपदचना रीतिः (वामनः), वचनविन्यासक्रमो रीतिः

(राजशेखरः), रसस्योपकारिका पदसंघटना रीतिः (विश्वनाथः), पदविन्यासभंगी रीतिः (शिंगभूपालः), इति रीतिस्वरूपनिरूपणं वर्तते। रीतीनामाधारो मुख्यतो भाषा। रसोपकारस्य विवक्षिततत्वेनाऽर्थोऽपि गृहीत एव भवति। गुणाः, गुणाभिव्यंजका वर्णाः, समसश्चेति रीतिभेदस्याधारः। रीतिनाम्नामाश्रयो देशः। चतस्त्र एव रीतयः प्रायेण स्वीकृताः। तत्रापि त्रयाणां प्राधान्यं वर्तते। वामनस्य अमृतानन्दयोगिनश्च मते रीतिः काव्यस्यात्मा। अन्येषां मते तु काव्ये रीतेस्तदेव महत्वं यच्छरीरेऽगंसंस्थानस्य।

एवमिह समासेन रीतेरुद्गमो विकासश्च प्रदर्शितः। सम्प्रति दोषस्योद्भवविकासौ विचार्येते।

दोषस्योद्गमः

दोषाणां निरुपणमपि काव्यशास्त्रस्य विषयो वर्तते। काव्ये दोषा हेयाः सन्ति। ज्ञानं विनैषां परित्यागो न संभवति। सिद्धांतरूपेण स्वीकृतस्य काव्यात्मनो रसस्यापकर्षका ये भवन्ति ते श्रुतिकटुत्वादयः काव्यशास्त्रे दोषपदेन व्यपदिश्यन्ते। 'रसापकर्षका दोषाः' इति विश्वनाथेन दोषस्य लक्षणमभिहितम्। मम्मटभोजादिभिरदोषवेव शब्दार्थौ काव्यपदेन व्यपदिष्टौ। तस्मात् काव्ये दोषाभावो नितरामपेक्षितः। एकस्यापि दोषस्य सत्वे कविस्तेन सदोषेण काव्येन कुपुत्रेणेव पिता निन्द्यते, सदोषस्य काव्यस्य करणेन कवित्वलाभापेक्षयाऽकवित्वमेव वरं विद्यते, कुकवित्वं हि मरणं वर्तते चेति भामहः प्राह-

'सर्वथा पदमप्येकं न निगाद्यमवद्यवत्।

विलक्ष्मणा हि काव्येन दुःसुतेनेव निन्द्यते।

नाऽकवित्वमधर्माय व्याधये दंडनाय वा।

कुकवित्वं पुनः साक्षान्मृतिमाहुर्मणीषिणः।' इति।

(काव्यलंकारः 1/11-12)

एकेनापि दोषेण श्वित्रेण कान्तेव कविता दुर्भगा भवति, तादृशी कविता कवेरेव गोत्वं जाडयादि सूचयति चेति दंडी कथयति-

'गौर्गौः कामदुघा लोके सुप्रयुक्ता स्मृता बुधैः।

दुष्प्रयुक्ता पुनर्गोत्वं प्रयोक्तुः सैव शंसति।

तदल्पमपि नोपेक्ष्यं काव्यं दुष्टं कथंचन।

स्याद् वपुः सुंदरमपि श्वित्रेणैकेन दुर्भगम्।' (काव्यादर्शः 1/2/7)

दोषस्यापि मूलं वेदे द्रष्टुं शक्यते। 'एकः शब्दः सम्यग्ज्ञातः सुप्रयुक्तः स्वर्गे लोके च कामधुग् भवति' इति श्रुत्या सम्यग्ज्ञानं सुप्रयोगं च विना शब्दस्य दोषत्वम् अभीष्टस्यासाधकत्वं च सूचितम्। हन्धातोर्गमनार्थे सम्यग्ज्ञानपूर्वकः सुप्रयोगो नास्तीति पश्चादसमर्थत्वदोषः स्वीकृतः। 'दुष्टः शब्दः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह। स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात्' इति श्रुत्या दूषितशब्दप्रयोगस्यानिष्टकारणत्वं दृष्टान्तेन स्फुटमावेदितम्। कठोरवर्णघटितानां शब्दानां शृंगारादौ प्रयोगेऽनिष्टकारणत्वं पश्चात् स्वीकृतमेव। असुरा 'हेऽरयः' इत्यस्य स्थाने 'हेऽलयः' इति प्रयोगेण पराभूता इति महाभाष्ये दूषितशब्दप्रयोगस्यानिष्टहेतुत्वं स्फुटमावेदितम्। 'सक्तुमिव तिउन पुनन्तो यत्र धीरा मनसा वाचमक्रत' इति श्रुत्या व्याकरणादिभिः परिशुद्धस्यैव शब्दस्य प्रयोगस्यानुमत्या तथा प्रयोगाभावे च्युतसंस्कृतित्वादीनां बीजं सूचितम्। भगवता पाणिनिना 'षष्ठया आक्रोशे' इति सूत्रेणाक्रोशार्थे षष्ठया अलुकं शासता समासे एकार्थीभावेन विवक्षितविधेयभावस्य प्रतीतेरभावेन समासे विधेयाविमर्शः सूचितः। 'कृंचानुप्रयुज्यते लिटि' इति सूत्रे व्यवहितस्य लिट्परस्य भवत्यादेः प्रयोगस्य वारणायाऽनुशब्दः प्रयुक्तः। तेन 'कला च सा कान्तिमती कलावतस्त्वमस्य लोकस्य च नेत्रकौमुदी' इत्यत्र चकारस्याऽस्थाने प्रयोगेण क्रभेदरूपोऽक्रमरूपो वा काव्यशास्त्रीयो दोषो ध्वनितः। कात्यायनेन 'कर्मधारय-मत्वर्थीयाभ्यां बहुव्रीहिर्लघुत्वात्' इति वात्रिकेन 'पीताम्बरवान्' इति प्रयोगो निषिद्धः। 'पीतम् अम्बरं यस्य स पीताम्बरः' इति बहुव्रीहिसमासेनैव मतुबर्थस्य लाभेन मतुप्प्रयोगे पौनरुक्त्यदोषो ध्वनितः। 'स्वामीश्वराधिपतिदायादसाक्षिप्रतिभूप्रसूतैश्च' इति सूत्रेण स्वामिप्रभृतीनां योगे षष्ठी सप्तमी च विहिता। तेन 'गवाम् अश्वानां च स्वामी, गोषु अश्वेषु च स्वामी' इति प्रयोगद्वयं साधु मन्यते। किंतु भाष्यकारेण 'कृंचानुप्रयुज्यते लिटि' इति सूत्रे 'नहि भवति गोषु वाश्वानां स्वामी' इत्येकत्र सप्तमी, अन्यत्र षष्ठी च निषिद्धा। एतस्यायमेवाशयो वर्तते यद् यदा षष्ठया प्रारंभः करणीयस्तदा षष्ठयैव समापनीयम्, यदा तु सप्तम्या प्रारंभस्तदा सत्पम्यैव समापनीयम्। येन प्रक्रमस्तेनैव समाप्तिरिति सामान्येन सूचनाद् 'उदेति सविता ताम्रस्ताम्र एवास्तमेति च' इत्यादौ द्वितीयताम्रशब्दस्य स्थाने रक्तादिशब्दप्रयोगे भग्नप्रक्रमत्वदोषो ध्वनित एव। 'ईषदसमाप्तौ कल्पब्-देश्य-देशीयरः' इति सूत्रेण ईषदसमाप्तौ = सादृशार्थे कल्पप्, देश्यः, देशीयर् चेति त्रयः प्रत्यय विधीयन्ते। शंका भवति यत् सादृश्यं 'गुडकल्पा द्राक्षा' इत्यत्र गुडरूपप्रकृत्यर्थस्य विशेषणं भवति, अथवा प्रत्ययार्थस्य सदृशद्राक्षादेरिति प्रश्नौ भवतः। तत्र यदि प्रकृत्यर्थस्य विशेषणं मन्यते तदा 'गुडकल्प' इति प्रत्याान्तात् टाप् प्रत्ययो न प्राप्नोति, उक्तस्य 'गुडकल्पा' इति प्रयोगस्यासंगतिश्च भवति। टापोऽभावे 'गुडकल्पम् द्राक्षा' इति प्रयोगे सति गुडस्य द्राक्षयाऽभेदान्वये रूपकं प्राप्नोति। यदा तु प्रत्ययार्थस्य विशेषणं मन्यते तदा 'गुडकल्पा द्राक्षा = गुडसदृशी द्राक्षा' इति सत्युपमा भवति। तत्र भाष्यकृता सादृश्यं प्रत्ययार्थस्यैव

विशेषणं स्वीकृत्य 'प्रकृत्यर्थे चेल्लिंगवचनानुपपत्तिः...सिद्धं तु तत्संबंध उत्तरपदार्थे प्रत्ययवचनात्' इत्यादिनोपमा सूचिता। एवमुपमास्वीकारेण वाच्यावचनरूपो रूपकस्वीकारेऽवाच्यवनरूपश्चेति महिमभट्टसम्मतं दोषद्वयं सूचितम्। एतत् सर्वं व्यक्तिविवेकस्य द्वितीयविमर्शस्य प्रारंभे रुय्यककृते व्याख्याने स्पष्टम्।

एवं दोषस्योद्गमो वेदाद् व्याकरणाच्चेति वक्तुं शक्यते।

दोषस्य विकासः

काव्यशास्त्रे दोषविवेचनं भरतस्य नाटयशास्त्रमारभ्य प्रवर्तते। भरतस्य नाटयशास्त्रे गूढार्थम्, अर्थान्तरम्, अर्थहीनम्, भिन्नार्थम्, एकार्थम्, अभिप्लुतार्थम्, न्यायापेतम्, विषयापेतम्, विसंधि, शब्दच्युतं च। यथा-

'गूढार्थमर्थान्तरमर्थहीनं भिन्नार्थमेकार्थमभिप्लुतार्थम्।

न्यायादपेतं विषयं विसंधि शब्दच्युतं वै दश काव्यदोषाः।'' इति।

भामहेनापि नेयार्थ-क्लिष्ट-अन्यार्थ-अवाचक-अयुक्तिमत्-गूढशब्दाभिधाननामकाः षड् अर्थदोषाः, श्रुतिदुष्ट-अर्थदुष्ट-कल्पनादुष्ट-श्रुतिकष्टरूपाश्चत्वारः पददोषाश्चेति दश दोषाः, सन्निवेषविशेषेण तेषां क्वचिद् अदोषत्वं चाभिहितम्। दण्डिनापि दशैव दोषाः स्वीकृताः, किंतु तेषां नामानि क्वचिद् भिद्यन्ते। यथा-

'अपार्थ व्यर्थमेकार्थं ससंशयमपक्रममम्।

शब्दहीनं यतिभ्रष्टं भिन्नवृत्तं विसंधिकम्।

देश-काल-कलालोक-न्यायागम-विरोधि च।

इति दोषा दशैवेति वर्ज्याः काव्येषु सूरिभिः।।'

(काव्यार्शः 3/125-126)।

उक्तैराचार्यैर्दोषस्य साधारणं लक्षणं यद्यपि न प्रस्तुतं तथापि काव्यविघातकत्वरूपं लक्षणं सूचितमेव। वामनेन 'गुणविपर्ययात्मनो दोषाः' इति साधारणं लक्षणं विधाय गुणवैपरीत्यरूपं साधारणं दोषाणां स्वरूपं कथितम्। वामनेन असाधु-कष्ट-ग्राम्य-अप्रतीत-अनर्थकरूपाः पंच पददोषाः, अन्यार्थ-नेयार्थ-गूढार्थ-अश्लील-क्लिष्टरूपाः पंचार्थदोषाः, भिन्नवृत्त-यतिभ्रष्ट-विसंधिस्वरूपास्त्रयो वाक्यदोषाः, व्यर्थ-एकार्थ-संदिग्ध-अप्रयुक्त-लोकविरुद्ध-विद्याविरुद्धरूपः षड् वाक्यार्थदोषाश्च प्रतिपादिताः एषामदोषतादिरूपस्य दोशांकशस्यापि निरूपणं कृतं च। आनन्दवर्धनेन प्रसंगवशेन 'विरोधिरससम्बन्धिविभावादिपरिग्रहः' इत्यादिना रसदोषाः कथिताः, 'अनौचित्यादृते नान्यद् रसभंगस्य कारणम्' इति वचनेनानौचित्यमेव रसभंगस्य ममूलभिहितम्, तेन 'रसभंगकारणमनौचित्यं दोषः'

इति दोषलक्षणं सूचितम्, 'श्रुतिदुष्टादयो दोषा अनित्या ये च दर्शिताः' इति कथनेन नित्यानित्यरूपो दोषविभागो ध्वनितः। रुद्रटेन 'अन्यूनाधिकवाचकसुक्रमपुष्टार्थशब्दचारुपदम्। क्षोदक्षममक्षुण्णं सुमतिर्वाक्यं प्रयुंजीत।' इति वाक्यप्रयोगस्य नियमं प्रतिपादयताऽधिकपदत्वादयो पदवाक्यसाधारणा दोषाः सूचिताः, पुनरसमर्थत्वादयो दोषाः, वाक्यमात्रगताः संकीर्णगर्भितत्वादये निरूपिताश्च। एवमग्रे तेनाऽहेतुप्रभृतयोऽर्थदोषा अपि कथिताः। कुंतकेन यद्यपि दोषस्य सविस्तरं निरूपणं न कृतम्, तथापि तेन गुणनिरूपणेन गुणाभावे दोषो ध्वनितः, 'वाक्यस्याप्येकदेशेऽप्यौचित्यविरहात् तद्विदाह्लादकारित्वहानिः' इति कथनेनानौचित्यं दोष इति दोषस्य स्वरूपं सूचितमेव। अग्निपुराणे 'उद्वेगजनको दोषः सभ्यानाम्' इति दोषसामान्यं लक्षितं 'वक्तृवाचकवाच्यानाम् एकद्वित्रिनियोगतः' इति कथनेन वक्तृगतो वाचकगतो वाच्यगतश्चेति दोषस्त्रिधा विभक्तः, दोषान्तरेण सह कवेः सन्देहग्रस्त-अविनीत-अज्ञ-ज्ञातृरूपेण विद्यमानतया वक्तृदोष निरूपिताश्च। महिमट्टेनानौचित्यं निरूपयता मुख्यतया विधोयाविमर्श-प्रक्रमभेद-क्रमभेद-पौनरुक्त्य-वाच्यावचनरूपाः पंच दोषास्तथा पुनरवाच्यवचनरूपः षष्ठोऽपि भेदः स्वीकृतः। भोजेन दोषः सरस्वतीकंठाभ्रणे त्रिधा विभक्तः-पदगतः, वाक्यगतः, वाक्यार्थगतश्च, तेषु प्रत्येकं दोषः षोडशधा विभक्तः। मम्मटेन विश्वनाथेन च दोषनिरूपणाय काव्यप्रकाशे साहित्यदर्पणे च प्रकरणविशेष एव निर्मितः। काव्यप्रकाशे 'मुख्यार्थहतिर्दोषो रसश्च मुख्यस्तदाश्रयाद् वाच्यः। उभयोपयोगिनः स्युः शब्दाद्याः तेन तेष्वपि सः' इति वचनेन, साहित्यदर्पणे 'रसापकर्षका दोषाः ते पुनः पंचधा मताः। पदे तदंशे वाक्येऽर्थे संभवन्ति रसेऽपि यत्।' इति कथनेन च रसापकर्षकत्वरूपं दोषसामान्यलक्षणं दोषस्य पंच भेदाश्चेति प्रतिपादितम्। तत्र श्रुतिकटुत्वादयः 16 पददोषाः, एतेषु केचन च्युसंस्कारदिभिन्नाः वाक्यदोषाः अपि, तत्रापि केचन पदांशदोषाश्च संभवन्ति, उपहतविसर्गतादयः 21 वाक्यमात्रगता दोषाः, अपुष्टत्वादयः 23 अर्थदोषाः, स्वशब्दवाच्यत्वादयः 13 रसदोषाश्च प्रतिपादिताः। उक्तेषु दोषेषु केषांचन क्वचिद् दोषाभावरूपत्वं कवचिच्च गुणरूपत्वमपि तत्र काव्श्प्रकाशादौ प्रतिपादितम्। रसगंगाधरे यद्यपि दोषनिरूपणं सविस्तरं न लभ्यते तथापि प्रथमानने रसनिरूपणप्रसंगे केचन दोषाः सूचिता एव। एवं काव्यशास्त्रे दोषनिरूपणस्य विकासो नानाप्रकारैरभूत्। अस्य मूलं वेद आरंभश्च नाटयशास्त्रं वर्तते। अनौचित्यमेव वस्तुतो दोषस्य मूलम्। सर्वे दोषा अनौचित्यस्यैव प्रकाराः सन्ति। वामनमते दोषा गुणविपर्ययरूपाः। किंतु समान्येन वक्तुं शक्यते यद् आनन्दस्य रसस्य वाऽपकर्षकत्वं दोषस्य साधारणं लक्षणम्। अत्र न कश्चन विवादः। यत्र तु न तदपकर्षत्वं तत्र न तेषां श्रुतिकटुत्वादीनां दोषत्वम्, प्रत्युत वीरादौ गुणत्वम्। एतदाधारेणैव दोषा द्विधा विभक्ताः- नित्या अनित्याश्च। ये सर्वत्र दोषा एव ते च्युतसंस्कारत्वादये नित्याः, ये तु क्वचिद् दोषाभावरूपा गुणरूपा वा तेऽनित्याः। दोषाणां विभागस्याधाराः षोढा सन्ति-वक्ता, पदांशः, पदम्, वाक्यम्, अर्थः, रसश्च। तत्र

वक्तृरूप आधारोऽग्निपुराण एव लभ्यते, अन्यत्र स न स्वीकृतः। अतः पदांशाद्याधारेण दोषाः पंचधा स्वीकृताः। दोषस्य सत्वे काव्यत्वं न संभवतीति भामहमम्मटादीनां मतम्। साहित्यदर्पणरसंगाधरादौ तु रसाद्यनुगमे सति काव्यत्वमंगीकृतम्। 'दुष्टं काव्यम्' इति व्यवहारः सदोषेऽपि वाक्ये शब्दार्थयुगले वा काव्यत्वस्य साधको वर्तते। उक्तम्-

'कीटानुविद्धरत्नादिसाधारण्येन काव्यता।

दुष्टेष्वपि मता यत्र रसाद्यनुगमः स्फुटः।' इति।

काव्यशास्त्रस्य प्रस्थानानि

यथाऽस्मिन् शरीरे सारभूतस्यात्मनो गवेषणाय प्रवृत्तेषु दर्शनेषु नाना प्रस्थनानि प्रवृत्तानि तथा काव्ये सारस्य तत्वस्यान्वेषणाय काव्यशास्त्रेऽपि। तानि प्रस्थनानानि सम्प्रदायशब्देनापि निगद्यन्ते, तथापि प्रस्थानशब्द एव समीचीनो वर्तते। तानि प्रस्थनानि षट् सन्ति-रसप्रस्थानम्, अलंकारप्रस्थानम्, रीतिप्रस्थानम्, ध्वनिप्रस्थानम्, वक्रोक्तिप्रस्थानम्, औचित्यप्रस्थानम् च। एषां परिचयोऽत्र क्रमेण दीयते-

रसप्रस्थानम्

अस्य प्रवर्तको भरतमुनिर्वर्तते। अनेन रसं विना नाटये काव्ये वा कस्यचिदप्यर्थस्य प्रवृत्तिर्न स्वीकृता। 'न हि रसादृते कश्चिदप्यर्थः प्रवर्तते' इति हि तस्य वचनं वर्तते। काव्ये नाटये च शब्दार्थगुणालंकारादीनाम् अभिनयादीनां च विधानं रसायैव भवति। रसं विनैषां न कश्चनाऽप्युपयोगः संभवति। अतः काव्यस्य नाटयस्य वा रस एवाऽऽत्माऽस्मिन् प्रस्थाने स्वीक्रियते। अग्निपुराणेऽपि 'वाग्वैदग्ध्यप्रधानेऽपि रस एवात्र जीवितम्' इति वचनेन रसस्य काव्यात्मता स्पष्टमभिहिता। आनंदवर्धनेन, अभिनवगुप्तेन, मम्मटेन, विश्वनाथेन, पंडितराजेन च काव्ये रसस्यैव प्राधान्यमंगीकृतम्। यद्यपि ध्वन्यालोके 'काव्यस्यात्मा ध्वनिः' इति कथनेन सामान्येन वस्त्वलंकाररसरूपस्य त्रिविधस्य ध्वनेः काव्यात्मता प्रतिपादिता तथापि वस्त्वलंकारध्वन्यो रस एव पर्यवसानमभिधाय रसस्य काव्यात्मता स्पष्टमेव प्रतिपादिता। 'काव्यस्यात्मा स एवार्थः' इति ध्वनिकारिकाया व्याख्यानेऽभिनवगुप्तेन रसस्यैव काव्यात्मत्वं सयुक्तिकं प्रतिपादितम्। मम्मटेन 'मुख्यार्थहतिर्दोषो रसश्च मुख्यः' इति दोषसामान्यस्य लक्षणे रसस्य कृते मुख्यशब्दस्य प्रयोगेण रसस्यैव काव्ये प्राधान्यमभिहितम्। 'वाक्यं रसात्मकं काव्यम्' इति काव्यलक्षणं कुर्वता 'काव्यस्य शब्दार्थौ शरीरम्, रसादिश्चात्मा, गुणाः शौर्यादिवत्, दोषाः काणत्वादिवत्, रीतयोऽवयवसंस्थानवत्, अलंकाराः कटकुंडलादिवत्' इति कथयता च रसस्य काव्यात्मत्वं प्रतिपादितम्। पंडितराजेन रसध्वनिरेव परमरमणीय उक्तः। ध्वनिविरोधी महिमभट्टोऽपि 'काव्यस्यात्मनि संज्ञिनि रसादिरूपे न कस्यचिद् विमतिः' इति कथनेन रसप्रस्थनमेव

समर्थितम्। एवं रसप्रस्थाने रस एव काव्यस्यात्मा स्वीकृत:।

अलंकारप्रस्थानम्

अलंकारप्रस्थानेऽलंकार एव काव्यस्यात्मा स्वीक्रियते। अस्य प्रस्थानस्य समर्थका भामह-दण्डि-उद्भट-रुद्रटप्रभृतय: सन्ति। भामहेन 'न कान्तमपि निर्भूषं विभाति वनिताननम्' इत्यादिना काव्येअलंकारस्य प्राधान्यं प्रतिपादितम्। अलंकारं विना कश्चनाप्यर्थो विभावतां नाधिगच्छति। वक्रोक्तिपदवाच्याऽतिशयोक्ति: सर्वेषाम् अलंकाराणामात्मतया 'सैषा सर्वत्र वक्रोक्ति: कोऽलंकारोऽनया विना' इत्यादिना व्यवस्थापिता। दण्डिनाऽलंकारस्य 'काव्यशोभाकरान् धर्मान् अलंकारान् प्रचक्षते' इति कथनेन काव्यशोभाजनकत्व-मभिधाय महत्वं प्रकटितम्। अलंकारप्रस्थाने भरतेन स्वीकृतमपि रसस्य काव्यात्मत्वं नाटयदृष्टयाऽभिमतम्। अलंकारप्रस्थाने रसो रसवदाद्यलंकाररूप एव स्वीकृत:, सर्वे प्रतीयाना अर्था अलंकारकुक्षावेव प्रवेशिता:। एवममिह रसस्याप्यलंकारतैव वर्तते। 'रसवद्दर्शितस्पष्ट श्रृंगारादिरसोदयम्' इत्यादिना रस: प्रकारान्तरेण लक्षित:। समग्रस्य काव्यशास्त्रप्रस्थानस्य सारम् उपन्यस्यन् रुय्यकोऽलंकारसर्वस्वेऽलंकारप्रस्थानविषय एवं वदति- ''इह हि तावद् भामहोद्भटप्रभृतय: चिरंतनालंकारकारा: प्रतीयमानं वाच्योपस्-कारकतया अलंकारपक्षनिक्षिप्तं मन्यन्ते।

तथाहि-पर्यायोक्त-अप्रस्तुतप्रशंसा-समासोक्ति-आक्षेप-व्याजस्तुति-उपमेयोप-मा-अनन्वयादौ वस्तुमात्रं गम्यमानं वाच्योपस्कारकत्वेन -स्वसिद्धये पराक्षेप: परार्थं स्वसमर्पणम्' इति यथायोगं द्विविधया भंगया प्रतिपादितं तै:। रुद्रटेन तु भावालंकारो द्विधै-वोक्त:। रुपक-दीपक-अपहुन्नति-तुल्ययोगितादौ उपमाद्यलंकारो वाच्योपस्कारकतयैव उक्त:। उत्प्रेक्षा तु स्वयमेव प्रतीयमाना कथिता। रसवत्प्रेय:प्रभृतौ तु रसभावादि: वाच्य-शोभाहेतुत्वेन उक्त:। तदित्थं त्रिविधमपि प्रतीयमानम् अलंकारतया ख्यापितमेव।...... उद्भटादिभिस्तु गुणालंकाराणां प्रायश: साम्यमेव सूचितम्। विषयमात्रेण भेदप्रतिपादनात्। संघटनाधर्मत्वेन चेष्टे:। तदेवमलंकारा: काव्ये प्रधानमिति प्राच्यानां मतम्।'' इति।

रीतिप्रस्थानम्

रीतिप्रस्थानस्य प्रवर्तको वामन:। अनेन काव्यालंकारसूत्रे 'रीतिरात्मा काव्यस्य' इत्यभिधाय वैदर्भी-गौडी-पांचालीरूपाया: त्रिविधाया रीतेरेव काव्यात्मत्वं प्रतिपादितम्। तिसृषु रीतिषु काव्यं तथैव समवेतं भवति यथा रेखासु चित्रम्। उक्तम् 'एतासु तिसृषु रीतिषु रेखास्विव चित्रं काव्यं प्रतिष्ठितम्' (काव्यलालंकारसूत्रे 1.2.13) इति। रुय्यक: प्रस्थानमिदमेवं प्रतिपादयति ''वामनेन तु सादृश्यनिबंधनाया लक्षणाया वक्रोक्त्यलंकारत्वं ब्रुवता कश्चिद् ध्वनिभेदोऽलंकारतयैवोक्त:। केवलं गुणविशिष्टपदरचनात्मिका रीति: काव्यात्मवेनोक्ता।' इति। अमृतानंदयोगिनापि 'रीतिरात्माऽत्र काव्यस्य कथ्यते सा

चतुर्विधा' इति कथनेन रीतिप्रस्थानमेव समर्थितं लाटीसहिताश्चतस्रो रीतयः प्रतिपादितश्च।

ध्वनिप्रस्थानम्

ध्वनिप्रस्थानस्य प्रवर्तक आनंदवर्धनो ध्वन्यालोके 'काव्यस्यात्मा ध्वनिः' इत्यभिधाय ध्वनिमेव काव्यस्यात्मानं स्वीकरोति। तस्य ध्वन्यालोके ध्वनिशब्दस्य प्रयोगः पंचस्वर्थेषु कृतः-व्यंजकः शब्दः, व्यंजकोऽर्थः, व्यंजना व्यापारः, व्यंग्यार्थः, व्यंग्यप्रधानं काव्यं च। ध्वनिशब्दस्यैतादृगर्थकरणे स्फोटवादिनो वैयाकरणा मूलम्। तत्रात्मार्थे ध्वन्यालोके प्रयुक्तो ध्वनिशब्दो व्यंजनाबोध्यस्य व्यंग्यार्थस्य बोधकः। स व्यंग्यार्थस्त्रिधा भवति - वस्तु, अलंकारः, रसश्च। तत्र ध्वनिकृता रस एव मुख्यरूपेण काव्यस्यात्मा कथितः। वस्तुनोऽलंकारस्य च रसस्योद्दीपनविभावत्वेन रस एव पर्यवसानं कथितम्। एवं सत्यपि ध्वनिप्रस्थानं रसप्रस्थानाद् ईषद् भिद्यते। ध्वनिप्रस्थाने प्रकाशकेन सह प्रकाशविषयतापत्तिरूपाया व्यक्तर्महत्वं प्रतिपादितदम्। 'स्वज्ञानेनान्यधीहेतुः सिद्धेऽर्थे व्यंजको मतः, स्वरूपं प्रकशयन्नेव परावभासको व्यंजक उच्यते, नहिं व्यंग्ये प्रतीयमाने वाच्बुद्धिर्दूरीभवति' इत्यादिवचनैर्व्यंजकस्वरूपनिर्णयद्वारा व्यंजनायाः स्वरूपं प्रतिपादितम्। ध्वन्यालोकस्य तृतीय उद्योते व्यंजनायाः सत्ता सप्रमाणं साधिता। रसे रसत्वं तदैव संभवति यदा रसो व्यंजनयोपस्थाप्यते। तस्य स्वशब्देनोपस्थापने दोषापत्त्या रसत्वं न संभवति।

विभावादिभिर्व्यज्यमान एव स्थायी रसत्वं लभते, न तु वाच्यः सन्। उद्भटेन रसस्य बोधः पंचधा प्रतिपादितः - कामकन्दर्प - श्रृंगारादिस्वशब्देन, रत्यादिरूपस्थायिना, संचारिणा, विभावेन, अभिनयेन च। उक्तं काव्यालंकारसारसंग्रहे-

'रसवद्दर्शितस्पष्ट श्रृंगारादिरसोदयम्।

स्वशब्दस्थायिसंचारिविभावाभिनयास्पदम्।'इति

ध्वनिप्रस्थाने रसस्य स्वशब्दवाच्यत्वं निराकृतम्। व्यंजनाया इदमेव माहात्म्यं यद् येऽलंकारा वाच्यदशायां काव्यस्य शरीरीभवनेऽपि योग्या न भवन्ति ते व्यंजनया बोध्यमानाः परां शोभां बिभ्राणाः काव्यात्मतुल्या भवन्ति। उक्तं ध्वन्यालोके-

'शरीरीकरणं येषां न वाच्यत्वे व्यवस्थितम्।

तेऽलंकाराः परां छायां यान्ति ध्वन्यगतां गताः।'इति।

यद्यपि ध्वनिपदवाच्यस्य व्यंजनाव्यापारस्य महत्वं प्रतिपादितम्, तथापि व्यापारस्य विषयमुखैनैवात्मलाभात् प्रतीयमानस्य तत्रापि रसस्यैव च प्राधान्यं ध्वनिप्रस्थाने स्वीकृतम्। रस एव हि सहृदयानां चरमविश्रामस्थानं भवति। रसोऽलंकार्य एवोक्तः। तस्याप्राधान्ये रसादीनामलंकारतेति कथनेन भामहादिप्रतिपादितं रसस्य सर्वत्रालंकारत्वं निराकृतम्। उक्तम्-

'प्रधानेऽन्यत्र वाक्यार्थे यत्रांगं तु रसादय:।

काव्ये तस्मिन्नलंकारो रसादिरित मे मति:।'' इति।

अस्य प्रस्थानस्य विषये रुय्यकेण कथितम्- 'व्यापारस्य विषयमुखेन स्वरूपप्रतिलम्भात् स्वरूपेण विदितत्वाभावाद् विषयस्यैव समग्रभरसहिष्णुत्वम्। तस्माद् विषय एव व्यंग्यनामा जीवितत्वेन वक्तव्य:। यस्य गुणालंकारकृतचारुत्वपरिग्रहसाम्राज्यम्। रसादयस्तु जीवितभूता नालंकारत्वेन वाच्या:। अलंकाराणाम् उपस्कारकत्वाद् रसादीनां च प्राधान्येनोपस्कार्यत्वात्।'' इति।

ध्वनिप्रस्थानस्य नैके विरोधिनो वर्तन्ते। भट्नायकेन ध्वनिं निराकर्तुं हृदयदर्पणन्-ाामको ग्रंथ: प्रणीत:, य: सम्प्रति न लभ्यते, किंतु तन्मतलंकारग्रंथेषु लभ्यते। तन्मतेन त्रयो व्यापारा: - अभिधा भावकत्वं भोजकत्वं च। भोजकत्वव्यापारस्य प्राधान्यं तेन रसस्य भोगश्च भवति, नतु व्यंग्यत्वम्। तत्र विषयमुखेनैव व्यापारस्य स्वरूपस्य सिद्धया विषयस्य रसस्यैव प्राधान्यं समीचीनम्, भोजकत्वं तु व्यंजनान्न पृथक्, केवलं नाममात्रेण भेदो वर्तते।

रुय्यकेणास्य मतमेवमालोचितम् - 'भट्टनायकेन तु व्यंग्यव्यापारस्य प्रौढोक्त्या अभ्युपगतस्य काव्यांशत्वं ब्रुवता न्यग्भावितशब्दार्थस्वरूपस्य व्यापारस्यैव प्राधान्यमुक्तम्। तत्रापि अभिधाभवकत्वलक्षणव्यापारद्वयोत्तीर्णो रसचर्वणात्मा भेगापरपर्यायो व्यापार: प्राधान्येन विश्रान्तिधामतयाऽगीकृत:।'' इति। महिमभट्टेन सर्वस्य व्यंग्यस्यानुमेयता प्रतिपादिता। तन्मतेन वाच्य-प्रतीयमानयोर्युगपत् सहभावेन वा प्रतीतेरभावेन काव्ये व्यंजनाया असंभव उक्त:। व्यंग्यप्रतीतिकाले वाच्यप्रतीतेरपि स्वीकारेण व्यक्तिविवेकव्याख्याने काव्ये व्यंजना साधिता, वाच्यप्रतीयमानयो: तादात्म्य-तदुत्पत्त्योरभावेन अनुमानं काव्ये निराकृतम्। 'कुन्तकोऽपि विचित्राभिधारूपां वक्रोक्तिं काव्यजीवितं प्रतिपाद्य ध्वनिविरोध: कृत:। अलंकारसर्वस्वस्य टीकायां जयरथेन द्वादश ध्वनिविरोधिन: सूचिता:। एवं ध्वनिविरोधे सत्यपि अभिनवगुप्त-मम्मट-रुय्यकादिभिर्ध्वनिविरोधस्य निराकरणेन ध्वनिप्रस्थानं प्रतिष्ठापितम्।

वक्रोक्तिप्रस्थानम्

प्रसिद्धात् कथनप्रकाराद् भिन्न: कथनस्य चमत्कारी प्रकार: कुन्तकेन वक्रोक्तिरभिहिता। 'प्रसिद्धप्रस्थानातिरेकिणी विचित्राऽभिधा वक्रोक्ति:' इति तस्य सिद्धांत:। सैव वक्रोक्ति: काव्यस्यात्मा 'वक्रोक्ति: काव्यजीवितम्' इति वक्रोक्तिजीविते वचनेन निरूपित:। असौ वक्रोक्तिरवे शब्दार्थरूपस्य काव्यस्य मुख्योऽलंकार: प्राणभूतश्च। वस्तुतो वक्रोक्तिविशिष्टौ एव शब्दार्थौ काव्यम्, न तु काव्ये वक्रोक्तिरूपस्यालंकारस्य

योग:। विवेचनाय त्वलंकारस्य अलंकार्यस्य च काल्पनिको विभाग: क्रियते। उक्तं कुन्तकेन -

'अलंकृतिरलंकार्यपोद्धृत्य विवेच्यते।

तदुपायतया तत्वं सालंकारस्य काव्यता।।'' इति।

कविव्यापाररूपाया वक्रोक्ते: वर्णविन्यासवक्रतादय: षड् भेदा: 'कविव्यापारवक्रत्वप्रकारा: संभवन्ति षट्। प्रत्येकं बहवो भेदा: तस्य विच्छित्तिशोभिन:। वर्णविन्यासवक्रत्वम्,,,,'' इत्यादिना स्वीकृता: सकला ध्वनिभेदा अत्रैवान्तर्भाविताश्च। एवं कुन्तकोऽपि भट्टनायकवत् काव्ये व्यापारविशेषस्यैव प्राधान्यं वदति। उक्तं रुय्यकेण-''वक्रोक्तजीवितकार: पुन: वैदग्ध्यभंगीभणितिस्वभावां बहुविधां वक्रोक्तिमेव प्राधान्यात् काव्यजीवितम् उक्तवान्। व्यापारस्य प्राधान्यं च काव्यस्य प्रतिपेदे। अभिधानप्रकारविशेषा एव चालंकारा:।। सत्यपि त्रिभेदे प्रतीयमाने व्यापाररूपा भणितिरेव कविसंरम्भगोचर:। उपचारवक्रतादिभि: समस्तो ध्वनिप्रपंच: स्वीकृत:। केवलम् उक्तिवैचित्र्यजीवितं काव्यम्, न व्यंग्यजीवितम् इति तदीयं दर्शनम्।' इति एवं वक्रोक्तिप्रस्थानं वक्रोक्तिनामानं विचित्रामुक्तिमेव काव्यस्य जीवितं स्वीकरोति।

औचित्यप्रस्थानम्

औचित्यविचारस्य कर्ता क्षेमेन्द्र: काव्यस्यात्मानम् औचित्यं प्रतिपादितवान्। यद् यस्यानुगुणं भवति तत् तस्योचितं कथ्यते, उचितस्य भाव औचित्यमुच्यते। औचित्यं विना गुणालंकाररसादिषु गुणालंकारत्वादि वस्तुतोन सिद्धयति। उक्तं क्षेमेन्द्रेण-

'काव्यस्यालमलंकारै: किं मिथ्या गणितैर्गुणै:।

यस्य जीवितमौचित्यं विचिन्त्यापि न दृश्यते।

अलंकारास्त्वलंकारा गुणा एव गुणा: सदा।

औचित्यं रससिद्धस्य स्थिरं काव्यस्य जीवितम्।

उचितस्थानाविन्यासाद् अलंकृतिरलंकृति:।

औचित्यादच्युता नित्यं भवन्त्येव गुणा गुणा:।।''

इति। मेखला कटिप्रदेश एव शोभते, न तु कंठे न्यस्ता, उचितस्थाने एव विन्यासाद् अलंकारादि शोभते। रसगुणादेरौचित्यं प्राणतत्वमिति श्लोकेनेन औचित्यविचारचर्चायां प्रतिपादितम्-

''कंठे मेखलया नितम्बफलके तारेण हारेण वा

पाणौ नूपुरबंधनेन चरणे केयूरपाशेन वा।

शौर्येण प्रणते रिपौ करुणया नायान्ति के हास्यताम्

औचित्येन विना रुचिं न तनुते नाअलंकृतिर्नो गुणाः।।इति।

एवमौचित्यप्रस्थानम् औचित्यमेव काव्यस्यात्मानं मनुते।

उक्तेषु प्रस्थानेषु रसप्रस्थानमेवाधिकं समादृतं सयुक्तिकं च। अलंकारा गुणा रीतयो वक्रोक्तयो वस्त्वलंकारो ध्वनिर्व्यंजना औचित्यं चेति सर्वं रसार्थमेव भवति। रस एव सहृदयानां चरमविश्रान्तिस्थानम्। प्रधानस्य रसस्यालंकारत्वं न समीचीनम्। काव्यशरीरैकदेशेन पदेन सम्बद्धा पदसंघटनारूपा रीतिरात्मा कथं भवितुमर्हति? वक्रोक्तिरपि शब्दार्थाभ्यां सम्बद्धाऽलंकाररूपैव, न त्वलंकार्या। तस्या आश्रयणं चमत्काररूपरसप्रतीयते भवति। वस्तुध्वनिरलंकारध्वनिश्चोद्दीपनविभावत्वेन रसं प्रत्यंगमेव। व्यंजनापि साधनत्वेन रसं प्रत्यंगमेव भवति। यत्र क्वचिदपि रसस्य स्वशब्देनाभिधानं तत्रापि विभावादिद्वारेणैव प्रतीतौ चमत्कारो भवति। औचित्यस्यापि नियामकं रस एव। रसाश्रयेणैव दोषगुणालंकारव्यवस्था भवति। श्रुतिकटुत्वं श्रृंगाराद्यपेक्षमेव दोषः, वीराद्यपेक्षया गुणश्च भवति। शब्दार्थालंकारगुणादीनां काव्याअंगानां रसार्थमेव सत्त्वेन न प्रधानत्वम्। रस एव वस्तुतः। काव्यस्यात्मा सिद्धांतरूपेण स्वीक्रियते। यद्यपि रसः सहृदये तिष्ठति तथापि व्यंजकतासंबंधेन काव्येऽपि भवितुमर्हति, यथा विषयतासंबंधेनोत्प्रेक्षादयोऽर्थे विद्यमानत्वेन अर्थालंकारा उच्यन्ते, अन्यथा एषामपि संभावनादिज्ञानरूपाणां सहृदये वर्तमानत्वेन अथालंकारता न भवेत्। अतो ये वदनित यद् ''रसः सहृदये तिष्ठति, न तु काव्ये, ततस्तस्य काव्यात्मता न संभवति, अतोऽलंकारादिरेव काव्ये विद्यमानत्वेनात्मा मन्तव्यः।'' इति, तन्न समीचीनं प्रतिभाति। 'रसवत् काव्यम्, रसवन्तौ शब्दार्थौ' इति व्यवहारो व्यंजकतासंबंधेन रसस्य काव्ये सत्तां साधयति। अतो भरतेन प्रवर्तिता रसस्य काव्यात्मता सिद्धांतरूपेण समादृता।

विषयसंग्रह

एवं रीतेर्दोषस्य चोद्गमो तयोर्विकासः काव्यशास्त्रस्य प्रस्थानानि चेति सर्वमिह पाठे विचरितम्। रीति-दोषयोरुद्गमो वेदाद् मन्तुं शक्यते। भरतमारभ्य रीतिदोषयोः स्वरूपसंख्यादिविषये विकसो बहुधा बभूव। काव्यशास्त्रे रसः, अलंकारः, रीतिः, ध्वनिः, वक्रोक्तिः, औचित्यं वा मतान्तरेण काव्यात्मत्वेन स्वीकृतानि। अतः षट् प्रस्थानानि प्रवृत्तानि। तत्र रसप्रस्थानमेव सिद्धांतरूपेण स्वीकृतम्। भट्टनायक-कुन्तक-महिम्भट्टप्रभृतयो ध्वनिविरोधिनः सन्ति। भट्टनायकः कुन्तकश्च काव्ये क्रमेण भोजकत्वरूपं भंगीभणितिरूपं च व्यापारमेव प्रधानं स्वीकृतवन्तौ। किंतु विषयं विना व्यापारस्य

स्वरूपं निश्चेतुं न शक्यत इति तन्मतं न समीचीनम्। यद्यपि महिमभट्टेन विषयस्य रसस्य प्राधान्यं स्वीकृतं तथापि रसस्यानुमेयत्व भवितुं नार्हति। तयोरेव साध्यसाधनभावो भवति ययोस्तादात्म्यं कार्यकारणभावो वा भवति। काव्ये वाच्य-रसादिप्रतीयमानयोर्न तादात्म्यं भवति, नापि च कार्यकारणभावः, वाच्यं प्रतीयमानस्य न जनकं भवति, नापि च तस्य तेन तादात्म्यं वर्तते। अतो वाच्यरूपेण साधनेन रसादिरूपस्य साध्यस्यानुमानं कर्तुं न शक्यत इति रुय्यकेण प्रतिपादितम्। एतत् सर्वं पाठेऽत्र विचारितं वर्तते।

एवमस्मिन् पत्रे काव्यशास्त्रस्योद्गमो विकासश्च विचारितो वर्तते।

❖❖❖

## अध्याय : 2

# ध्वनि

## १.० प्रस्तावना

प्राचीनभारतीयवान्गम्ये अलंकारशास्त्रस्य पृथगेव वैशिष्टयं वरीवर्ति। अलंकारशास्त्रीया: अनेके ग्रंथा: विलिखिता: तैस्तैराचार्यै:। एतेषां समेषामलंकारग्रंथानामनुशीलनेन ज्ञायते यत् अलंकारशास्त्रस्य बहव: सम्प्रदाया: प्राचीनकाले प्रसिद्धा आसन्निति। सर्वेषामप्यालंकारशास्त्रविदुषां सम्मुखे प्रधानविवेच्यविषय आसीत्-काव्यस्य आत्मतत्वस्थानीयं किं भवति वस्तु ? इति। विषय एष एव सर्वदा, सर्वथा च विवेच्य आसीत् तेषाम्। काव्ये सत्सु अन्येष्वपि वस्तुषु कीदृशं वस्तु काव्ये वास्तविकं चैतन्मुद्भावयति ? किमस्ति तादृशं वस्तु यस्य उपस्थित्या अन्येषां काव्यशोभाकराणां वस्तूनामावश्यकता न भवति ? अस्य प्रश्नस्योत्तरप्रदाने एव अलंकारशास्त्रस्य नाना सम्प्रदायानमुत्पत्तिर्जाता।

केचन अलंकारा: एव काव्यस्य प्राणभूता इति प्रत्यपादयन्। अन्ये केचन गुणान् काव्यत्मभूतान् मन्नते अपरे केचिद्रीतिरेव काव्यात्मेत्युचु:। परंतु आचार्येणानंदवर्धनेन सर्वेषां सहृदयानामानन्दमभिवर्धयता प्रोक्तं यत् ध्वनिरेव काव्यस्यात्मेति।

पश्चात्काले ध्वनिसिद्धांतोऽयं बहुभिस्समादृतस्सन् लोकप्रियत्वमवाप। साहित्यशास्त्रे समग्रे सर्वाधिकविशिष्ट: ध्वनिसम्प्रदाय एव। यद्यपि ध्वनिसम्प्रदायात्रूमन्ये सम्प्रदाया: सिद्धांताश्रच काव्यतत्वाण्वेषणपरा आसन्, परंतु ते सर्वेऽपि ध्वनिसम्प्रदायस्योत्पत्यनन्तरं जीमूतान्तर्गतदिनकरप्रकाशतुल्या: जाता:। ध्वनिरेव ध्वस्तध्वान्तस्सन् प्रभाकरवत् साहित्याकाशे सततोज्ज्वलो जात:। अन्ये खलु रीतिरसालंकारवक्रोक्तय: ध्वनावेवान्तर्भूता अभवन्। ध्वनिसम्प्रदायप्रतिष्ठापनानन्तरं ये आचार्यास्समागतास्ते सर्वेऽपि ध्वनिसम्प्रदायस्यैवानुगान्तार:, तत्प्रशंसकाश्रचाभूवन्। यथा आचार्य मम्मट:। एते ध्वने: आधारेनैव काव्यं त्रिविधमिति प्रत्यपादयन्। साहित्यशास्त्रे शब्द: त्रिविध: भवतीति, अर्थोऽपि त्रिविध एवेति तैर्निरूपितम्।

ध्वनि: अलंकार: च

प्राचीनैराचार्यै: अलंकाराणामेव वैशिष्टयमवगतम्। वामानाचार्यै: उक्तं ''सौन्दर्यमलंकार:'' इति। परंतु ध्वनिवादिभिराचार्यै: सूक्ष्मविवेचनेन अलंकारास्तु शरीरस्थानीया: ध्वनिरेवात्मस्थानीय इति निरूपितम्। इत्थं साहित्यशास्त्र शरीरवादस्य प्रतिकूलररूपेण

आत्मवाद: प्रतिष्ठापति: इति प्रतिभाति। अनेनैव सदुद्देश्येन ध्वन्यालोकस्य रचना जाता। अस्य रहस्यस्योद्धघाटनं ध्वन्यालोकस्य व्याख्याने अभिवनगुप्तपादाचार्यै: कृतम्। तैरुक्तं यत् ''वाच्यसंवलाविमोहितहृदयैस्तु तत्पृथग्भावे विप्रतिपद्यते, यथा चार्वाकै: शरीरमेवात्मेति प्रतिपादितम् अपि च शरीरापेक्षया नान्यदस्तीति च तै: निर्दिष्टं, तथैव कैश्चिदालंकारिकै: वाच्यार्थसौन्दर्यविमोहितमानसै:, वाच्यमेव सर्वं, वाच्यापेक्षया नान्यत् किमपि भवति इत्यूचु:। ते खलु वाच्यव्यतिरेकिणो ह्यर्थस्य पृर्थगस्तित्वस्वीकारे सन्देहं प्राकटयन्।

ध्वन्यालोकग्रंथ: काव्यस्य आत्मतत्वाण्वेषणाय विरचित:, तस्यैव तत्वस्य महतीं प्रतिष्ठां प्रदातुमस्य ग्रंथस्य प्रयत्न:। यदेतत् आत्मस्थानीयं परमोत्कृष्टं रमणीयं च तत्वं विद्यते तत् वस्तुत: शब्दस्य चतुर्थकक्ष्यानिविष्ट: अर्थ:, स एव ''व्यंग्य'' इत्युच्यते। कविवाणी तदैव सफला भवति, यदा हि सा तस्य विशिष्टस्यार्थस्य वाहिका भविष्यति। विषयोऽयं आनंदवर्धनाचार्यपूर्ववर्तिभि: कैश्चित्प्रसिध्दैरालंकारिकै: स्पष्टतया नावगत: इति प्रतिभाति। तै: व्यंग्यार्थ: पर्यायोक्तादि-अनेक-अलंकारेषु यद्यपि अनुभूत: तथापित ते वाच्यार्थपेक्षया व्यंग्यार्थस्य चारुत्वे न विश्वसन्ति स्म। अनेन कारणेन व्यंग्स्यात्र स्थिति: सर्वदा वाच्यानुगतैवासीत्। वाच्यार्थस्पर्शलेशशून्ये रसभावादितत्वेऽपि ते रसवदलंकारतैवापादिता। यदि प्राणस्थानीयेऽस्मिन् तत्वे तेषां बुद्धि: प्रसारिता अभविष्यत् तर्हि ते एकस्य सारभूतस्य विषयस्य आविष्करमकरिष्यन्।

ध्वने: आविष्कार:

भारतीयसहित्यशास्त्रेऽतिहासे नूनं कार्यमिदम् आचार्येणानंदवर्धनेन कृतम्। साहित्यसिद्धान्तेष्वेव ध्वन्याख्य: कश्चन नवीन: शब्द: तै: प्रयुक्त:। ध्वनिस्तु प्रतीयमानार्थ एव। एवंस्थिते सोऽयं प्रतीयमानार्थ: प्राचीनानाम् आक्षेप-अप्रस्तुतप्रसंशा-समसोक्ति-व्याजस्तुत्यादि अलंकारेषु विद्यते एवेति तै: संकेतित:। रसगंगाधरकारेण तु पर्यायोक्तप्रकारेण विषयोऽयमंगीकृत:, तद्यथा ''ध्वनिकारात् प्रचीनैर्भामहोद्भटप्रभृतिभि: स्वग्रंथेषु कुत्रापि ध्वनिगुणीभूतव्यंग्यादिशब्दा: न प्रयुक्ता:। इत्येतावतैव तै: ध्वन्यादयो न स्वीक्रियन्ते इत्याधुनिकानां वाचोयुक्तिरयुक्तैव। अत: समासोक्ति-व्याजस्तुत्यप्रस्तुतप्रशंसा-द्यलकारनिरुपणे कियन्तोऽपि गुणीभूतव्यंगयप्रभेदास्तैरपि निरुपिता:। अपरम् च सर्वोऽपि व्यंग्यप्रपंच: पर्यायोक्तकुक्षौ निक्षिप्त:। न ह्यनुभवसिद्धोऽर्थो बालेनाप्यपह्नोतुं शक्यते। ध्वन्यादिशब्दै: परं व्यवहारो न कृत:। न ह्येतावता अनंगीकारो भवति। प्रधान्यादलंकार्यो हि ध्वनिरलंकारस्य पर्यायोक्तस्य कुक्षौ कथंकारं निविशतामिति तु विचारान्तरम्''।

आनंदवर्धनाचार्यैरपि विषयोऽयम् संसूचित एवासीत्, ''यद्यपि ध्वनिशब्दसंकीत्र्तनेन काव्यलक्षणविधायिभिर्गुणवृत्तिरन्यो वा न कश्चत्प्रकार: प्रकाशित:। तथापि अमुख्यवृत्या

काव्येषु व्यवहारं दर्शयता ध्वनिमार्गो मनाक् स्पृष्टोऽपि न लक्षित:'' (ध्वन्यालोक:) विषयेऽस्मिन् लोचनव्याख्यानमपि पठनीयं भवति।

ध्वने: विविधार्थेषु प्रयोग:

ध्वन्यालोके ध्वने: प्रयोग: पंचसु अर्थेषु कृत इति तद्ग्रन्थपरिशीलनेन ज्ञायते। ते यथा

१ व्यंग्यार्थ:

२ वाचकशब्द:

३ वाच्यार्थ:

४ व्यंजनाव्यापार:

५ काव्यम्

प्रोक्तमेवाचार्याभिनवगुप्तेन- ''अर्थो वा शब्दो वा व्यापारो वा अर्थोऽपि वाच्यो वा ध्वनतीति, शब्दोऽप्येवम्, व्यंग्यो वा ध्वन्यत इति। व्यापारो वा शब्दार्थयोर्ध्वननमिति। कारिकया तु प्राधान्येन समुदाय एव काव्यरूपो मुख्यतया ध्वनिरिति प्रतिपादितम्''। (लोचनम्) इत्थं विशदीकृत्य पुन: आचार्या: कथयन्ति यत् - ''तेन वाच्योऽपि ध्वनि: वाचकोऽपि शब्दो ध्वनि: द्वयोरपि व्यंजकत्वं ध्वनतीति कृत्वा सम्मिश्रयते विभावान्-ुभावसंवलयेति व्यंग्योऽपि ध्वनि:, ध्वन्यत इति कृत्वा। शब्दनं शब्द: शब्दव्यापार: न चासावभिधारूप: अपित्वात्मभूत: सोऽपि ध्वनि:। काव्यमितिव्यपदेश्यरूपोऽर्थ: सोऽपि ध्वनि:। उक्तप्रकारध्वनिचतुष्टयमयत्वात्''। (लोचनम्)

अनंतरमाचार्यै: एवोक्तम् - ''पंचधाऽपि ध्वनिशब्दार्थो - येन, यत्र, यतो, यस्य, यस्मै इति बहुव्रीह्यर्थाश्रयेण यथोचितं सामानाधिकरण्यं सुयोज्यम्। (लोचनम्)

ध्वनिकार:

ध्वनिसम्प्रदायस्यास्य प्रवर्तक: आचार्य आनंदवर्धन आसीत्। आचार्योऽयं न केवलं साहित्यशास्त्रस्य मर्मज्ञ: एव, परंतु परमधार्मिको भक्तश्चासीत्। अतएव स्वशास्त्रं मुक्तिद-ायकेन मंगलश्लोकेन समारब्धवान्। आचार्यस्य शैली एव-एतादृशी प्रभावशालिनी यत् शास्त्रयास्य पठितारस्सर्वेऽपि आचार्यै: प्रतिपादितं सिद्धान्तं स्वीकरिष्यन्त्येव। शास्त्रेऽस्मिन् आचार्यै: विविधैर्युक्तिभिर्ध्वनिसिद्धांत: प्रत्यपादि।

प्रतीयमानार्थ:

तत्रादौ प्रतिपादितं यत् काव्यस्य आत्मा ध्वनिरिति काव्यतत्वविद्भिराचार्यै: प्रागेव प्रतिपादितम्। न केवलं प्रतिपादितम् अपितु सम्यक्-रूपेण प्रकटीकृतम्। तथापि केचन

ध्वनिर्नामापूर्वं तत्वं किमपि नास्तीति ऊचु:। तदर्थमेव आचार्यै: ध्वने: स्वरूपं प्रतिपादितम्। अनेन सौंदर्यपूर्णेण प्रतिपादनेन सहृद्यानां मन: प्रीतिर्भवेदत्यिाचार्याणामभिप्राय:। ध्वनिर्नामक: इति विचार्यमाणे वाच्यादर्थात् भिन्न: चमत्कारपूर्ण: कश्चन नवीन: अर्थविशेष: एव ध्वनिरिति ज्ञातव्यम्। एतादृशेन सहृदयाह्लादकारिणा अर्थेन पूर्णं काव्यमेव ध्वनिकाव्यम्। आचार्यै: प्रतिपादितं यत् ''सहृदयश्लाघ्यस्य अर्थविशेषस्य भेदद्वयं भवति'' तद्यथा-

योऽर्थ: सहृदयश्लाघ्य: काव्यात्मेति व्यवस्थित:।

वाच्यप्रतीयमानाख्यौ तस्य भेदावुभौ स्मृतौ।

अयमेवार्थ: काव्यात्मरूपेण राजते। अर्थस्यास्य भेदद्वयं भवति, एक: वाच्य: अन्यश्च प्रतीयमान:। एवं स्थिते वाच्य: अर्थ: कीदृश:? तस्य के प्रकारा: भवन्ति? कथं च अयमर्थ: काव्यस्य जीवातुरूपेण प्रकाशते? इत्यादि विषया: अन्यै: पूर्ववर्तिभि: अलंकारवादिभिराचार्यै: विशदीकृता:। यतोहि तेषामचार्याणां मते वाच्य एव प्रधानतम:। अथ पुनरिमे विषया यदि प्रतिपाद्यन्ते, केवलं तत् चर्वितचर्वणं भविष्यति अथवा पिष्टपेषणं भविष्यति।

प्रतीयमानस्य पुन: अर्थस्य विषये अन्यै: पूर्ववर्तिभि: आचार्यै: नोक्तं किंचिद्। अथ-वा कथं वक्तुं शक्यते? इत्यपि चिन्तयितुं शक्यते। प्रतीयमान: कश्चन अर्थ: अस्तीति, स च काव्यस्य प्राणभूत इति वाच्यर्थसक्तमनस: कथं वा ज्ञातुं समर्था: भवेयु:? अत: आचार्यै: प्रतीयमानस्यार्थस्य विषये सुष्ठु विचार: कृत:, उक्तंच-

प्रतीयमानं पुनरन्यदेव वस्त्वस्ति वाणीषु महाकवीनां।

यत्तत्प्रसिद्धावयवातिरिक्तं विभाति लावण्यमिवाङ्.गनासु।।

अर्थात् महाकवीनां वाणीषु प्रतीयमानाख्यं अन्यदेव वस्त्वस्ति। अङ्.नासु निखिला-वयवातिरिक्तं लावण्यं येन प्रकारेण विभाति तेनैव प्रकारेण अलंकारादिविविधावयव-व्यतिरिक्तं प्रतीयमानाख्यं वस्तु अपि काव्येषु विभाति। काव्यमपि कन्यय सदृशं भवति अत एव काव्यकन्या इत्युच्यते काव्यम्। इत्थं आचार्यै: या तुलना कृता तया च तुलनया यस्य विशिष्टस्यार्थस्य प्रतिपादनं कृतं, तदपूर्वमेव प्रतिभाति। समग्रेऽपि ध्वन्यालोके इयमेव रीति: प्रचलिता।

ध्वनिरिति अपूर्वोऽयं विषय:। ध्वनिशब्दश्रवणसमंतरमेव जिज्ञासा उदेति, कोऽयं ध्वनिरिति। वस्तुत: प्रतीयमानार्थ एव ध्वनि:। परंतु आचार्यै: ध्वनेस्तावल्लक्षणं सुष्ठु प्रतिपादितम्।

यत्रार्थ: शब्दो वा तमर्थमुपसर्जनी कृतस्वाथौ।

व्यड्क्त: काव्यविशेष: स ध्वनिरिति सूरिभि: कथित:।।

ध्वनिरिति विशिष्टं किंचिद्वाक्यम्। काव्येऽस्मिन् वाचक: शब्द: स्वीयमर्थं वाच्यं च आत्मानं गौणं कृत्वा तस्य प्रतीयमानस्यार्थस्य प्रतीतिं कुरुत:। प्रतीयमानार्थोऽयं ललनालावण्यप्रख्य: सारभूत: सहृदयश्लाघ्य:, चमत्कारकारी अर्थ:।

व्यंग्यार्थ:

वाच्यार्थ: गौणो भूत्वा व्यंजनामभिव्यंज्यतीत्युक्ते वाच्यार्थ: आत्मानं व्यंजकं करोतीत्यर्थ:। अनेन प्रकारेण श्लोकस्य सारांशो भवति यत् यस्मिन् काव्ये व्यंग्यार्थस्य प्राधान्यं, अर्थात् व्यंग्यार्थ: वाच्यार्थापेक्षया शोभावान् भवति, काव्यं तत् ध्वनिकाव्यमित्युच्यते। इत्थं विविच्यमाने सति आचार्य: ''व्यंग्यप्रधाने काव्ये ध्वनिपदप्रयोगं कृतवानिति ज्ञायते। लोचने अयमेव विषय: विशदीकृत: - ''कारिकया तु प्रधान्येन समदाय एव काव्यरूपो मुख्यतया ध्वनिरिति प्रतिपादितम्'' इति। विषयस्यास्यसमर्थकमन्यवाक्यमपि विद्यते-

तत्परावेव शब्दार्थौ यत्र व्यंग्यं प्रति स्थितौ।

ध्वने: स एव विषय: मन्तव्य: संकरोज्झित:।।

श्लोकेऽस्मिन्नपि प्रयुक्तस् 'यत्र' इत्यस्य शब्दस्य 'यस्मिन् काव्येरू' इत्यर्थ:। अपरंच ध्वन्यालोके एवोक्तं-

विमति विषयो य आसीत् मनीषिणां सततमविदितसतत्त्व:।

ध्वनिसंज्ञित: प्रकार: काव्यस्य व्यंजित: सोऽयम्।। इति।

अस्मिन् श्लोके प्रयुक्तस्यापि ''ध्वनिसंज्ञित: प्रकार: काव्यस्य'' इत्यस्य वाक्यस्य अयमेवार्थ:। अनेन विधिना ध्वनिर्नाम ध्वनिकाव्यमेवेति स्वीकर्तव्यम्। अपरस्मिन्नपि संदर्भे विषयोऽयं प्रतिपादित: यत् - ''प्राप्तपरिणतीनां तु ध्वनिरेव काव्यम्'' इति। तथा च ''व्यंग्यविशेषोऽड.ी ध्वनिरिति कथित:'' इत्यस्मिन्नपि वाक्ये ध्वनिशब्द: काव्यविशेषे एव प्रयुक्त:। इत्थं यद्यपि प्रतीयमानार्थ एव ध्वनि:, तथापि ईदृशस्य प्रतीयमानार्थस्य वाहकं काव्यमेव ध्वनिरिति मन्तव्यम्। उक्तमेव ध्वन्यालोके-

''व्यंग्योऽर्थो ललनालावण्यप्रख्यो य: प्रतिपादितस्तस्य प्राधान्ये ध्वनिरित्युक्तम्। तस्य तु गुणीभूतव्यंग्यो नाम काव्यभेद: प्रकल्प्यते।'' इति अस्मिन्नपि वाक्ये गुणीभूतव्यंग्यो नाम काव्यभेद: इति कथने 'काव्यभेद' इति प्रयोगे ध्वनिशब्द: काव्यार्थे एव प्रयुक्त:।

''व्यंग्यार्थस्य प्राधान्ये ध्वनिसंज्ञित: काव्यप्रकार:''

इत्यस्मिन् वाक्येऽपि ध्वनिशब्द: काव्यार्थे एव प्रयुक्त:। एवमुपरि प्रदत्तेषु सर्वेष्वपि आनंदवर्धनाचार्याणां वाक्येषु ध्वनिशब्द: काव्यार्थे एव प्रयुक्त:। अन्यस्मिन्नपि कस्मिंश्चित् संदर्भे ध्वनिशब्दप्रयोग: स्पष्टतया काव्यार्थे एव प्रयुक्त: ध्वन्यालोके-

''रसभावनतदाभासतत्प्रशमलक्षणं मुख्यमर्थमनुवर्तमाना यत्र शब्दार्थालंकारा गुणाश्च परस्परं ध्वन्यपेक्षया विभिन्नरूपा व्यवस्थितास्तत्र काव्ये ध्वनिरिति व्यपदेश:।''

ध्वनिशब्द:

परंतु ध्वन्यालोकस्य परिशीलनेन ध्वनिशब्द: न केवलं ध्वनिकाव्यार्थे, अपि अन्येष्वपि अर्थेषु कृत इति ज्ञायते। तेषु अन्येष्वर्थेषु व्यंगयार्थ: प्रधान:। व्यंग्यार्थे ध्वनिशब्द: बहुधा प्रयुक्त: आनंदवर्धनाचार्यै:। ''काव्यस्यात्मा ध्वनिरिति'' इत्यमिन् श्लोके 'आत्मा' काव्यस्यार्थ एवेति आनंदवर्धनाचार्यस्य मतम्। तेषां मते यदि काव्यस्य जीवातुभूत: कश्चिदर्थो भवति, तर्हि स: प्रतीयमान एवेति। अनेन प्रकारेण काव्यात्मरूपेण गृहीत: ध्वनिपदार्थ: कश्चनकाव्यप्रकार: न भवति, परंतु काव्यस्यैव एक: विशिष्ट: अंश: भवतीति व्यवस्थितम्।

विषयेऽस्मिन् आनंदवर्धनाचार्याणां सम्मतिरासीदिति अन्यै: तत्रस्थै: वाक्यैरेव ज्ञायते।

''मुख्यतया प्रकाशमानो व्यंग्यार्थो ध्वनेरात्मा'' इत्येकं वाक्यम्।

वस्तुत: ध्वन्यालोकस्य प्रथमश्लोक एव काव्यस्यात्मका ध्वनिरिति उक्तम्। काव्यास्यात्मा च रसादिरूप एवार्थ: इति। अनेन ज्ञायते यत् ध्वनिकृता स्वयमेव ध्वनिरर्थरूपेण स्वीकृत:। ध्वनि: व्यंग्यार्थस्य पर्यायरूपेण स्वीकृत:। अतएव ध्वनि: काव्यरूपोद्यानस्य कल्पतरुर्विद्यते। तद्यथा-

''काव्याख्येऽखिलसौख्यधाम्नि विबुधोद्याने ध्वनिर्दर्शित:।

सोऽयं कल्पतरूपमानमहिमा भोग्योऽस्तु भव्यात्मनाम्।''इति।

ध्वन्यालोके ध्वनिशब्द: व्यंज्जकरूपेणापि प्रयुक्त:। तद्यथा - ''पदानामपि व्यंज्-जकत्वमुखेन व्यवस्थितो ध्वनिव्यवहार:।

अपरंच - ''यस्य तु विवक्षितत्वेन व्यंग्यस्य स्थिति: तद्व्यज्जकत्वं ध्वनिव्यवहारस्य प्रयोजकम्।''

उक्त्यन्तरेण यच्चारुत्वप्रकाशनमशक्यं, तत्प्रकाशयन् शब्द: व्यंज्जकतां प्राप्य ध्वनिरित्यस्य वाचकस्य वाच्यो भवति।

उक्त्यन्तरेणाशक्यं यच्चारुत्वं प्रकाशयन्।

शब्दो व्यंजजकतां बभ्रद् ध्वन्युक्तेर्विषयी भवेत्।।

अस्यैव विषयस्य व्यतिरेकरूपेण अन्यस्मिन् श्लोके किंचिदुक्तं, तद्यथा-

रूढा ये विषयेऽन्यत्र शब्दा: स्वविषयादपि।

लावण्याद्या: प्रयुक्तास्ते न भवन्ति पदं ध्वने:।।

अपि च -

अव्युत्पत्तेश्च शक्तेर्वा निबंधो य: स्खलद्गते:।

शब्दस्य स च न ज्ञेय: सूरिभिर्विषयो ध्वने:।।

ध्वनिशब्दप्रयोग:

अनेन प्रकारेण स्पष्टमेव यत् ध्वनिकारेण ध्वनिशब्दप्रयोग: विभिन्नेषु अर्थेषु कृत:। परंतु तथापि विभिन्ना: प्रयोगा इमे परस्परविरुद्धा: इति तु वक्तुं न शक्यते। एतेषां सर्वेषां ह्यर्थानां समन्वयं ध्वनिकार एव कृतवान् स्वीयेन पाणित्येन, प्रज्ञया च तत्कथमिति सम्प्रति पश्याम:। काव्यं ध्वनिरिति, व्यंज्जकपदानि च ध्वनिरिति च कथने नास्ति कश्चन विरोध:। अस्योत्तरं प्रदत्तमेव। पदं काव्यस्यैवाड्.गभूतमिति कृत्वा अन्वयव्यतिरेकिभ्यां एकांशभूतेष्वपि पदेषु ध्वनिव्यवहार: प्रतिष्ठित: भवति। परंतु ध्वनि: काव्यस्यात्मेति स्वीकृत: इति कारणेन ध्वनेरर्थो भवति यत् ध्वन्यमान: अर्थ: एव, अर्थात् व्यंग्यार्थ एव। यस्मिनकाव्ये ईदृशो ध्वनि: अर्थात् व्यंग्यार्थ एव प्रधानरूपेण व्यंज्जितो भवति, तत् संपूर्णं काव्यमेव ध्वनिकाव्यमिति व्यपदिश्यते ''प्राधान्येन व्यपदेशा: भवन्ति'' इति न्यायात्। उक्तमेव - ''यत्र व्यंग्यपरत्वेनैव वाच्यस्य व्यवस्थानं तत्र व्यंग्यमुखेनैव व्यपदेशो युक्त:'' (ध्वन्यालोक:)

तथा च ''व्यंज्जकत्वसाम्याद् ध्वनि: '' इत्यनया दृष्टया च काव्यं तत् ध्वनि-काव्यमिति व्यपदिश्यते। एतादृश्यां स्थितौ संपूर्णमपि काव्यं रसादिरूपमर्थं व्यंज्जयत् - व्यंज्जकत्वं बिभर्ति। यदि व्यंग्यमर्थं ध्वनिरूपेण स्वीकुर्म:, तर्हि तस्यार्थस्य प्राप्त्यर्थं साधुरूपेण यो व्यंज्जनाव्यापार: स्वीकृत:, तमपि व्यापारमुपचारत: ध्वनिरिति वक्तुं शक्नुम:।

अभाववादा:

एतादृशस्यापि परमिविशिष्टस्य ध्वनेरभावं केचिदाहु:। ध्वनिकार: सर्वप्रथमं ध्वनिविरोधिनां त्रीन् पूर्वपक्षान् निर्दिशति।

१. अभाववादिन:, एते ध्वने: साक्षाद्विरोधिन:।

२. भाक्तवादिन:, एते ध्वनिं लक्षणायामान्तर्भावयन्ति।

३. अनिर्वचनीयवादिन:; एते ध्वनिं स्वीकुर्वन्ति, परंतु ध्वने: स्वरूपं गिरामगोचरम् अनिर्वचनीयमेवेति व्यपदिशन्ति।

एतेषां मतं प्रस्तुवन् ध्वनिकार: 'जगदु:' इति-एतत् पदं प्रयुक्ते। जगदुरिति परोक्षभूतकालिकं लिट्-लकारं प्रयुज्य सूचयितुमिचछति यदृ एते अभाववादिनो ध्वनिकारस्य समक्षं नैवासन् इति। तेषां मतमपि स्वंय न कुत्रापि श्रुतवान्, केवलं तेषां मतानां संभावनां कुर्वन् चिखंडयति। लोचने विषयोऽयं स्पष्टीकृत:। ''न चास्माभि-रभाववादिनां विकल्पा: श्रुता:, किंतु संभाव्य दूषयिष्यन्ते.....अतो भूतकालोन्मेषात् पारोक्ष्यादिशिष्टाद्यतनत्वप्रतिभानाभावाच्च लिटा (जगदुरित्ययं) प्रयोग: कृत: (लोचनम्)। विषयमेनं विशदीकर्तुमेव ध्वनिकारेण वृत्तौ 'जगदु:' इत्यस्य पदस्य व्याख्यानं 'आचक्षी-रन्' 'कथयेयु:' ब्रूयु:' इत्येतै: लिड्लकारप्रयुक्तै: पदै: कृतम्। अनेन ज्ञायते यत् ध्वन्यभाववादा: केवलं संभावित एव, न तु वास्तविका:।

ध्वनिविरोधिन:

परंतु ध्वन्यभावसूचकानां पक्षानां सर्वथा निर्मूलत्वं न स्वीकरणीयमस्माभि:। यतो हि ध्वन्यभाववादिन: कस्यचित् मनोरथनाम्न: कवे: मतं ध्वनिकारेण श्रुतं स्वग्रंथे समुपस्थापितंच-

यस्मिन्नस्ति न वस्तु किंचन मन: प्रहलादि सालंकृति,

व्यत्पन्नेरचितं न चैव वचनैर्वक्रोक्तिशून्यं च यत्।।

काव्यं तद्धवनिना समन्नितमिति प्रीत्या प्रशंसज्जडो,

नो विद्मोऽभिदधाति किं सुमतिना पृष्ट: स्वरूपं ध्वने:।। (ध्वन्यालोक:)

वस्तुत: ध्वनिकार: स्वयं चिन्तयति यत् ध्वनिमार्गोऽयं परमरमणीय: किंतु नूतनोऽयं मार्ग:। नवीनं तत्राप्येतादृशं परमरमणीयं सिद्धांतं ऐदंप्रथमतया विदुषां समवाये समुपस्-थापयामो यदि, केचिदसहिष्णुतया कलुषितबबुद्धिभि: ध्वनिसिद्धांतस्य विरोधं कुर्यु:, तस्मादेव तेषामृ अभाववादान् संभावयति, संभाव्य च सविस्तरं समादधति। इत्थं तेषां मतखंडेन कुर्वन्नेव ध्वनिसिद्धांतं सुदृढं करोति। तत्र प्रथमाभाववादी कथयति यत् ''हे ध्वनिवादिन्! भवतोक्तं ''ध्वनि: चारुत्वशालति, परंतु समग्रस्य काव्यतत्वस्य विश्लेषणे

कृतेऽपि ध्वनिनर्नामकोऽयं पदार्थः नोपलभ्यते। यतो हि काव्यस्य तावत् शरीरं शब्दार्थौ, शब्दचारुत्वकृदः अनुप्रासादयः शब्दालंकाराः, अर्थचारुत्वकृदः उपमादयः प्रसिद्धाः एव। वर्णसंघटनाधर्माः माधुर्यादयः गुणाः अपि ज्ञायन्ते, तदनतिरिक्तहेतवः वृत्तयो रीतयश्च ज्ञायन्त एव। तेषु न कुत्रापि ध्वनिनामकोऽयं दृष्टः। तस्मात्कोऽयं ध्वनिः ? प्रसिद्धप्रस्थाने न दृष्टः ध्वनिरयं, तथा च प्रसिद्धप्रस्थानव्यतिरेकिणः न काव्यत्वम्। यदि भवान् कथयिष्यति ''प्रसिद्धप्रस्थानभिन्नः सन्नपि चारुत्वविशिष्टोऽयं ध्वनिरिति, तथापि नाङ्गीकुर्मः। यतोहि यत्र यत्र प्रसिद्धप्रस्थानत्वं तत्र तत्र काव्यत्वं प्रसिद्धप्रस्थानव्यतिरेकिणः काव्यत्वहानिः भवति'', इति। तत्र लोचकारः प्रसिद्धप्रस्थानं विशदीकरोति-

''प्रसिद्धं प्रस्थानं शब्दार्थौ तद्गुणालङ्काराश्च'' इति (लोचनम्)।

अन्ये चिन्तयन्ति यत् ध्वनिः भक्तावेवान्तर्भवतीति, तत्र भक्तिरिति लक्षणा। मीमांसकाः इमामेव गौणीवृत्तिमाहुः।

पूर्वाचार्याः-ध्वनिसिद्धांतश्च

यद्यपि ध्वनिकारस्य पूर्ववर्तिभिः आचार्यैः ध्वनिर्लक्षणायामन्तर्भवतीति न प्रतिपादितम्, तथापि ते शब्दस्य यः अभिधेयार्थः भवति, तदतिरिक्तम् अन्यमप्यर्थं स्वीकृतवन्तः। उदाहरणार्थ भामहविवरणकारेण उद्भटेन मुख्यभूतादभिधाव्यापारादतिरिक्तमन्यं व्यापारं 'गुणवृत्ति' नामकं स्वीकृतम्। तद्यथा-

''शब्दानामभिधानमभिधाव्यापारो मुख्यो गुणवृत्तिश्च इति भट्टोद्भट्टः'' (लोचनम्)। वामनेनापि सादृश्याल्लक्षणा स्वीकृता तद्यथा -''वामनोऽपि सादृश्याल्लक्षणा वक्रोक्तिः'' (लोचनम्)

परंतु कोऽप्याचार्यः ध्वनिगुणवृत्योस्सामानाधिकरण्यं न स्वीकृतवान्। अलक्षणीयतावादिनस्तु ध्वेनरस्तित्वमङ्गीकुर्वन्त एव तं लक्षणगम्यं न मन्नते, सहृदयसंवेद्यमेवाचक्षते।

परंतु रामायण-महाभारतादि ऐतिहासिककाव्य प्रमाणेन ध्वनिरस्तीति सिध्यति। अपरंच अस्य ध्वनेरेव प्रयोगेन सामान्याः मान्याः जाताः। कवीनां महाकवित्वलाभो जातः। किमधिकं, प्रतीयमानापरनामधेयस्यास्य ध्वनेः प्रयोगेनैव संसारेऽस्मिन् कालिदासादयः द्वित्राः पंचषाः वा महाकवय इति गण्यन्ते। अन्ये सर्वेऽपि सामान्यकवय एव।

इत्थं साहित्यशास्त्रे सर्वाधिकविशिष्टः ध्वनिसम्प्रदाय एव। यद्यपि ध्वनिसम्प्रदायात्पूर्वमन्ये सम्प्रदायाः सिद्धांताश्च काव्यतत्वाण्वेषणपरा आसन्, परंतु ते सर्वेऽपि ध्वनिसम्प्रदायस्योत्पत्यनन्तरं ध्वनिप्रकाशाभिभूताः जाताः। ध्वनिरेव ध्वस्तध्वान्तस्सन् प्रभाकरवत् साहित्याकाशे सततोज्ज्वलो जातः। ध्वनिसम्प्रदायप्रतिष्ठापनानन्तरं ये आचार्यास्समागतास्ते सर्वेऽपि ध्वनिसम्प्रदायस्यैवनुगन्तारः, तत्प्रशंसकाश्चाभूवन्।

इति शम्।

प्रस्तावना

ध्वने: बहव: भेदा: निरूपिता:। तत्र प्रथमं तावत् ध्वने: भेदद्वयं प्रतिपादितम्-

१. अविवक्षिताच्यध्वनि:

२. विवक्षितान्यपरवाच्यध्वनि: च इति।

उक्तमेव ध्वन्यालोके-

अस्ति ध्वनि: स च अविवक्षितवाच्यो विवक्षितान्यपरवाच्यश्चेतित द्विविध: सामान्येन। (ध्वन्यालोक:)

अविवक्षितवाच्यध्वनि:

अविवक्षितवाच्यध्वनौ हि वाच्यार्थ: सर्वथा अविवक्षित: एव तिष्ठति। वाच्यर्थ: तु तत्र विद्यमान: भवति, परंतु अनुपयुक्त: अन्नयायोग्यो वा भवति। ''अविवक्षितम् अनुपयुक्तम् अन्नयायोग्यं वा वाच्यं वाच्योऽर्थ:।'' अत एव एतादृशं ध्वनिं लक्षणामूलमामनन्ति। परंतु विवक्षितान्यपरवाच्यध्वनौ वाच्यं विवक्षितं, अर्थातृ अन्नययोग्यं सत् व्यंग्परकं भवति-''यस्मिन् ध्वनौ वाच्यं वाच्योऽर्थ: विवक्षितं वाच्यतावच्छेदरूपेण अन्नयबोधविषय: अन्यपरं व्यंग्योपसर्जनीभूतं च स: विवक्षितान्यपरवाच्य:'' (बालबोधिनी)। अत्र वाच्यं सर्वदा अनुपपन्नत्वात् आत्मनो वैशिष्टयेन व्यंग्यार्थपर्यन्तप्रतीतिं कारयति। वाच्यस्य पुन: व्यंग्यपरत्वेन विवक्षा भवत्येव, न तु आत्मन: कृते। अत एवेमं ध्वनिमभिधामूलध्वनि-मामनन्त्याचार्या:।

अविवक्षितवाच्यान्तर्गता: भेदा:

अविवक्षितवाच्यस्य मूले लक्षणा भवति। अत: लक्षणाधारेणैव अस्यापि भेदा: संभवन्ति। तर्हि प्रथमं तावत् लक्षणायां कति भेदा: भवन्तीति पश्याम:। लक्षणायां मूलत: भेदद्वयं भवति।

१. उपादानलक्षणा २. लक्षणलक्षणा चेति।

उपादानलक्षणायां लक्ष्यार्थेन सह वाच्यार्थ: संयुक्तो भवति। तस्य पूर्णतया त्यागो न भवति। लक्षणलक्षणायां पुन: स्वर्थ: संपूर्णरूपेण त्यज्यते, तदनन्तरमेव लक्ष्यार्थावगमो भवति। अत एव उपादानलक्षणां अजहत्स्वार्था इति लक्षणलक्षणां जहत्स्वार्था इति च कथयन्ति। बालबोधिन्यां तावत् अयमेव विषय: उक्त:। ''स्वार्थापरित्यागेन परार्थोपस्थापनमुपादानम्, स्वार्थपरित्यागेन परार्थोस्थापनं लक्षणम्। एते एवान्यत्राजहत्स्वार्था-जहत्स्वार्था इत्युच्यते।'' (बालबोधिनी)

द्विविधि: ध्वनि:

अस्यैव लक्षणाविभागस्य आधारेण लक्षणामूलध्वनि: अर्थात् अविवक्षितवाच्यध्वनि: द्विधा भवति।

१. अर्थान्तरसंक्रमितवाच्यम्

२. अत्यंततिरस्कृतवाच्यम् चेति।

उक्तमेव ध्वन्यालोके-

अर्थान्तरे सङ्.क्रमितमत्यन्तं वा तिरस्कृतम्।

अविवक्षितावाच्यस्य ध्वनेर्वाच्यं द्विधा मतम्।। इति।।

अर्थान्तरसङ्.क्रमितस्य मूले उपादानलक्षणा तथा अत्यंततिरस्कृतवाच्यस्य मूले लक्षणलक्षणा च भवत:। शास्त्रीयदृष्टया एवं वक्तव्यं भवति यत्, लक्षणाया: आध-ारे लक्षणामूलध्वने: विभाजनं प्रतिपादितम् इति। विभागबुध्या तु लक्ष्यार्थानन्तरमेव व्यंग्यस्यार्थस्याधिगमो भवति। किंतु लक्षणायां व्यंग्यार्थ: प्रयोजनरूपेण भवतीति हेतो: वक्तु: बुद्धौ प्रथमं स: प्रतिभासितो भवति। तस्यैव प्रयोजनस्याधारेण लाक्षणिकपदप्रयोगो भवति। वस्तुत: प्रयोजनाभावे तु लक्षणा प्रवृत्ता एव न भवति। अविवक्षितवाच्यध्वनौ वाच्यस्य अर्थान्तरसङ्.क्रमितता तथा अत्यंततिरस्कृतता इति द्वयो: दशयोराधारेण ध्वने: द्वैविध्यस्य निर्देशो जात:। इत्थं ध्वनिप्रसंगे वाच्यस्य वैशिष्टयचर्चा उचितं प्रतिभाति। यतो हि द्वयोरवाच्चयो: वाच्यं यदा प्रभावितं भवति, तदा व्यंग्स्यापि परिवर्तनं परिलक्षितं भवति। उक्तमेव -''तथाविधाभ्यां च ताभ्यां (वाच्याभ्यां) व्यंग्यस्यैव विशेष:।'' (ध्वन्यालोक:)

तत्परिणामत: व्यंग्यात्मभूतस्य ध्वने: भेदद्वयं स्पुटं प्रतिभासितं भवति। मूलत: वाच्यार्थ एव व्यंज्जको भवतीति कारणेन व्यंज्जकवैचित्र्यस्य परिणाम: व्यंग्यस्य वैचित्र्यमेव भविष्यति। तत्र अर्थान्तरसङ्.क्रमित वाच्यस्य उदहारणम्-

स्निग्धश्यामलकान्तिलिप्तवियतो वेल्लद् बलाका घना,

वाता: शीकरिण: पयोदसुह्यदामानन्दकेका: कला:।

कामं सन्तु दृढं कठोरहृदयो रामोऽस्मि सर्वं सहे,

वैदेही तु कथं भविष्यति हहा हा देवि! धीरा भव।।

अस्मिन् श्लोके रामोऽस्मि (अहं राम: अस्मि) इत्यस्य शब्दस्य वाच्यार्थ: अनुपन्नो भूत्वा व्यंग्ये परिणमितो भूत्वा व्यंग्यसंकलितवाच्यं प्रत्यायितं करोति। अर्थादत्र रामशब्द: केवलं संज्ञाधारिणमेव न, अपितु व्यंग्येन युक्तस्य रामस्यापि प्रतीतिं कारयति। ''अनेन हि व्यंग्यधर्मान्तरपरिणत: संज्ञी प्रत्याय्यते न संज्ञिमात्रम्।'' (ध्वन्यालोक:) रामशब्दस्यात्र

व्यंग्यार्थः राज्यनिर्वासन पितृमरणादि-नाना रूपेण भवति। इत्थमत्र रामशब्देन राज्यनिर्वासनादि असंख्य दुःख भोक्ता राम इति भवति।

अत्यंततिरस्कृतवाच्यध्वनेः उदाहरणम् -

रविसङ्.कांतसौभाग्यवस्तुषारावृतमण्डलः।

निःश्वासान्ध इवादर्शश्चन्द्रमा न प्रकाशते।।

श्लोकेऽस्मिन् अन्धशब्दः आदर्शस्य विशेषम्। परंतु उभयोरेकधर्मिबोधकत्वरूपान्नयस्यानुपपत्तौ लक्षणायाः आवश्यकता भवति। अतः पदार्थास्फुटिकरणरूपस्य गुणस्य हेतोः लक्षणया आदर्शं बोधयति। अनेन प्रकारेण चन्द्रस्य विच्छात्वानुपयोगित्वादि-असंख्याः गुणाः व्यंग्यारूपेण प्रतीताः भवन्ति। अत्र अंधशब्दस्य यः वाच्यार्थः उपहतदृष्टिमत्वरूपः सः सर्वथा परित्यक्तः। अतः अयमत्यन्ततिरस्कृतवाच्यः प्रकारः ध्वनेः।

विवक्षितान्यपरवाच्यध्वनिः-

ध्वनिप्रकारस्यास्य भेदद्वयम् भवति।

१. असंलक्ष्यव्यंग्यम्

२. संलक्ष्यक्रमव्यंग्यं चेति।

उक्तमेव-

असंल्क्ष्यक्रमोद्योतः क्रमेण द्योतितः परः।

विवक्षिताभिधेयस्य ध्वेनरात्मा द्विधा मतः।। (ध्वन्यालोकः)

अविवक्षितावाच्यस्य विभागः वाच्यार्थस्य विभिन्नास्थानामाधारेण कृतः। किंतु विवक्षितान्यपरवाच्ये व्यंग्यस्य अवस्थानुसारेण विभागः कृतः। विवक्षितान्यपरवाच्ये तु वाच्यार्थः सर्वथोपपन्नः भवति। वाच्यानन्तरमेव व्यंग्स्याधिगमो भवतीति क्रमः वाच्य-व्यंग्ययोरेव मध्ये भवति। यथा शब्दप्रतीत्यनन्तरमर्थप्रतीतिः। इत्थं सर्वत्र वाच्यप्रतीत्यनन्तरं व्यंग्यप्रतीतिर्जायते।अतो वाच्यव्यंग्ययोर्मध्ये क्रमः अवश्यमेव भवति। परंतु कादचिल्लक्षिता भवति सः क्रः, कदाचिन्न। यस्मिनृ लक्षितो भवति, सः संलक्ष्यक्रमध्वनिः, तथैव यस्मिन् लक्षितो न भवति सः असंलक्ष्यक्रमध्वनिः। सम्प्रति प्रश्नः भवितुं शक्नोति यत् उक्तस्य क्रमस्य चर्चा अविवक्षितवाच्यस्य विषये किमर्थं नोतथापितः? प्रश्नस्यास्य उत्तरं ध्वनिकारेणैव स्वयं प्रदत्तमृ। अविवक्षितवाच्ये तु वाच्यार्थस्य विवक्षाभ्ाावात् तद्वैमुख्ये अर्थान्तरस्य व्यंज्जना भवति। अतस्तत्र क्रमः निश्चितरूपेण भवत्येव इति। तद्यथा - ''अविवक्षित्वाच्यस्य तु ध्वनेः प्रसिद्धस्य विषयवैमुख्य प्रतीतिपूर्वकमे-

वार्थान्तरप्रकाशनमिति नियमभावी क्रमः। तत्र विवक्षितत्वादेत वाच्येन सह व्यंगस्य क्रमप्रतीतिविचारो न कृतः।'' (ध्वन्यालोकः) यदा वाच्यार्थस्य विवक्षा एव नास्ति तदा वाच्य-व्यंग्ययोर्मध्ये विद्यमानस्य क्रमस्य विचारकरणमेव व्यर्थमिति ज्ञातव्यम्।

असंलक्ष्यक्रमव्यंगयध्वनिः-

अस्मिन् प्रकारे अंगिरूपेण रसादिप्रपंचः विद्यते। रस-भाव-रसाभास-भावाभास-भावप्रशम-भावोदय-भावसंधि-भावशबलतानाम् उपलक्षणं भवति। रसभावादीनां स्थितिः अंगरूपेणापि भवति। परंतु तदा ते रसभावादयः अलंकारस्य विषयाः भविष्यन्ति, न तु ध्वनेः। यदा रसभावादीनां व्यंग्यता अंगिरूपेण भविष्यति, अपि च विभावादिषु वाच्य रसयोर्मध्ये विद्यमानः क्रमः लक्षितो न भवति, तदा एव सः असंलक्ष्यक्रमध्वनेः विषयो भविष्यति। उक्तमेव-

रसभावनदाभासतत्प्रशमादिरक्रमः।

ध्वनेरात्मांगिभावेन भासमानो व्यवस्थितः।। (ध्वन्यलोकः २-३)

रसादिः अर्थः सर्वथैव अक्रमो भवतीति वक्तुं न शक्यते। कदाचित् रसादावपि ध्वनौ विभावादीनां रसादीनांच मध्ये विद्यमानः क्रमः परिलक्षितः भवति। यदा सः क्रमः परिलक्षितो भवति, तदा रसादीनां गणनां संलक्ष्यक्रमव्यंग्यस्य-अर्थशक्तिमूलके भेदे क्रियते। उक्तमेव- ''यो रसादिरर्थः स एवाक्रमो ध्वनेरात्मा न त्वक्रम एव सः। क्रमत्वमपि तस्य कदाचित् भवति। तदा चार्थशक्त्युद्भवानुरणनरूपभेदता।'' (लोचनम्)

तेषां रसादिरूपेणाभिधानं न भवति, केवलं तेषां वस्तुध्वनित्वमेवेति सिद्धम्। यदा व्यभिचारिभावः प्रधानरूपेण चर्वणाविषयो भवति, तदा साः भावध्वनिरित्युच्यते। परंतु यदा विभावमुखेन अनुभावमुखेन वा अधिकश्चमत्कारः भवति, तदा सः विभावध्वनिः, अनुभावध्वनिर्वा भवति। परंतु तत्र कः व्यंजकः ? इति प्रश्नो भवति। तत्र रसभावाद्यपेक्षया किमप्यधिकं चर्वणीयं नास्ति।

संलक्ष्यक्रमव्यंग्यध्वनिः

ध्वनिप्रकारेऽस्मिन् वाच्य-व्यंग्ययोः क्रमः तथैव परिलक्ष्यते, यथा घण्टायाः रणनानन्तरं समुद्भूतः अनुरणनध्वनिः, अत एव संलक्ष्यक्रमव्यंग्यं ध्वनिकारः 'अनुस्वानसन्निभः' इति वर्णयति। प्रकारेऽस्मिनृ द्वौ भेदौ भवतः।

ç१. शब्दशक्तिमूलः।

२. अर्थशक्तिमूलः चेति।

ध्वन्यालोके उक्तं- ''यस्मादलंकारो न वस्तुमात्रं यस्मिन् काव्ये शब्दशक्त्या प्रकाशते, स शब्दशक्त्युद्भवो ध्वनिरित्यस्माकं विवक्षितम्। वस्तुद्वये च शब्दशक्त्या

प्रकाशमाने श्लेष: भवति तर्हि स: शब्दश्लेषस्य विषयो भविष्यति न तु ध्वने:।

तद्यथा-

येन ध्वस्त मनोभवेन बलिजित्काय: पुरस्त्रीकृतो,

यश्चोदृवृत्तभुजंगहारवलयो गंगा च योऽधारयत्।

यस्याहु: शशिमच्छिरोहर इति स्तुत्यं च नामामरा:,

पायात्स स्वयमन्धकाक्षयकरस्त्वां सर्वदो माधव:।।

अत्र शब्दशक्त्वा अर्थद्वयस्य उत्पत्तिर्जाता। एक: अर्थ: माधवेनसम्बद्ध:, अन्य: उमाधवेन, अर्थात् शंकरेण। एतौ द्वावप्यर्थौ वस्तुरूपौ तथा शब्दशक्त्या साक्षाद् प्रकाशितौ भवत: अत: अयं श्लेष: न तु ध्वनि:। इतादृशसंदर्भा: मम्मदानुसारेणापि श्लेषस्यैव विषया: न तु ध्वने: परंतु तत्र नायं हेतुर्यद् अत्र वस्तुद्वयस्य प्रकाशनं भवतीति, परंतु प्रकरणाद्यभावेन अभिधाया: नियमानाभावाद् अर्थद्वयमपि वाच्यं भवति। इत्थमत्र द्वितीयोऽप्यर्थ: वाच्य एव न तु प्रकाशमान: व्यंग्य:। यदि अभिधाया: नियमनाद् द्वितीयार्थ: व्यज्यमान: भवति, तर्हि स: वस्तुध्वने: विषयो भविष्यति। आचार्यमम्मटै: शब्दशक्तिमूले एव अलंकार-वस्तुध्वन्योरन्तर्भावं मन्यते। परंतु ध्वनिकार: शब्दशक्तिमूले केवलं अलंकारध्वनिमेव स्वीकरोति। अत: एतेषामभिप्रायानुसारेण वस्तुरूपस्यार्थान्तरस्य प्रतीतौ श्लेष एव स्वीकार्यो भवति।

अर्थशक्त्युद्भव ध्वनि: (अर्थशक्तिमूल ध्वनि:)

संलक्ष्यक्रम व्यंग्यस्यैव द्वितीय: उपभेद: अर्थशक्तिमूलध्वनि:। एष: तदा भवति यदा अर्थस्य सामर्थ्याद्-अन्यवस्तुन: अथवा अलंकारस्य व्यंग्यं भवति। तत्रापि यदिदं वस्तु तात्पत्र्येण प्रकाशितं न भवति, तर्हि गुणीभूतव्यंग्यता। अनेन प्रकारेण अर्थशक्त्युद्भवध्वने: द्वावुपभेदौ।

१. वस्तुध्वनि:

२. अलंकारध्वनि:

ध्वनिकृता उभयोरपि स्पष्टं लक्षणं प्रदत्तम्-

अर्थशक्त्युद्भवस्त्वन्यो यत्रार्थ: स: प्रकाशते।

यस्तात्पर्येण वस्त्वन्यद् व्यनक्त्युक्तिं विना स्वत:।। (ध्वन्यालोक: २-२२)

तत्र वस्तुध्वनेस्तावदुदाहरणं-

एवं वादिनि देवर्षौ पाश्र्वे पितुरधोमुखी।

लीलाकमलपत्राणि गणयामास पार्वती।।

अत्र पार्वत्या: लज्जारूपो-व्यभिचारिभाव: व्यंग्य: अर्थसामर्थ्येन भवति। यदिकमलपत्रगणना अधोमुखत्वरूप-अनुभावै: लज्जारूपस्य भावस्य झटिति प्रतीतिर्जायमाना तर्हि स: अवश्यमेव अलक्ष्यक्रमताया: कारणेन भावध्वने: विषयो भविष्यति। किंतु अत्रैवं नैव भवति। यतोहि कमलपत्रगणना अधोमुखत्वाभ्यां लज्जाया: एव अनुभावो न भवति। एततु कुमारीणां लज्जातिरिक्तकारणैरपि सम्भवति। अत: एताभ्यां चेष्टाभ्यां लज्जाया: झटिति प्रतीति: न भवति। परंतु परमेश्वरं पतिरूपेण प्राप्तुं कृता तपस्या, नारदकृतविवाहादि प्रसंगज्ञानेन च लज्जार्थ: प्रतीयते। अनेन व्यवधानेनैवात्र संलक्ष्यक्रमता समागता। उक्तमेव लोचनव्याख्याने - ''इह तु पद्मदलगणनम् अधोमुखत्वं चान्ययापि कुमारीणां सम्भाव्यत इति झटिति न लज्जायां विश्रमयति हृदयम् अपि तु प्राग्वृत्ततपश्चर्यादिवृत्तांतनुस्मरणेन तत्र प्रतिपत्तिं करोतीति क्रमव्यंग्यतैव।'' (लोचनम्)

तथा च लज्जारूपस्य व्यभिचाभिवास्य पर्यालाचनानन्तरमेव रसप्रतीतिर्भविष्यति। अत: लज्जारसप्रतीत्योर्मध्ये क्रम: लक्षितो न भूत्वा रसदृष्टया अत्रापि असंलक्ष्यता स्वीकर्तुं शक्या इति लोचनकारस्य मतम्। किंतु कमलपत्रगणना-अधोमुखत्वयो: तथा लज्जाया: मध्ये क्रम: संलक्ष्य: अस्ति। अत: लज्जारूपार्थ: भावध्वनिर्न भवति, वस्तुध्वनेरेव विषय: भविष्यति। पंडितराजेन जगन्नाथेन तु संलक्ष्यक्रमतया व्यज्यमान: रसाद्यर्थ: वस्तुरूप एवेति स्वीकृत:।

तद्यथा-

संलक्ष्यक्रमतया व्यज्यमानस्य रत्यादेस्तु वस्तुमात्रतैव न रसादित्वमिति तेषाम् (अभिनवगुप्तादीनाम्) आशयस्य वर्णनेन न तदुक्तीनां विरोध:। (रसगंगाधर:)

अर्थशक्तिमूलध्वनिप्रभेदा:

अर्थशक्तिमूलक-अनुरणनरूपे व्यंग्ये व्यंजनार्थ: द्विविध: भवति।

१. कविप्रौढोक्तिमात्रनिष्पन्न शरीर: (कविनिबद्धवक्तृप्रौढोक्तिनिष्पन्न शरीर:)

२. स्वत: सम्भवी इति।

कविप्रौढोक्ति: इत्यस्य अर्थ: भवति यत् कवे: स्वीयबुद्धे: विचारेण उक्ति:, यत् बाह्यजगति न प्राप्यते। उक्तं हि काव्यप्रकाशे-''कविना प्रतिभामात्रेण बहि: असन्नपि निर्मित:।'' (काव्यप्रकाश:) तथा च कविनिबद्धप्रौढोक्ति: सा भवति यत्र कवि: केनापि वक्त्रा अलौकिक: विचार: व्यक्तीकृत:। स्वत: सम्भवीति सा भवति यत्र एतादृश: अर्थ: वर्णित: भवति य: कवे: प्रतिभया जायते, न तु बाह्यजगति सम्भव: अयम्। उक्तमेव काव्यप्रकाशे-''स्वत: सम्भवी न केवल भणितिमात्रनिष्पन्नो यावद्बहिरप्यौचित्येन न

सम्भाव्यमान:। (काव्यप्रकाश:) अनयोद्र्वयो: व्यंज्जकयो: वैचित्र्याद् अर्थशक्तिमूलेऽपि भेदद्वयं भवति। 'सोऽपि (अर्थशक्तिमूल:) व्यंजकार्थद्वैविध्यद्वारेण द्विविध:।'' (लोचनम्)

लोचनकारस्तु कविनिबद्धप्रौढोक्तिं कविप्रोढोक्ते: अवान्तरभेदरूपेण स्वीकृत्य त्रयो भेदा: निरूपिता:। परंतु आनंदवर्धनाचार्याणां द्विवधत्वमेव प्रामाणिकं भवति। तथा उक्तमेव आनंदवर्धनाचार्यै: - ''अर्थशक्त्युद्भव-अनुरणनरूपव्यंग्ये ध्वनौ यो व्यंज्जकोऽर्थ: उक्त:, तस्यापि द्वौ प्रकारौ - कवे: कविनिबद्धस्य वा वक्तु: प्रौढोक्तिमात्रनिष्पन्न शरीर: एक: स्वत: सम्भवी च द्वितीय:'' (ध्वन्यालोक:)

१. कविप्रोढौक्तिमात्रनिष्पन्नशरीरस्य उदाहरणम्-

सज्जयति सुरभिमासो न तावदपर्यैति युवतिजनलक्ष्यमुखान्।

अभिवनसहकारमुखान्नव पल्लवपत्रलाननंगस्य शरान्।।

२. कविनिबद्धवक्तृप्रौढोक्तिनिष्पन्नशरीरस्यचोदाहरणम्-

शिखरिणि क्व नु नाम किचच्चिरं किमभ्धिानमसावकरोत्तप:।

तरुणि येन तवाधरपाटलं दशति बिम्बफलं शुकशावक:।।

स्वत: सम्भवी: - एवं वादिनि देवर्षै इत्यादिश्लोके ये विषया: उक्ता:, ते सर्वेऽपि बाह्यलोकेऽपि सम्भवा:। कमलपत्रगणना, अधोमुखत्वादिविषया: कव्युक्त्या, लोकेऽपि उभयत्रापि सम्भवा:। अत: उक्ते उदाहरणे ''एवं वादिनीत्यादिश्लोके'' स्वत: सम्भवी वस्तुना वस्तुव्यंग्यम्। अत्र व्यंज्जकवस्तु भवति-कमलपत्रगणनं अधोमुखत्वंच। लज्-जारूपोऽर्थ: व्यंग्यवस्तुभूत:।

इत्थं एतानि सर्वाण्यापि उदाहरणानि अर्थशक्तिमूलकवस्तुध्वनेरेव।

सम्प्रति-अलंकारध्वनिं जानीम:

अर्थशक्तिमूलकालंकारध्वनि:।

उक्तं ध्वन्यालोके-

अर्थशक्तेरलड्.कारो यत्राप्यन्य: प्रतीयते।

अनुस्वानेपव्यंग्य: स प्रकारोऽपरो ध्वने:।। (ध्वन्यालोक:-२.२५)

अलंकारध्वनि: तदा एव भवति याद व्यंग्यालड्.कार एव प्रधानभूतो भवेत्। अन्यथा रूपक-अपह्नुति-आदि सादृश्यमूलकाड्.कारेषु उपमालड्.कार: व्यंग्यरूपेण तिष्ठति। परंतु तथापि तत्र उपमा प्रधानभूता न भवति, वाच्यं रूपकादि-अलड्.काराणां उपस्कारकं भवतीति हेतो: गुणीभूतमेव भवति। व्यंग्यालंकारप्रतिपादने याद वाच्यस्य

औन्मुख्यं न भवति तदा तादृशेषु काव्येषु अलड्.कारध्वनिरिति व्यवहार: कदापि भवितुं न शक्यते। उक्तमेव-

अलड.कारान्तरस्यापि प्रतीतौ यत्र भासते।

तत्परत्वं न वाच्यस्य नासौ मार्गो ध्वनेर्मत:।। (ध्वन्यालोक: - २.२.७)

यत्र व्यंग्यालड्.कारा: भवन्ति तत्रैव अलड.कारध्वनिर्भवति। अलड्.कारव्यंग्यता तु वस्तुना अलड्.कारेणापि भवितुं शक्नोति। इत्थं वस्तु अलड्.कारध्वन्यो: सह अर्थशक्तिमूलध्वने: १ २ भेदा: सम्भवन्ति। अधोनिर्दिष्टा तालिका विषयमेनं सप्रपंच स्पष्टीकरोति।

अर्थशक्तिमूलध्वनि:

कविप्रौढोक्तिनिष्पन्नशरीर: कविनिबद्धवक्तृप्रौढोक्तिनिष्पन्नशरीर: स्वत: सम्भवी

वस्तुव्यंज्जक: अलड्.कारव्यंज्जक: वस्तु अलड्.कार: वस्तु

अलड्.कार:

प्रत्येकमपि द्वौ द्वौ भेदौ।

१. अलड्.कारध्वनि:

२. वस्तुध्वनि:

परंतु आनंदवर्धनमतानुसारेण अष्टौ भेदा एव भवन्ति। यतो हि ते आचार्या: कविप्रा-ढोक्तिं तथा कविनिबद्धवक्तुप्रौढोक्तिं च एकरूपेण स्वीकुर्वन्ति। अलड्.कारध्वने: कानिचन

उदाहरणानि भवन्ति-तद्यथा-

लावण्यकान्तिपरिपूरित दिड्.मुखेऽस्मिन्, स्मेरेधुना तव मुखे तरलायताक्षि।

क्षोभं यदेति न मनागपि तेन मन्ये, सुव्यक्तमेव जलराशिरयं समुद्र:।।

इत्थं परमरमणीयस्य ध्वने: अपि बहव: भेदा: भवन्ति। एतेषां सर्वेषां भेदानामवगमनेन ध्वने: गाम्भीर्यमस्माभिरवगन्तुं शक्यते।

ध्वन्यालोकप्रदर्शितानेतान् भेदान् विदित्वा छात्रा: ध्वने: सौन्दर्यं, गाम्भीर्यं च जानन्तु इति एताभि: शुभकामनाभि: विरम्यते बुधजनविधेयेन।

इति शम्

**अध्याय : 3**

# रस, वक्रोक्ति और औचित्य

## १.० प्रस्तावना

साहित्यशास्त्रस्य विकासयात्रायां कालक्रमेण षट्सिद्धान्ताः प्रादुर्भूताः। यथा रससिद्धान्तः, अलंकारसिद्धान्तः, रीतिसिद्धान्तः, ध्वनिसिद्धान्तः, वक्रोक्तिसिद्धान्तः, औचित्यसिद्धान्तश्च। एते षट्सिद्धान्ताः, काव्यात्मप्रतिपादनाय उत वा काव्यस्य सर्वप्रधानतत्त्वं किमिति जिज्ञासायां कालक्रमेण आविर्भूताः। तत्रा भरताचार्येण प्रवर्तितो रससिद्धान्तः। भामहदण्डयुद्भटादिभिः प्रवर्तितोऽलंकार- सिद्धान्तः। वामनाचार्येण प्रतिपादितो रीतिसिद्धान्तः। आनन्दवर्धनाचार्येण प्रवर्तितो ध्वनिसिद्धान्तः। कुन्तकाचार्येण प्रतिपादितो वक्रोक्तिसिद्धान्तः। आचार्यक्षेमेन्द्रेण प्रवर्तित औचित्यसिद्धान्तश्च। एतेषु सिद्धान्तेषु रससिद्धान्तः सर्वप्रथमः।

## १.० रससिद्धान्तः

साहित्यशास्त्रास्य विवेच्यतत्त्वेषु रसतत्त्वं सर्वप्रधानमिति निश्चप्रचम्। रसो न केवलं नाट्यस्य अपितु काव्यस्यापि सर्वाधिकं महत्त्वपूर्णं तत्त्वमिति प्रायशः सर्वैराचार्यैः सर्वात्मना स्वीक्रियत एव। आभरताद् आधुनिककालपर्यन्तं ये-ये काव्यशास्त्रिाणोऽभूवन् ते सर्वे आचार्याः काव्येषु रसतत्त्वस्य प्राधन्यं स्वीकुर्वन्ति। तथैव आदिकाव्यरामायणादारभ्य अर्वाचीनसंस्कृतसाहित्यपर्यन्तं विरचितेषु काव्येषु रसतत्त्वस्य प्रामुख्यं दरीदृश्यते। ये काव्यस्यात्मानं रसं स्वीकुर्वन्ति ते रससिद्धान्तपक्षपातिनः सन्ति। रससिद्धान्तस्य प्रतिष्ठापकाचार्येण भरतमुनिना सर्वप्रथमं नाट्यशास्त्रे रसभावादयः साङ्गोपाङ्गं निरूपिताः। यद्यपि 'रूपकनिरूपणीयं भरतः, रसाधिकारिकं नन्दिकेश्वरः इति राजशेखरकथनेन घ रसस्याधिकारिकाचार्या नन्दिकेश्वर आसीदिति ज्ञायते परं नन्दिकेश्वरस्य रसविषयकग्रन्थानुपलभ्यमानत्वात्, भरतमुनिविरचितं नाटयशास्त्रामेव प्रप्रथमः प्रामाणिको ग्रन्थः,यत्रा रूपकनिरूपणं रसस्वरूपनिरूपणं च प्राप्यते।

अतो रससिद्धान्तस्य प्रथमः प्रवर्तको भरतमुनिरेव मान्यः। नाट्यशास्त्रास्य षष्ठाऽध्याये रसस्य सप्तमाध्याये च भावस्य प्रतिपादनं प्राप्यते। रसनिष्पत्तिविषये भरतमुनिप्रतिपादितस्य सिद्धान्तस्य एव विस्तरेणोत्तरवर्तिभिराचार्यैः व्याख्या कृता। 'न हि रसादृते कश्चिदर्थः प्रवर्तते' इति कथयता भरतमुनिना एव सर्वप्रथमं रसः काव्यस्य

सारतया प्रदर्शितः। नाट्यशास्त्रास्य टीकाकारेण अभिनवगुप्तपादाचार्येणापि अभिनवभ्-ाारत्यां रसः सूत्रासमो निरूपितः, यथा-'एक एव तावत्परमार्थतो रसः सूत्रास्थानीयत्वेन रूपके प्रतिभाति। नाटयशास्त्रे भरतेन रसनिरूपणं यद्यपि रूपकहेतुनैव विहितम्। तथापि भरतसमयं यावत् काव्यनाट्योस्तथाविधं शास्त्रीयं विभाजनं न प्रतिष्ठितमासीत्। द्वे अपि पदे समानार्थके गण्येते स्म। नाट्येभ्यः काव्यपदव्यवहारं भरतो बहुशः कृतवान्, अभिनवगुप्तश्च तं समर्थितवान्।

अयमेव हेतुरासीद् यदुत्तरवर्तिभिराचार्यैः भरतप्रोक्तो रससिद्धान्तः पल्लवितः पुा-ष्पितश्च। रसश्च काव्येष्वनिवार्यतत्त्वरूपेण परिगणितः। परन्तु भरतोत्तरवर्तिनः प्राचीनाचार्याः भामहदण्डयुद्भटप्रभृतयः काव्यनाट्ययोर्भेदं प्रतिपादितवन्तः।

3.0 प्राचीनसाहित्ये रसपदप्रयोगः -

प्राचीनसंस्कृतसाहित्ये रसपदप्रयोगो विभिन्नेषु अर्थेषु दरीदृश्यते। वेदवेदांगब्राह्म-णोपनिषदा- युर्वेदरामायणमहाभारतादिसाहित्ये रसप्रदप्रयागो विभिन्नेष्वर्थेषु विद्वद्भिः कृतः। कोषग्रन्थेषु रसपदस्यार्थाः सन्ति ''आस्वादो जलं वीर्यं शृंगारादिकाव्यरसाः विषं द्रवः पारदो रागाः गृहं धतुः तिक्तादयः षड्भोजनरसाः परमात्मा चेति।

काव्येषु रसपदेन शृंगारादयो रसा अवबुध्यन्ते। आयुर्वेदसाहित्ये रसपदं मधु-रादिभोजनरसान् विषं पारदादिधातनू रसरूपशरीरधातुं द्रवत्वंचाभिव्यनक्ति। साररूपश्च पदार्थोऽपि रसपदेना- ऽभिधीयते। वैदिकसाहित्ये, विशेषतस्तूपनिषत्सु परमात्माऽपि रसपदेनाऽभिव्यज्यते। तैत्तिरीयापे निषदि परमबह्म रसपदेन व्यवहृतं यतस्तब्लब्ध्वा जीव आनन्दमनुभवति यथा -

रसो वै सः। रसं ह्येवायं लब्ध्वाऽऽनन्दी भवति।।

.तैत्तिरीयोपनिषद् - 2.7

भरतस्तु स्वयं ब्रूते - नाटयरचनायां सकला सामग्री ब्रह्मणा वेदेभ्यो गृहीता। विशेषेण

रसनाथर्ववेदादसौ जग्राह। यथा

जग्राह पाठ्यमृग्वेदात् सामभ्यो गीतमेव च।

यजुर्वेदादभिनयान् रसानाथर्वणादपि।।

.ना.शा.-1.17

4.0 रसपदस्य निर्वचनम् -

रस्यत आस्वाद्यत इति रसः। ये पदार्था आस्वाद्यन्ते ते रसाः। एवंच आस्वाद्यमानाः

पदार्थाः परमात्ममधुरवस्तुसोमगन्धमध्वादिपदार्था रसपदव्यवहार्याः वर्तन्ते।

2. रस्यतेऽनेनेति रसः। यैः पदार्थैरास्वादनं विधीयते ते रसाः कथ्यन्ते। अतः शब्दरागवीर्य-शरीरादयो रसाः कथ्यन्ते।

3. रसति रसयति वेति रसः। व्याप्यते व्याप्नोति यत्तत्त्वं तद् रसपदवाच्यं भवति, अतः पारदो जलं शरीरगतरसधातुः द्रवपदार्थाश्च रसपदेन व्यवह्रयन्ते।

4. रसनं रस आस्वाद आस्वादरूपः पदार्थो रसपदवाच्यो भवति। अतः शृंगारादीनि तत्त्वान्यास्वादरूपत्वाद् रसपदवाच्यानि भवन्ति।

एतेषु प्रथमं चतुर्थं वा निर्वचनं साहित्यिकरसानभिव्यनक्ति। साहित्यरसा आस्वाद्य-माना आस्वादरूपा वा भवन्ति।

5.0 साहित्यशास्त्रे रसस्वरूपं रसनिष्पत्तिश्च-

साहित्यशास्त्रे रसस्वरूपं रसानुभूतिंच सर्वप्रथमं नाटयशास्त्रप्रणेता भरतमुनिः नाट्यशास्त्रास्य षष्ठेऽध्याये प्रतिपादितवान्। तत्रोक्तं भरतमुनिना 'तत्रा रसानेव ता-वदादावभिव्याख्यास्यामः। नहि रसादृते कश्चिदथर्ः प्रवर्तते।' इति तने प्रतिष्ठापितम्। भरतप्रतिपादितं रससूत्रां वर्तते 'विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिः। अत्राह-यथा हि नानाव्यंजनौषधिद्रव्य संयोगाद्रसनिष्पत्तिः तथा नानाभावोपगमाद्रसनिष्पत्तिः। यथा हि-गु-णादिभिर्द्रव्यंजनैरौषधिभिश्च षाडवादयो रसा निर्वत्र्यन्ते तथा नानाभावोपगता अपि स्थायिनो भावा रसत्वमाप्नुवन्तीति। रस इति कः पदार्थः। उच्यते-आस्वाद्यत्वात्। कथमास्वाद्यते रसः। यथा हि नानाव्यंजनसंस्कृतमन्नं भुंजानां रसानास्वादयन्ति सुमनसः पुरुषा हर्षाद-ींश्चाधिगच्छन्ति तथा नानाभावाभिनयव्यंजितान् वांगसत्त्वोपेतान् स्थायिभावानास्वादयन्ति सुमनसः प्रेक्षकाः हर्षादींश्चाधिगच्छन्ति। तस्मान्नाट्यरसा इत्यभिव्याख्याताः।

रसतत्त्वसन्दर्भे अपरस्यापि प्रश्नस्य निणर्यं कुर्वता तेनोक्तम् - यद् भावेभ्यो रसानां निष्पत्तिः, न तु रसेभ्यो भावानामभिनिर्वृत्तिः। अत एव रसभावयोः परस्परस-म्बन्धेन रसनिष्पत्तिरित्यपि पक्षो नोचितः। तत्रा रसभावयोः सम्बन्धेऽपि प्रतिपादित भरताचार्येण-यथा 'अत्राह किं रसेभ्यो भावनामभिनिर्वृत्रिः उताहो भावेभ्यो रसानामिति। केषांचिन्मतं परस्परसम्बन्धदेषामभिनिर्वृत्तिरिति। तन्न? कस्मात्। दृश्यते हि भावेभ्यो रसानामभिनिर्वृत्तिर्न तु रसेभ्यो भावानाभिनिर्वृतिरिति। भवन्ति चात्रा श्लोकाः -

नानाभिनयसम्बद्धान्भावयन्ति रसानिमान्।

यस्मात्तस्मादमी भावा विज्ञेया नाट्ययोक्तृभिः।।

नानाद्रव्यैर्बहुविधैर्व्यंजनं भाव्यते यथा।

एवं भावा भावयन्ति रसानभिनयैः सह।।

न भावहीनोऽस्ति रसो न भावो रसवर्जितः।

परस्परकृता सिद्धिस्तयोरभिनये भवेत्।

व्यंजनौषधिसंयोगो यथाऽन्नं स्वादुतां नयेत्।

एवं भावा रसाश्चैव भावयन्ति परस्परम्।

नाटय् शास्त्राम् - 6-34, 35, 36, 37

भरतमुनि रसतत्त्वाय आत्माशब्दस्य प्रयोगमकुर्वताऽपि तस्य प्राधन्यं स्पष्टरूपेण निरूपितवान्।

'न हि रसादृते कश्चिदर्थः प्रवर्तते, अनेन रसस्य प्राधन्यं सूच्यते। यथा बीजाद् वृक्षो वृक्षाच्च

पुष्पाणि पफलानि च भवन्ति, तथैव मूले रसाः सन्ति, तेभ्यो रसेभ्यो भावा व्यवस्थाप्यन्ते।

यथा-

'यथा बीजाद्भवेत् वृक्षो वृक्षात्पुष्पं पफलं यथा।

तथा मूलं रसाः सर्वे तेभ्यो भावा व्यवस्थिताः।।

.ना.भा.-6/38

अत्रा चोच्यते अभिनवगुप्ताचार्येण नाटयशास्त्रास्य अभिनवभारतीटीकायाम्-तदेवं मूलं बीजस्थानीयात् कविगतो रसः। ततो वृक्षस्थानीयं काव्यम्। तत्रा पुष्पादिस्थानीयोऽभि-भनयादि नटव्यापारः। पफलस्थानीयः सामाजिकरसास्वादः। तेन रसमयमेव विश्वम्' इति।

अतो मूलभूतत्वात् प्राधन्याच्च रसस्य आत्मस्थानीयत्वम्। एवं हि भरतादारभ्य रससिद्धान्तः प्रचलितः साहित्यशास्त्रे।

6.0 नाटयशास्त्राद् अनन्तरं विरचितेषु ग्रन्थेषु रसस्वरूपम् -

भरतोत्तरवर्तिनो रससिद्धान्तपक्षपातिन आचार्याः स्व-स्व काव्यशास्त्रीयग्रन्थे नाटयशास्त्रीयग्रन्थे वा काव्येषु रसतत्त्वस्य निरूपणं भरतानुसारमेव कृतवन्तः तत्रा नाट्यस्वरूपविधयिभिः सर्वैरेवाचार्यैः रस एव नाट्यस्य साररूपेण स्वीकृतः। श्रव्यकाव्यलक्षणविधयिभिः भामहदण्डिप्रभृतिभि आचार्यैरपि काव्ये रसतत्त्वस्य

महत्त्वमङ्.गीकृतम्

6.1 अलङ्.कारवादिनां मते रसतत्त्वम्

भामहदण्डयुद्भटादिभिः अलङ्.कारसिद्धान्तपक्षपातिभिः यद्यपि काव्येष्वलङ्.काराणां प्राधन्यं स्वीकृतम्, रसादयोऽपि रसवदाद्यलङ्.कारतया अङ्.गीकृताः, तथापि काव्येषु रसतत्त्वस्य महत्त्वं न निराकृतम्। यथा हि -

महाकाव्यं लक्षयता भामहेनोक्तम् -

'चतुर्वर्गाभिधनेद्धपि भूयसार्थोपदेशकृत्।

युक्तं लोकस्वभावेन रसैश्च सकलैः पृथक्।। . का.-1/2/

परं तन्मते काव्यस्य सर्वाण्यपि शोभाधयकतत्त्वानि अलङ्.कारेषु अन्तर्भावितानि भवन्ति। अत एव रसस्तेन रसवदलङ्.काररूपेण अङ्.गीकृतः। यथा-

रसवद्दर्शितस्पष्टशृङ्.गारादिरसं यथा।' एवमेव दण्डिनापि काव्येषु रसो मुख्यतत्त्वरूपेण वर्णितः। यथा हि तेनोक्त काव्यादर्शे

'कामं सर्वोऽप्यलङ्.कारो रसमर्थे निषिंचति।

तथाप्यग्राम्यतैवैनं भारं वहति भूयसा।।''

तेन रसो रसवदलङ्.काररूपेणैव स्वीकृतः। काव्यालङ्.कारसूत्रोवामनाचार्यः कान्तिगुणलक्षणे रसमन्तर्भावयति- यथा ' दीप्तरसत्वं कान्तिः।'

रूद्रटकृते काव्यालङ्.कारे तु -

'तस्मात्तत्कर्तव्यं यत्नेन महीयसा रसैर्युक्तम्।

रसनाद्रसत्वमेषां मधुरादीनामिवोक्तमाचार्यैः।। '

इत्यनेन काव्येषु रसतत्त्वस्य वैशिष्टयं निरूपितम् आचार्यरुद्रटेन।

इत्थं यद्यपि काव्यशास्त्रानिर्माणस्य प्रारम्भिके युगे काव्ये गुणालङ्.कारौ एव सारतया स्वीकृतौ, परम् आनन्दवर्धनाचार्यस्याविर्भावात् अस्यां स्थितौ परिवर्तनं जातम्। काव्येनापि रसानुभूतिर्जायत इति परवर्तिभिराचार्यैः स्वीकृतः। यथा -

6.2 ध्वन्यालोके रसतत्त्वम् -

आनन्दवर्धनाचार्यो रसध्वनिमेव काव्यात्मरूपेण स्वीकरोति यथा-

'काव्यस्यात्मा स एवार्थस्तथा चादिकवेः पुरा।

क्रौंचद्वन्द्ववियोगोत्थः शोकः श्लोकत्वमागतः।।'

अस्य श्लोकस्य व्याख्यायाम् अभिनवगुप्तपादाचार्यः प्रतिपादयति यत् रस एव वस्तुतः काव्यस्यात्मा। यथा हि- तेन रस एव वस्तुत आत्मा, वस्त्वलङ्.कारध्वनी तु सर्वथा रसं प्रति पर्यवस्येते। लोचनटीका- 1/5

रसपदार्थस्य अयं महिमा यत् रससंसर्गेण पुरातनमपि वस्तु नवत्वं प्राप्यते। यथा चोच्यते ध्वनिकारेण आनन्दवर्धनेन -

'दृष्टपूर्वा अपि ह्यर्थाः काव्ये रसपरिग्रहात्।

सर्वे नवा इवाभान्ति मधुमास इव द्रुमाः।।'

आनन्दवर्धनस्याभिमतम् आसीत् यत् काव्यप्रवृत्तिः सर्वथा रसार्थमेव भवति। रस एव काव्यस्योत्कृष्टतमं तत्त्वम्। अतः प्रबन्धकाव्यं रचयता कविना सर्वथा रसपरतन्त्रोण भाव्यम्।

यथा- कविना प्रबन्धकाव्यमुपनिबध्नता सर्वात्मना रसपरतन्त्रोण भवितव्यम्।

6.3 ध्वनिकारादनन्तरं साहित्यशास्त्रीयग्रन्थेषु रसतत्त्वम् -

ध्वन्यालोकादनन्तरं विरचितेषु ग्रन्थेषु यथा काव्यमीमांसादशरूपक-व्यक्तिविवे-क-शृङ्.गारप्रकाश-सरस्वतीकण्ठाभरण-काव्यप्रकाशभावप्रकाशन-नाटयदर्पण-रसार्ण-वसुधकर साहित्यदर्पण-रसगङ्.गाधरादिग्रन्थेषु रसतत्त्वस्य प्राधन्यं स्वीकृत्य तन्निरूपणं विस्तरशो विहितम्। तत्रा केषांचदाचार्याणां मतमत्रा प्रस्तूयते- महाकविराजशेखरेण काव्यमीमांसायां 'रसःकाव्यस्यात्मा' इति निगदितम्। अग्निपुराणेऽपि स्पष्टरूपेण 'रस एव काव्यजीवितमित्युद्घेषितम्। यथा-

वाग्वैदग्ध्यप्रधानेऽपि रस एवात्रा जीवितम् इति।

व्यक्तिविवेककारेण महिमभट्टेनापि उच्यते-

काव्यस्यात्मा संज्ञिनि रसादिरूपे न कस्यचिद् विमतिः। दशरूपककारेण धनंजयेन रसस्वरूपमित्थं प्रतिपादितम्-

'विभावैरनुभावैश्च सात्त्विकैर्व्यभिचारिभिः।

आनीयमानः स्वाद्यत्वं स्थायी भावो रसः स्मृतः।।'

.दशरूपकम्- 4-1

मम्मटाचार्येण काव्यप्रकाशे रसतत्त्वस्य स्वरूपमिइत्थं निरूपितम् -

कारणान्यथ कार्याणि सहकारीणि यानि च।

रत्यादेः स्थायिनो लोके तानि चेन्नाटयकाव्ययोः।।

विभावा अनुभावास्तत् कथ्यन्ते व्यभिचारिण:।

व्यक्त: स तैर्विभावाद्यै: स्थायी भावो रस: स्मृत:।।

रसतत्त्वस्य स्वरूपमित्थं प्रतिपादितं विश्वनाथाचार्येण साहित्यदर्पणग्रन्थे-

'सत्त्वोद्रेकादखण्डस्वप्रकाशानन्दचिन्मय:।

वेद्यान्तरस्पर्शशून्यो ब्रह्मास्वादसहोदर:।

लोकोत्तरचमत्कारप्राण: कैश्चित्प्रमातृभि:।

स्वाकारवदभिन्नत्वेनायमास्वाद्यते रस:।।'

तत्रा कोऽयं रस इत्यस्मिन् सन्दर्भे तेनोक्तम् -

'विभावेनानुभावेन व्यक्त: संचारिणा तथा।

रसतामेति रत्यादि: स्थायिभाव: सचेतसाम्।।'

रुय्यकपण्डितराजजगन्नाथप्रभृतय आचार्या अपि काव्ये रसस्य प्राधन्यं स्वीकृतवन्त:। यथा चोक्तं रुय्यकेन-'रसादयस्तु जीवितभूता नालङ्.कारत्वेन वाच्या:। अलङ्.काराणामुपकारकत्वात् रसादीनां च प्राधन्येनोपस्कार्यत्वात्'। रसस्य स्वरूपं निरूपयता तेनोक्तं विभावानुभाव- व्यभिचारिभि: प्रकाशितो रत्यादिश्चित्तवृतिविशेषो रस:। इति। व्यक्तो दध्यादिन्यायेन रूपान्तरपरिणतो व्यक्तीकृत एव रस:। न तु दीपेन घट इव पूर्वसिद्धो व्यज्यते।

7.0 रसानां संख्या -

साहित्यशास्त्रास्य आदिकालादेव रससंख्याविषयेऽपि मतवैभिन्न्यं दृश्यते। विभावानुभावव्यभिचारिभावानां संयोगादभिव्यज्यमान: स्थयिभाव एव रस इत्युच्यते। अतो यावन्ती स्थायिभावानां संख्या, तादृश्येव रसानां संख्या गणनीया। भरतमुनिना नाटयशास्त्रे अष्टौ रसा: प्रोक्ता:। परमभिनवगुप्तपादाचायानुसारं नाटयशास्त्रे शान्तरससहिता नवरसा: प्रोक्ता आसन्। यथा च -

'शृङ्.गारहास्यकरुणारौद्रवीरभयानका:।

बीभत्साद्भुतशान्ताश्च नवनाट्यरसा: स्मृता:।।'

भरतेन रसानां संख्या नाटयमभिलक्ष्य निर्धारिता। अत एव तत्रा नवरसेषु शान्तरसो

न वर्णितः। यद्यपि नाटयशास्त्रास्य केषुचित् संस्करणेषु नवरसा निरूपिताः सन्ति। यथा अभिनवगुप्तपादाचार्यस्य मतं वर्तते। परन्तु काव्येषु अन्येऽपि रसाः सम्भवन्ति। मम्मटाचार्यो निर्वेदमपि स्थायिभावं परिकल्प्य शान्तं नवमं रसं कथितवान्। यथा-''निर्वेद स्थायिभावोऽस्ति शान्तोऽपि नवमो रसः।''

धनंजयधनिकाभ्यां शान्तरसस्य स्थायिभावः शमः प्रोक्तः। यद्यपि नाटयेषु एतौ शान्तरसं नाङ्.गीकृतवन्तौ। परं काव्येषु शान्तरसः स्वीक्रियत एव। कविराजविश्वनाथो वत्सलमपि रसं प्रतिपादितवान्। रूपगोस्वामी भक्तिरसामतृ सिन्धु-उज्ज्वलनीलमणिग्रन्थयोः भक्तिमपि रसपदं प्रतिष्ठितवान्।

एवं रसानामेकादशसंख्या प्राचीनकाव्यशास्त्राग्रन्थेषु समुपलभ्यते। परन्तु प्रायशः तत्रा नवरसाः प्रसिद्धाः सन्ति। वत्सलभक्तिरसौ भावपदरूपेण ध्वनिवादिभिः स्वीकृतौ। ते च नवरसाः सन्ति -शृङ्.गारः करुणो हास्यो वीरो रौद्रौ बीभत्सो भयानको अद्भुतः शान्तश्च। तत्रा शृङ्.गारसस्य स्थायिभावो रतिः करुणरसस्य शोकः, हास्यरसस्य हासः, वीररसस्य उत्साहः, रौद्ररसस्य क्रोधः, बीभत्सरसस्य जुगुप्सा भयानकरसस्य भयं, अद्भुतरसस्य विस्मयः, शान्तस्य च निर्वेदः शमो वा स्थायिभावाः सन्ति।

मम्मटेन देवतादिविषयिका रतिर्भावः प्रोक्तः। आचार्यो हेमचन्द्रः काव्यानुशासनग्रन्थे स्नेहभक्तिवात्सल्यान् रतिभेदानेव प्रोक्तवान्।

रससंख्या विषये भाजे राजस्य विलक्षणमेव मतं वर्तते। सरस्वतीकण्ठाभरणे शृङ्.गारप्रकाशग्रन्थे च द्वादशरसानुद्घघोयषति भोजराजः। यथा-शृङ्.गारवीरकरूणरौद्राद्भुतभयान-कबीभत्सहास्यप्रेयः शान्तोदात्तोद्धतान्। यथा च-

'शृङ्.गारवीरकरुणरौद्राद्भुतभयानकाः।

बीभत्सहास्यप्रेयांसः शान्तोदात्तोद्धताः रसाः।।''

सरस्वतीकण्ठाभरणम् -

शान्तो रसो वर्तते न वेत्याचार्याणां मतभेदा दरीदृश्यन्ते प्राचीनकालादेव। केषांाचिदाचार्याणां मतमिदम् - शान्तो रसो भवत्येव, परन्तु न नाट्ये तस्य स्थितिः।

दशरूपककारो ब्रूते -

'शममपि केचित्प्राहुः पुष्टिर्नाटयेषु नैतस्य।

निर्वेदादिरताद्रूप्यादस्थायी स्वदते कथम्।

वैरस्यायैव तत्पोषस्तेनाऽष्टौ स्थायिनो मताः।।'

कारिकाया अस्याः व्याख्यां कुर्वन् धनिको लिखति-''इह शान्तरसं प्रति वादिनामने-

कध विप्रतिपत्तय:। केचिदाहु:- नास्त्येव शान्तो रस:। तस्याऽऽचार्येण विभावाद्यप्रतिपादनाल्लक्षणाकरणात्। अन्ये तु वस्तुतस्तस्याऽभावं वर्णयन्ति अनादिकालप्रवाहागतरागद्वेषयोरुछेत्तुमशक्यत्वात्। अन्ये तु वीरबीभत्सादावन्तर्भावं वर्णयन्ति। एवं वदन्त: शममपि नेच्छन्ति। यथा तथा अस्तु। सर्वथा नाटकादावभिनयात्मनि स्थायित्वमस्माभि: शमस्य निषिध्यते। तस्य समस्तव्यापारप्रविलयरूप- स्याभिनयायोगात्।''

धनंजयधनिकयोरुपर्युक्तवचनैर्नाटयेषु शान्तरसनिषेधस्य निम्नकारणानि संलक्ष्यन्ते -

1. भरतमुनिना शान्तरसस्य विभावादीनां प्रतिपादनं न विहितम्।

2. रागद्वेषयो: सर्वथा विनाशे सत्येव शमस्य स्थायिभावरूपेणावस्थिति: सम्भवति।

अनादिकालोव प्रवाहागतरागद्वेषयो: सर्वथोच्छेदोऽशक्य:। अत: शमस्य

स्थायित्वेनासम्भवात्। शान्तरसस्य स्थितिरपि न सम्भवति।

3. केचनऽऽचार्या: शान्तरसस्याऽन्तर्भावं वीरबीभत्सादिरसेषु कुर्वन्ति।

4. अभिनयात्मकेषु नाटड्ढेषु शमस्य सर्वथा निषेधे विहित:। शमस्तु सर्वव्यापारविलय:। अत: शमस्याऽभिनयोऽपि न सम्भव:।

5. नागानन्दनाटके प्रधान: स्थायिभावो न शम:। तत्रा दयावीररसस्य स्थायिभाव उत्साह एव प्रधानत्वेनाऽवस्थित:।

6. स्थायिभावस्तु निरुद्धैरविरुद्धैर्वा भावैर्न विच्छिद्यते। निर्वेदादिषु नैषा स्थिति:। अतस्ते न स्थायिभावा अपितु व्यभिचारिण एव।

7. अभिनयात्मकेषु काव्येषु शमस्य परिपोषो नीरसत्वं जनयति। अतो रूपकेषु शान्तरसस्थिति: कथमपि न भवति।

यद्यपि नाट्येषु शान्तरसो निवार्यते धनिकधनंजयाभ्यां परं काव्येषु स्वीक्रियत एव।

8.0 रसानां स्वरूपम् -

तत्रा नवरसानां स्वरूपमित्थं प्रस्तूयते-

शृड्.गाररस: - शृघगाररसस्योत्पत्ति: कामस्योद्भेदाद् भवति। तत्रा नायकनायिकादय आलम्बनविभावा:। चन्द्रोदयवनमालावसन्तादय उद्दीपनविभावा:, भ्रूविक्षेपकक्षादयोऽनुभ्ाावा:, स्वेदरोमांचादय: सात्त्विकभावा:, लज्जौत्सुक्यादयश्च व्यभिचारिभावा: भवन्ति। एतैरभिव्यक्तो रतिरूप: स्थायिभाव एव शृड्.गारो रस: शृड्.गाररसस्य द्वौ मुख्यौ भेदौ स्त: - संयोगोविप्रलम्भश्च। तत्रा संभोगशृड्.गारस्त्वेक एव। विप्रलम्भशृड्.गारस्य पंचभेदा: सन्ति- अभिलाषविरहेर्ष्या प्रवासमानहेतुका:।

हास्यरसः -

हास्यरसस्योत्पत्तौ विकृताकारवचनवेषादिधारको नट आलम्बनविभावः, तस्य विकृतचेष्टादय उद्दीपनविभावाः, हासस्मितादयोऽनुभावाः, निद्राऽऽलस्यावहित्थादयो व्यभिचारिभावाः सन्ति। एभिरभिव्यज्यमानो हासरूपः स्थायिभावो हास्यरसदशां प्राप्नोति।

करुणरसः -

इष्टविनाशानिष्टप्राप्त्यादयः करुणरसस्य आलम्बनविभावाः प्रियुगुणकथनमुद्दीपनविभावः। निःश्वासोच्छवासरुदनस्तम्भप्रलापविवर्णत्वादयोऽनुभावाः। स्वप्नापस्मारदैन्यादयश्च व्यभिचारिभावाः सन्ति। एतैः निष्पन्नः शोकरूपस्थायिभावः करुणरसदशामाप्नोति।

रौद्ररसः -

शत्रावादयो रौद्ररसस्यालम्बनविभावाः। शत्रुभिः कृता अपकारा उद्दीपनविभावाः। अधरदशनकम्पशस्त्रोत्तोलनप्रहारप्रतिज्ञाधारणादयोऽनुभावाः। अमर्षमदस्मृतिचपलताासूयोग्रतादयश्च व्यभिचारिभावाः सन्ति। एतैः निष्पन्नः क्रोधरूपस्थायिभावो रौद्ररसदशां प्रपद्यते।

वीररसः -

वीररसस्य आलम्बनविभावाः, विजेतव्याः शत्रावो वर्तन्ते। तेषां चेष्टा उद्दीपनविभावाः। रोमांचयुद्धसामग्रीसहायान्वेषणादयोऽनुभावाः। धृतिमतिगर्वस्मृतितर्कादयश्च व्यभिचारिणोभावा विद्यन्ते। एतैः निष्पन्न उत्साहरूपः स्थायिभावो रसदशामाप्नोति। वीररसश्चायं-दानवीर-धर्मवीर-युद्धवीर-दयावीरभेदत्वेन चतुर्धा भवति।

भयानकरसः -

यस्माद् भयम् उत्पद्यते स आलम्बनविभावो भयानकस्य। तस्य विकृतवचनचेष्टादय उद्दीपनविभावाः। सर्वाघ्गवेपथुस्वेदरोमांचादयोऽनुभावाः। चिन्तादैन्यसम्भ्रमसम्मोहत्रासादयश्च व्यभिचारिभावाः सन्ति। एतैः निष्पन्नो भयनाकः भावो भयानकरसदशां प्रपद्यते।

बीभत्सरसः -

अत्रा जुगुप्सानामकः स्थायिभावो बीभत्सरसदशां प्रपद्यते।

अद्भुतरसः -

अलौकिकपदार्थदेवतादय आलम्बनविभावा अद्भुतरसस्य। तत्रा तेषां दर्शनगुणकीर्तनादय उद्दीपनविभावाः। साधुवादकथननेत्राविकासादयोऽनुभावाः। वितर्काऽऽवेगहर्षादयो व्यभिचारिभावाः सन्ति। एतैः निष्पन्नो विस्मयरूपः स्थायिभावोऽदभुतरसदशां प्रपद्यते।

शान्तरस: -

तत्रा निर्वेद: शमो वा स्थायिभाव: शान्तरसदशां प्रपद्यते। संसारानित्यत्वनिस्सारत्वबोध्: परमात्मस्वरूपज्ञानं वा आलम्बनविभाव: पुण्याश्रमतीर्थक्षेत्रादय उद्दीपनविभावा: सन्ति। रोमांचादयोऽनुभावा विद्यन्ते। निर्वेदहर्षस्मरणजीवदयादयो व्यभिचारिभावा:।

9.0 रसानां प्राधन्यम् -

उपर्युक्तेषु नवरसेषु आचार्यै: केचन रसा: प्रधानरूपेणाऽन्ये च गौणरूपेण परिकाल्पिता:। केषांचद रसानां मूलरूपत्वं तैरुद्घोषितम्। केषांचदाचार्याणां मन्तव्यमिदं यन्मूलरस एक एव विद्यते। भोजराजेन शृङ्.गार एवैको मूलरस: परिकल्पित:। भवभूतिस्तु उत्तररामचरिते करुणरसमेव सर्वेषां रसानां मूलं प्रतिपादयति। अभिनवगुप्तेन शान्तो रसो मूलत्वेन प्रोक्त:। विश्वनाथ: साहित्यदर्पणे लिखति तस्य पितामहो नारायणोऽद्भुतरसमेव मूलरसमअंगीकृतवान्।

रसानां प्राधन्याप्राधन्यविवेचनं प्रथमं भरतेन कृतम्। तेन प्रोक्तम् – शृङ्.गाराद् हास्यरसो रौद्रात् करूणो रसो वीरादद्भूतो रसो बीभत्साच्च भयानको रस: समुत्पद्यते। यथा -

''शृङ्.गाराद्धि भवेद् हास्यो रौद्राच्च करुणो रस:।

वीराच्चैवाद्भुतोत्पत्ति: बीभत्साच्च भयानक:।।''

शृङ्.गारानुकृतिर्या तु स हास्यस्तु प्रकीर्तित:।

रौद्रस्यैव च यत्कर्म स ज्ञेय: करुणो रस:।।

वीरस्यापि च यत्कर्म सोऽद्भुत: परिकीर्तित:।

बीभत्सदर्शनं यच्च ज्ञेय: स तु भयानक:।।

नाट्यशास्त्राम्- 6/39,40,41

तात्पर्यमिदमस्ति - शृङ्.गारारौद्रवीरबीभत्सरसा: प्रधना: वर्तन्ते। हास्यकरुणाद्भुतभयानक-रसाश्चाप्रधानतां भजन्ते।

रसानां प्राधन्याप्राधन्यविवेचनस्याऽऽधरश्चित्तवृत्तयो वर्तन्ते। अन्त:करणे ह्यनादिकालादेव सिं चतानां वासनानां संस्काराणा वा वर्गीकरणं विधय काव्यशास्त्राकारै: स्थायिभावा: निर्धरिता:। अतो रसास्वादनकाले चित्तवृत्तीनां विविध अवस्था: संलक्ष्य रसानां प्राधन्याप्राधन्यविनिश्चय: क्रियते। दशरूपककारो निगदति- चित्तवृत्तयश्चतुर्विध भवन्ति-विकासविस्तारक्षोभविक्षेपा:। शृङ्.गाररसानुभवकाले विकासस्य, वीररसानुभवकाले विस्तारस्य, बीभत्सरसानुभूतिप्रसघ्गे क्षोभस्य, रौद्रास्वादनावसरे च विक्षेपस्याऽवस्था

भवति। अन्ये चत्वारो रसा:, एतेभ्यो रसेभ्य: समुत्पद्यन्ते। यथा-

'स्वाद: काव्यार्थसम्भेदादात्मानन्दसमुद्भव:।

विकासविस्तरक्षोभविक्षेपै: स चतुर्विध्:।।

शृड्.गारवीरबीभत्सरौद्रेषु मनस: क्रमात्।

हास्याद्भुतभयोत्कर्षकरुणानां त एव हि।

अतस्तज्जन्यता तेषामत एवऽवधरणम्।।''

दशरूपकम्- 4/43-45

केचनाचार्या रसमेकमेव मूलरूपेण प्रतिपाद्य तस्मादेव रसादन्येषां रसानामुत्पत्तिं प्रतिपादयन्ति। अत्रा चतुर्णामाचार्याणां भवभूत्यभिनवगुप्तभोजराजनारायणनामधेयानां मतानि प्रस्तूयन्ते। तद्यथा -

1. भवभि त: करुणरसमेवैकं प्रतिपादितवान्। करुणरसाश्रयेणैवाऽन्येषां सर्वेषां रसानामुत्पत्तिर्भवति।

एको रस: करुण एव निमित्तभेदाद्

भिन्न: पृथक् पृथगिवाश्रयते विवर्तान्।

आवर्तबुदबुदतरघ्गमयान् विकारान्।

अम्भो यथा सलिलमेव हि तत्समग्रम्।।''

उत्तररामचरितम् -3/47

2. अभिनवगुप्त: शान्तरसमेव मूलरसमकल्पयत्। नाट्यशास्त्रास्य अभिनवभारतीटीकायां तेनोक्तम्-

स्वं स्वं निमित्तमासाद्य शान्ताद् भाव: प्रवर्तते।

पुन र्निमित्तापाये च शान्त एवोपनीयते।।

सर्वेषामेव काव्यरसानामास्वादनस्याऽलौकिकत्वाद् ब्रह्मास्वादसहोदरत्वाच्च

शान्तरस एव प्रमुखरूपेणाऽवगन्तव्य:।

3. भाजे राजेन शृड्.गाररसस्यवै सर्वेषु रसेषु प्राधन्यं संसाध्तिम्। स एव सर्वेषां रसानां भावानां च मूलम्। शृड्.गाररसेनैव काव्यं सरसं भवति। रस एक: शृड्.गार एव वर्तते। अयंचाऽभिमानरूपोऽहड्.काररूपो वा भवति। शृड्.गारप्रकाशे शृड्.गारमैवेकं रसं प्रतिपादयितुं भोजराजो हेतुमुपस्थापयति-रसत्वमास्वादनं वा शृड्.गार एव। यथा-

''शृङ्.गारवीरकरुणाद्भुतरौद्रहास्य-

बीभत्सवत्सलभयानकशान्तनाम्नः।

आम्नासिषुर्दश रसान् सुध्यि वयं तु

शृङ्.गारमेव रसनाद्रसमामनामः।।''

शृङ्.गारप्रकाशः- 1/16

4. विश्वनाथेन साहित्यदर्पणे स्वपितामहस्य नारायणस्य मतमुपन्यस्तम्-चित्ते चमत्कारोत्पत्तिरेव विस्मयस्य पर्यायः। अतोऽद्भतु रस एव प्राधन्येव चमत्कारकारी। यथा-

रसे सारश्चमत्कारः सर्वत्राऽप्यनुभूयते।

तच्चमत्कारसारत्वे सर्वत्राप्यद्भुतो रसः।

तस्मादद्भुतमेवाह कृती नारायणो रसम्।।

साहित्यदर्पणः 3/3 वृतिः

10.0 विषयसंग्रह :-

इत्थं पाठेऽस्मिन् साहित्यशास्त्रायसिद्धान्ताः, तेषु रससिद्धान्तः, संस्कृतसाहित्यशास्त्रे रसतत्त्वस्य ऐतिहासिकविकासक्रमः, रसपदस्य निर्वचनम्, रसानां संख्या, रसानां स्वरूपमित्यादयो विषया मयाऽत्रा निरूपिताः।

1.0 प्रस्तावना -

साहित्यशास्त्रास्य विकासयात्रायां कालक्रमेण षट्सिद्धान्ताः संप्रदायाः पक्षा वा प्रादुर्भूताः। एते षट्सिद्धान्ताः काव्यात्मतत्त्वप्रतिपादनाय, निर्धरणाय उत वा काव्यस्य सर्वप्रधनतत्त्वं किमिति जिज्ञासायाम् आविर्भूताः। तत्रा भरतमुनिना प्रवर्तितो रससिद्धान्तः, भामहदण्डयुद्भटादिभिः प्रवर्तिताऽलंकारसिद्धान्तः, वामनाचार्येण प्रतिपादितो रीतिसिद्धान्तः, आनन्दवर्ध्नाचार्येण प्रवर्तितो ध्वनिसिद्धान्तः, कुन्तकाचार्येण प्रवर्तितो वक्रोक्तिसद्धान्तः, आचार्यक्षेमेन्द्रेण प्रवर्तित औचित्यसिद्धान्तश्चेतिः, एतेषु वक्रोक्तिसिद्धान्तो महत्वपूर्णो महनीयश्च वर्तते। वक्रोक्तिसिद्धान्तं प्रतिष्ठाप्य कुन्तकः काव्यसमालोचनायां नवमेकं मार्गमाविष्कृतवान्। कुन्तकसमये भारतीयकाव्यशास्त्रे विविधः सिद्धान्ताः सम्प्रदाया वा प्रवर्तिता आसन्। तत्रा रसाऽलंकारीतिध्वनिसिद्धान्ताः पूर्वतः प्रतिष्ठिता आसन्। आनन्दवर्ध्नेन महता प्रमाणेन प्रयत्नेन च पूर्ववर्तिनां सर्वेषां सिद्धान्तानामध्ययनं

विधय ध्वने: साम्राज्यं स्थापितम्। ध्वनिविरोधिनं सर्वेषां मनीषिणामाक्षेपान् समाधयाऽसौ ध्वनिं काव्यस्यात्मानं प्रत्यपादयत्। आनन्दवर्ध्नस्य तर्कान् प्रमाणानि, पूर्ववर्तिनांचाऽऽचार्याणां सिद्धान्तान् साऽगोपड्.मधीत्य कुन्तक: प्राचीनकाव्यशास्त्राग्रन्थाद् वक्रोक्तिं स्वीकृतवान्। सा वक्रोक्तिस्तेन स्व-भावयित्रया प्रतिभया काव्यस्याऽऽत्मपदे संस्थापिता, प्रतिष्ठापितश्च वक्रोक्तिसिद्धान्त:।

2.0 वक्रोक्तिसिद्धान्तस्य प्रवर्तक: -

वक्रोक्तिसिद्धान्तप्रवर्तक: कुन्तकाचार्य: काव्यशास्त्रास्येतिहासे नितरां प्रसिद्धोऽजायत। वक्रोक्तिजीवितग्रन्थं विरच्य असौ वक्रोक्तिं काव्यस्य आत्मानं प्रतिपादितवान्। यद्यपि सिद्धान्तस्यास्य उत्तरवर्तिभिराचार्यै: समर्थनं न कृतं तथापि सिद्धान्तोऽयं काव्यशास्त्राचार्येषु परां प्रतिष्ठां प्राप्तवान्। आचार्यकुन्तकस्य जन्म कशमीरप्रदेशेऽभवत्। यद्यपि कुन्तक: स्वजीवनवृत्तसमयादिविषये न किमपि अलिखत् तथापि वक्रोक्तिजीवितग्रन्थे समुल्लिखितानां विदुषाम् आश्रयेण तस्य समयो निधर्र यितुं शक्यते। अनेकै: समीक्षकैरपि वक्रोक्तिजीवितग्रन्थो वक्रोक्तिसिद्धान्तश्च समीक्षिता:। अत: कुन्तकस्य कालो दशमशताब्द्युत्तराध्र्कालीन एकादशशताब्दिपूर्वकालीनो वा स्वीक्रियते।

3.0 कुन्तकस्य कृतय :-

कुन्तकस्य एकैव कृति र्वक्रोक्तिजीवितमिति उपलभ्यते। ग्रन्थोऽयं बहुकालं यावत् अनुपलब्ध् एव आसीत्। प्रथमं तावत् 1923 तमे ख्रिष्टाब्दे डॉ. सुशीलकुमारडेमहोदयस्य सम्पादकत्वे अस्य ग्रन्थस्य प्रकाशनं बभूव। वक्रोक्तिजीवितग्रन्थे चत्वार उन्मेषा: सन्ति। वक्रोक्तिजीवितग्रन्थस्य त्रायो विभागा: सन्ति-कारिकावृत्त्युदाहरणानि। कारिकावृत्तीनां रचना स्वयं कुन्तककृता वर्तते परमुदाहरणानि तेन विभिन्नेभ्य: प्रसिद्धसंस्कृतकाव्येभ्य: सड्.गृहीतानि। वक्रोक्तिजीवितग्रन्थे कुन्तकेन प्रायश: सर्वेषामेव काव्यार्घैनां विवेचनं कृतम्। उन्मेषक्रमेण विषयवस्तूनां विवेचनं निम्नप्रकारेण प्राप्यते -

वक्रोक्तिजीवितस्य प्रथमोन्मेषे काव्यप्रयोजनानि, अलंकारलंकार्यभेद:, काव्यलक्षणं, वक्रोक्त्या: स्वरूपं भेदाश्च, काव्यरचनाया: त्रायो मार्गा:, यथा सुकुमार-विचित्रा-मध्यममार्गा: त्रायाणां मार्गाणां माधुर्य-प्रसाद-लावण्याभिजात्यगुणा:, त्रायाणां मार्गाणां सामान्यगुणौ औचित्य सौभाग्यगुणौ चेति विषया: निरूपिता: सन्ति।

द्वितीयोन्मेषे वक्रोक्त्या: प्रथमत्रायाणां भेदानां वर्णविन्यासवक्रताया: पदपूर्वाद्र्धवर्क्रताया: प्रत्ययवक्रतायाश्च वर्णनं विद्यते। तृतीयोन्मेषे वाक्यवक्रताया: विवेचनमस्ति। तदनन्तरं वस्तुवक्रताया अलंकाराणां च विवेचनं कुन्तकाचार्येण कृतम्। अर्थालंकारा:

वाक्यवक्रतायामन्तर्भाविता: कुन्तकेन। चतुर्थे उन्मेषे प्रकरणवक्रताया: प्रबंधवक्रतायाश्च विवेचनं प्राप्येते

4.0 वक्रोक्तिसिद्धान्तस्य प्रवर्तनम् -

वक्रोक्ति: काव्यस्य आत्मेति सिद्धान्तस्य प्रतिपादक आचार्यकुन्तक: काव्यसमीक्षाजगति नवीनं मार्गमेकं प्रवर्तितवान्। प्राचीनकाव्यसमीक्षामागार्द् भिन्नं मार्गमेकं प्रतिपादयत् असौ वक्रोक्तिं काव्यस्य प्राणभूतं तत्त्वं प्रत्यपादयत। कुन्तकानुसारं काव्यलेखनस्य द्वौ मार्गौ वर्तेते। प्रथमो मार्ग: शास्त्रायग्रन्थानां रचनाया अस्ति, यत्रा लेखको लोकप्रसिद्ध शब्दान् सामान्यव्यवहारार्थेषु प्रयुनक्ति। द्वितीयो मार्ग: काव्यप्रणयनस्य यत्रा कविभि: वक्रोक्त्या वैचित्रयमापाद्य सौन्दर्यमादधति। इदं वैचित्रयमेव वक्रोक्तिरुच्यते। इयं वक्रोक्तिरेव काव्यस्य प्राणतत्त्व:, यां विना काव्ये काव्यत्वं न प्रवर्तते। कुन्तकस्य वक्रोक्तिकल्पना महनीया अद्भुता चाऽस्ति। वस्तुतो वक्रोक्तिकल्पना मूलरूपेण भामहकृता वर्तते। भामहेन वक्रोक्तिरलंकारसर्वस्वरूपा काव्यजीवनंच प्रोक्ता। तां विना न कश्चिदलंकार: प्रवर्तते।

यथा -

सैषा सर्वत्रा वक्रोक्तिरनयार्थो विभाव्यते ।

यत्नोऽस्यां कविना कार्य: कोऽलंकारोऽनया विना ।।

-काव्यालंकार: - 2/85

भामहस्य इमामुक्तिमादाय प्रेरणां च सम्प्राप्य कुन्तको वक्रोक्तिं काव्यस्य प्राणत्वेन प्रतिष्ठापितवान्। कुन्तको वक्रोक्तिं काव्यस्य आत्मानं स्वीकृतवान्। इयं वक्रोक्तिरेव काव्ये प्राणान् संचारयति काव्यत्वंच प्रतिष्ठापयति। वक्रोक्तिं विना काव्ये प्रा णा: न संचरन्ति, परन्तु वक्रोक्तिरचनाऽपि काव्ये तदैव सम्भवा, यदा कवि अनिवार्यकल्पनाशक्तिसम्पन्नो भवति। अत: काव्ये कविव्यापारस्य प्राधन्यं वर्तते। कवेरयं व्यापारो वैचित्रययुतो भवति। यथा चोच्यते कुन्तकेन-

विचित्रो यत्रा वक्रोक्तिर्वैचित्रयं जीवितायते ।

परिस्पफुरति यस्यान्त: सा काऽप्यतिशयाऽभिध ।।

5.0 वक्रोक्तिस्वरूपनिर्धरणम् - कुन्तकस्य वक्रोक्तिजीवितग्रन्थस्य रचनाया उद्देश्योऽस्ति लोकोत्तरचमत्कारकारिवैचित्रयसिद्धये अपूर्वकाव्यालंकारनिरूपणम्। यथा -

लोकोत्तरचमत्कारकारिवैचित्रयसिद्धये।

काव्यस्याऽयमलंकारः कोऽप्यपूर्वो विधीयते।।

तत्रा अलंकाराऽलंकार्ययोः पार्थक्यं निरूपयता तेनोक्तम्-

अलंकृतिरलंकार्यमपोद्धृत्य विवेच्यते ।

तदुपायतया तत्त्वं सालंकारस्य काव्यता ।।

अयमत्रा परमार्थः - सालंकारस्यालंकरणसहितस्य सकलस्य निरस्तावयवस्य सतः समुदायस्य काव्यता कविकर्मत्वम्। तेनालंकृतस्य काव्यत्वमिति स्थितिः, न पुनः काव्यस्यालंकारयोग इति।

कुन्तकेन काव्यलक्षणमपि प्राचीनाचार्यपद्धतिमुपेक्ष्य भिन्नप्रकारेण प्रस्तुतम्। यथा-

शब्दार्थो सहितौ वक्रकविव्यापारशालिनि।

बंधे व्यवस्थितौ काव्यं तद्विदाह्लादकारिणि।।

अर्थात् शब्दार्थौ काव्यं वाचको वाच्यश्चेति द्वौ सम्मिलितौ काव्यम्। तेन यत्केषांचिन्मतं कविकौशलकल्पितकमनीयतातिशयः शब्द एव केवलं काव्यमिति केषांचिद् वाच्यमेव रचनावैचित्रयचमत्कारकारिकाव्यमिति, पक्षद्वयमपि निरस्तं भवति। तस्मात् द्वयोरपि प्रतितिलमिवतैलं तद्विदाह्लादकारित्वं वर्तते, न पुनरेकस्मिन्। तस्मात् स्थितमेतत् न शब्दस्यैव रमणीयताविशिष्टस्य केवलस्य काव्यत्वम्, नाप्यर्थस्येति। तेन शब्दार्थौ द्वौ सम्मिलितौ काव्यमिति स्थितम् एवमवस्थापिते द्वयोः काव्यत्वे काचिदेकस्य मनाङ्. मात्रान्यूनतायां सत्यां काव्यव्यवहारः प्रवर्तेत् अत एवाह सहितौ सहितभावेन साहित्येनावस्थितौ। यद्यपि वाच्यवाचकसंबंधस्य विद्यमानत्वादेतयोर्न कथंचिदपि साहित्यविरहो जायते सत्यमेतत्, किन्तु अत्रा तु विशिष्टमेव साहित्यमभिप्रेतम्। कीदृशम्? वक्रताविचित्रागुणालंकारसम्पदां परपरस्पर्धध्रिहः। तत्रा कीदृशः शब्दः कीदृशश्चार्थोऽभीष्टः, सन्दर्भेऽस्मिन् उच्यते कुन्तकेन

शब्दो विवक्षितार्थैकवाचकोऽन्येषु सत्स्वपि।

अर्थः सहृदयाह्लादकारिस्वस्पन्दसुन्दरः।।

उदाहरण यथा-'द्वयंगतं सम्प्रति...। इत्यादि।

'भर्तुमित्र प्रियमविध्वे' इत्यादि। तत्रा एतादृशौ शब्दार्थौ कथमलंकरणीयौ, अत्रा चोच्यते तेन-उभावेतावलंकार्यौ तयोः पुनरलंकृतिः।

वक्रोक्तिरेव वैदग्ध्यभअंगीभणितिरुच्यते।।

इमौ वाच्यवाचकौ अलंकार्यौ अत्यन्तसौन्दर्यकारिणा अलंकरणेन योजनीयौ। किं

तत् तयोः शब्दार्थयोरलंकरणम्, कथ्यते- वक्रोक्तिरेव तदलंकरणमस्ति।

अभिप्रायो विद्यते- काव्यमर्मविदां सहृदयानाम् आह्लादकेन वक्रकविव्यापारेण युतायां काव्यरचनायां व्यवस्थितौ शब्दार्थौ काव्यमित्युच्यते। अत्रा कुन्तकस्य अभिमतम् आसीत्-शब्दार्थयोः साहित्यमेव काव्यम्। शब्दार्थयोः साहित्येन काव्यं निष्पद्यते। परं शब्दार्थयुगलं द्विविध्वैशिष्टययुतं भाव्यम्-

(ग) कवीनामुक्तयः प्रसिद्धवचनव्यापारभिन्नवक्रतायुताः भवन्ति।

(गग) उक्तयस्ताः सहृदयहृदयाह्लादिकाः भवन्ति। एवं कुन्तकेन काव्यम् अनि-वार्यरूपेण

वक्रोक्तियुतं प्रतिपादितम्। कुन्तककृतं वक्रोक्तिलक्षणं विद्यते-

वक्रोक्तिरेव वैदग्ध्यभंगीभणितिरुच्यते।

अस्य वाक्यस्य व्याख्या कुन्तकेन निम्नप्रकारेण कृता-

वक्रोक्तिः - प्रसिद्धाभिधनव्यतिरेकिणी विचित्रौवाऽभिध। कीदृशी वैदगध्यभर्घैभ-ाणितिः ?

वैदग्ध्यं विदग्ध्भावः कविकर्मकौशलं, तस्य भर्घैं विच्छित्तिः, तया भणितिः विचित्रौवाऽभिध वक्रोक्तिरित्युच्यते।

कुन्तकस्य कथनस्याऽभिप्रायो वर्तते -

वैदग्ध्यभंगीभणितिरेव वक्रोक्तिः। प्रसिद्धकथनं विलक्षणप्रकारकथनमेव वक्रोा-क्तिः। कथनमिदं वैदग्ध्यभंगिमायुतं भवति। वैदग्ध्यस्याऽर्थो भवति- विदग्ध्स्य भावः,

निपुणकविकाव्यरचनारूपकर्मकौशलम्। तस्य भर्घैं विच्छितिः चमत्कारः। तद्द्□ारेण कथनं

वक्रोक्तिर्भवति। एवं विचित्रा अभिध उक्तिरेव वक्रोक्तिः। विचित्रोक्तेः वक्रोक्तेः त्रिध व्याख्या कुन्तकेन कृता-

(ग) शास्त्रादिप्रसिद्धशब्दार्थप्रयोगभिन्नप्रयोगः।

(गग) लोकादिप्रसिद्धशब्दार्थप्रयोगभिन्नप्रयोगः।

(गगग) लोकादिप्रसिद्धशब्दार्थव्यवहारमार्गातिक्रमणशब्दार्थप्रयोगः।

व्याख्यानस्य अस्याभिप्रायोऽयमेव यद् वर्णनशैली द्विध भवति- एका लोक-शास्त्रादिसामान्यार्थेषु प्रयुज्यते द्वितीया च तद्भिन्नलोकोत्तरचमत्कारकारिणी भवति। इयं

लोकोत्तरचमत्कारकारिणी शैली विचित्रोक्ति: वक्रोक्तिर्वा वर्तते। यत्रा इयं वक्रोक्तिस्-तदेव काव्यमित्युच्यते। कुन्तकप्रतिपादिता इयं वक्रोक्तिपरिभाषा व्यक्तिविवेककारेण महिमभट्टेनापि समर्थिता। यथा चोक्तं महिमभट्टेन-

प्रसिद्धं मार्गमुत्सृज्य यत्रा वैचित्रयसिद्धये।

अन्यथैवोच्यते सोऽर्थ: सा वक्रोक्तिरुदाहृता। व्यक्तिविवेक: -1-66

अर्थात् शास्त्रादिप्रसिद्धमार्गं परित्यज्य चमत्कारसिद्धये स एवाऽर्था यदाऽन्येन प्रकारेण उच्यते सैव वक्रोक्ति:। ध्वनिवादिन आचार्या अपि काव्यं लोकोत्तरवर्णनानि-पुणकविकर्म कथयन्ति।

उपर्युक्तविवेचनेन स्पष्टीभवति यद् वक्रोक्ति: द्वाभ्यां वैशिष्टयाभ्यां संयुता अस्ति-

(ग) प्रसिद्धकथनशैलीव्यतिरेकिलोकोत्तरशब्दार्थप्रयोग:।

(गग) सहृदयहृदयाह्लादकारित्वम्।

एतद् द्विविधवैशिष्टययुतकथनमेव वक्रोक्ति:। अथ चेयं वक्रोक्तिरेव का-व्यजीवितम्।

6.0 वक्रोक्ते: ऐतिहासिकविकासक्रम: -

काव्यसमीक्षायां वक्रोक्तिपदप्रयोगो अतिप्राचीनकालादेव दरीदृश्यते। वक्रोक्ति-शब्दस्य रचना द्वाभ्यां पदाभ्यां निष्पद्यते (वक्र + उक्ति: = वक्रोक्ति:)। सामान्यलो-कव्यवहारात् किन्चिद् वक्ररूपेण भिन्नरूपेण कथनं वक्रोक्तिर्भवति। प्राचीनमनीषिभि: पदस्याऽस्य प्रयोगो वाक्छलपरिहासकथनवचनवैदग्ध्यक्रीडालापाद्यर्थेषु कृतमासीत्। वक्रोक्तिपदस्य काव्यशास्त्रायप्रयोगं सर्वप्रथमं भामह: कृतवान् तेन प्रोक्तम्-काव्येषु सौन्दर्याधयकं तत्वमलंकार एव। काव्ये अलंकाराणाम् अस्तित्वं वक्रोक्तिं विना न सम्भवति। वक्रोक्त्यभावे काव्ये काव्यत्वं न प्रवर्तते, वार्तामात्रामेव तद् भवति। यथा-सैषा सर्वत्रा वक्रोक्तिरनयाऽर्थो

विभाव्यते।

यत्नोऽस्यां कविना कार्य: कोऽलंकारोऽनया विना।।

काव्यालंकार-2/85

गतोऽस्तमर्को भातीन्दुर्यान्ति वासाय पक्षिण:।

इत्येवमादि किं काव्यं वार्तामेनां प्रचक्षते।।

-तत्रौव -2/87

भामहेन वक्रोक्तिः स्पष्टरूपेण न परिभाषिता। भामहवचनैः वक्रोक्त्यतिशयोक्ति-शब्दौ पर्यायवाचिनौ समानार्थकौ प्रतीयेते। भामहेन अतिशयोक्तिः परिभाषिता-

लोकातिक्रान्तगोचरं वचनमतिशयोक्तिः।

अर्थात् सामान्यलोकवचनातिक्रमणं वचनम् अतिशयोक्तिः भवति। सैव च वक्रोक्तिर्वर्तते। लोचनकारोऽतिशयोक्तिमेनामलंकाराणां जीवितं प्राह। एवं भामहवचनेन काव्येषु वक्रोक्तेराधिपत्यं ध्रुवं निश्चीयते। सा च वक्रोक्तिस्त्रिधऽभिव्यज्यते-

स्वभावोक्तिरूपमाद्यलंकारवर्गोरसोक्तिश्च।

दण्डिनाऽपि वक्रोक्तिः सर्वेषामलंकाराणां मूलं प्रोक्ता। परं तस्य वक्रोक्तिप्रतिपादनं भामहात् किन्चिद् भिन्नं वर्तते। दण्डिना सकलं वाघ्मयं द्विध विभक्तं-स्वभावोक्तिः वक्रोक्तिश्च। यथा च -

भिन्नं द्विध स्वभावोक्तिर्वक्रोक्तिश्चेति वाघ्मयम्।

-काव्यादर्शः - 2/363

तन्मते न विद्यते वक्रोक्तिः काचिदलंकृतिविशेषा, अपितु उपमाद्यलंकारा एव सर्वे वक्रोक्तिरूपाः वर्तन्ते।

भामहदण्डिनौ वक्रोक्तिमतिव्यापकरूपेण स्वीकृतवन्तौ। परन्तु उत्तरवर्तिभिराचार्यैः वक्रोक्तिरेकोऽलंकारविशेष एव प्रतिपादिता। वामनाचार्यो वक्रोक्तिमेकामलंकृति-विशेषामुवाच। वामनोक्तं वक्रोक्तिलक्षणं विद्यते - सादृश्याल्लक्षणा वक्रोक्तिः।

वामनेन वक्रोक्तिरर्थालंकारत्वेन स्वीकृता। परं तदुत्तरवर्तिभिः शब्दालंकारेषु परिगणिता वक्रोक्तिः। रुद्रटोऽब्रवीत् वक्रोक्तिः शब्दालंकारेषु वर्तते। या श्लेषेण काक्वा वा द्विविध भवति। अग्निपुराणकारेणापि वक्रोक्तिः श्लेषकाकुभेदेन द्विध मता।

अलंकारवादिनामाचार्याणामनन्तरं ध्वनिवादिभिराचार्यैः वक्रोक्तिः किन्चिद् व्यापकरूपेण विवेचिता। आनन्दवधर्नो वक्रोक्तिमतिशयोक्तिन्च एकत्वेन प्रतिपादयन् तां काव्यसौन्दर्याभिव्यंज्किाम् अमनुत। सर्वेऽलंकारा अतिशयोक्तिगर्भिताः भवन्ति महाकविभिः संयोजता इयमतिशयोक्तिः काव्येषु अनिवर्च नीयां शोभां पुष्णाति। तदनन्-तरम् आनन्दवधर्नेन भामहोक्तिं प्रमाणत्वेन समुपस्थापितम्। अभिनवगुप्तपादाचार्योऽपि लोचनटीकायाम् आनन्दवर्ध्नकथनं समर्थितवान्। तेन प्रोक्तम् -

वक्रोक्तिरतिशयोक्तिर्वा सर्वेष्वलंकारेषु सामान्या वर्तते 'येनाऽतिशयोक्तिः

सर्वालंकारसामान्यम्। लोचनटीका।

वक्रोक्तिस्वरूपविषये मम्मटाचार्य आनन्दवर्धनमनुसृतवान्। यद्यपि मम्मटाचार्यो, वक्रोक्ते: गणनां शब्दालंकारेषु कृत्वा तस्या: द्वौ भेदौ श्लेषेण काक्वा च प्रादर्शयत्।

यथा-चोक्तं तेन काव्यप्रकाशग्रन्थे -

यदुक्तमन्यथा वाक्यमन्यथाऽन्येन योज्यते।

श्लेषेण काक्वा वा ज्ञेया सा वक्रोक्तिस्तथा द्विध।।

-काव्यप्रकाश: 9/78

परं विशेषालंकारविवेचने मम्मटो वक्रोक्तिरूपामतिशयोक्तिं सर्वेषामलंकाराणां प्राणत्वेन व्यवस्थापयत्। तदनन्तरम् असौ भामहवचनं (सैषा सर्वत्रा वक्रोक्ति:) प्रमाणरूपेण स्वीकृतवान्। सर्वत्रौवंविधविषयेऽतिशयोक्तिरेव प्राणत्वेनाऽवतिष्ठते। तां विना प्रायेणऽलंकारत्वायोगात्। काव्यप्रकाश: वृतित:, 10-136।

भोजराजेन वक्रोक्तिरतिव्यापकत्वेन प्रतिष्ठापिता। तेन प्रोक्तं साहित्यं द्विविध्ां-वचनरूपं काव्यरूपंच। शास्त्रे लोके च यानि अवक्रवचनानि, तद्वचनम्। अर्थवादादौ या वक्रता तत् काव्यम्। यथा-

यदवक्रं वच: शास्त्रे लोके च वच एव तत्।

वक्रं यदर्थवादादौ तस्य काव्यमिति स्मृति:।।

-शृंगारप्रकाश:- 9/60

भोजराजानुसारं सर्वेऽप्यलंकारा वक्रोक्तिवाच्या: भवन्ति। भामहेन स्वभावोक्तिरसवदाद्यलंकारसहिता: सर्वेऽप्यलंकारा अतिशयोक्त्यां समाहिता:। वक्रोक्ते: मार्गं स्वभावोक्ते: पृथक् कुर्वन्नपि दण्डी रसवदाद्यलंकारान् वक्रोक्तौ समाहितवान् परन्त भोजराजेन रसवदाद्यलंकारा वक्रोक्ते: पृथक् कृता:। भोजराजेन काव्यवाघ्मयं त्रिध विभक्तम् - स्वभावोक्तिर्वक्रोक्ती रसोक्तिश्च। यथा-

वक्रोक्तिश्च रसोक्तिश्च स्वभावोक्तिश्च वाघ्मयम्।

-सरस्वतीकण्ठाभरणम्-5/9

एवंच भोजराजस्य वक्रोक्ति: स्वभावोक्तिरसोक्तभ्यां भिन्ना अस्ति। अन्ये सर्वेऽप्यलंकारा: वक्रोक्त्यां समाविशन्ति।

कुन्तकोत्तरवर्तिन आचार्या: वक्रोक्तिं न तथा महनीयामगणयन्। काव्यशास्त्राग्रन्थेषु तै: वक्रोक्ति: शब्दालंकारत्वेन निरूपिता। विशेषालंकारविवेचने मम्मटो यद्यपि विशेषोाक्तिमतिशयोक्तिरूपां सर्वेषामलंकाराणां प्राणान् अगणयत्, तथापि काव्यप्रकाशस्य

नवमोल्लासे सा शब्दालंकाररूपेणैव उपलभ्यते।

मम्मटानन्तरं हेमचन्द्रजयदेवविद्याध्रविद्यानाथवाग्भटविश्वनाथकेशवमिश्राप्रभृतय आचार्या: वक्रोक्तिं शब्दालंकारेषु एव अगणयन्। परं रुय्यकामृतानन्दादिभि: वक्रोक्तिरर्थालंकाररूपा निरूपिता।

7.0 वक्रोक्ति: स्वभावोक्तिश्च-

काव्यशास्त्राग्रन्थेषु स्वभावोक्त्यलंकारस्यापि स्वरूपवर्णनमुपलभ्यते। स्वभावोक्त्यलंकारस्य समावेशो वैदग्ध्यभअंगीभणितिरूपवक्रोक्त्यां विधतुं शक्यते न वेति विवादास्पदम्। वर्ण्यवस्तुन: स्वभावरूपादीनां यथावद्वर्णनमेव स्वभावोक्ति:। परन्तु सामान्यमार्गविलक्षणकथनं तु वक्रोक्ति:।

स्वभावोक्त्यलंकारं प्रथमं भामह: काव्यालंकारे उल्लिखितवान्। परन्त्वसौ स्वभावोक्त्यलंकारस्याऽस्तित्वं न सुस्पष्टमअंगीकृतवान्। अन्येषामाचार्याणां मतान्युदृधृत्य तने प्रोक्तम्-केचनाऽऽचार्या: स्वभावोक्त्यलंकारमामन्ति। वस्तुनो यथावत् स्वभाववर्णनमेव स्वभावोक्ति:। भामहो वक्रोक्त्यां लोकतिक्रान्तगोचरतां प्रतिपादयंस्तामलंकारमूलामाचक्षते।

स्वभावोक्तेर्यदुदाहरणं भामहेन प्रदर्शितं तद् वार्तामात्रामेव वर्तते। स्वभावोक्ते: सुस्पष्टमलंकारत्वमअंगीकृत्य दण्डी तामाद्यामलंकृतिं जगाद। विविधपदार्थानां यथावद् रूपप्रकटनं स्वभावोक्तिर्जातिर्वाऽलंकृतिर्भवति। स्वभावोक्तिर्न वक्रोक्त्यन्तर्गता तेनाऽभिमता। समस्तं वाघ्मयं तेन द्वयोर्वर्गयोर्विभक्त् स्वभावोक्तिर्वक्रोक्तिश्च। एवं तेन स्वभावोक्तिर्वक्रोक्ते: पृथक्कृता।

उद्भटो लीलाविशेषर्णनं स्वभावोक्तिं मत्वा तत्रा पदार्थानां यथावद् वर्णनमलंकृतिं प्राह। काव्यालंकारसारसंग्रहटीकायां प्रतिहारेन्दुराजने प्रोक्तम्-स्वभावोक्त्यां पदार्थस्याऽसाधारणरूपध्वननत्वादत्राऽलंकारत्त्वं विद्यते। वामनेन स्वभावोक्तिरलंकृति- रूपत्वेन न स्वीकृता। तने प्रोक्तम्-वस्तुनो यथावद् रूपवर्णनस्य तस्य स्पष्ट कथनस्याऽन्तर्भाविोऽर्थव्यक्तिगुणे भवति। भोजराजने स्वभावोक्तिरलंकृतित्वेन स्वीकृता, परं न सा वक्रोकत्यन्तर्गता। काव्यस्य त्रायो मार्गा: भवन्ति स्वभावोक्तिर्वक्रोक्ती रसोक्तिश्च।

वक्रोक्तिस्वभावोक्त्यो: संबंध: कुन्तकेन विस्तरेण निरूपित:। न तने स्वभावोक्तिरलंकाररूपेण स्वीकृता। स्वभावोक्तेरलंकारत्वं तेन निराकृतम्। कुन्तकेन प्रोक्तं स्वभाववर्णनेनैव स्वभावोक्ति: परमियं स्वभावोक्तिस्तु काव्यशरीरमेव यदलंकार्यं न त्वलंकृति:। यदि स्वभावोक्तिरेवाऽलंकृतित्वेन गण्यते, तदा स्वभाववर्णनातिरिक्तं काव्यशरीरस्थानीयं किमन्यद् वस्तु सम्भवेद् यदलंकार्यतया ह्यलड्.क्रियेत। अत:

स्वभावोक्तेरलंकृतिरूपेण स्वीकरणमसंगतमेव। स्वभावोक्तेरलंकारत्वं प्रतिपादयता महिमभट्टने प्रोक्तम्- वस्तुवर्णनप्रकारो द्विविध्: सामान्यो विशिष्टो वा। प्रथमवर्णनप्रकार: साधरणजनानां, द्वितीयश्च प्रतिभावतां कवीनां वर्तते। वस्तूनां विशिष्टं रूपं कविप्रतिभया प्रत्यक्षवद् दृष्टिगोचरं भवति। तदेवाऽलंकारत्वेन समीक्षकैर्गण्यते। अतो लोकोत्तरभावेनैव स्वभावोक्तिरलंकृतित्वेन प्रशस्यते।

महिमभट्टानन्तरमपि मम्मटरुय्यकहेमचन्द्रविश्वनाथादिभिराचार्यै:

स्वभावोक्तिरलंकारत्वेनाऽङ्.गीकृता।

इत्थं सिद्धमेवेदं यत् लोकोत्तरभावस्य हृदयाह्लादकत्वस्य च निहितत्वादधिकसंख्य-कैराचार्यैं: सा ध्रुवमलंकारत्वेन स्वीकृता। परन्तु कुन्तक एनां स्वभावोक्तिमलंकृतिरूपेण नाऽङ्.गीकृत्य ह्यलंकार्यमेव न्यरूपयत्।

8.0 वक्रोक्ते: काव्यात्मत्वसमीक्षा -

वक्रोक्तिं काव्यस्य प्राणरूपेण प्रतिष्ठाप्य कुन्तक: काव्यसमीक्षाजगति वक्रोक्तिसिद्धान्तं प्रवर्तितवान्। काव्यसौन्दर्याधियकानि सर्वाणि तत्त्वानि कुन्तकेन वक्रोक्तौ समावेशितानि। प्रथमं कुन्तकेनाऽलंकारवादिनां मतं खण्डितम्। तेन प्रोक्तम्- शब्दार्थयोर्नाऽलंकारयोगेन काव्यत्वम् अपितु अलंकृतौ शब्दार्थाविव काव्यम्। एवंच काव्येऽलंकाराणां पृथग् विवेचनं कल्पनाप्रसूतमेव वर्तते। रसवदाद्यलंकारेषु नाऽलंकारत्वमिति प्रतिपाद्य तेनाऽलंकारवादिन: पुन: निराकृता:। सर्वेऽलंकारा: वक्रोक्त्यन्तर्हिता: भवन्ति।

रससिद्धान्तमाक्षिप्य कुन्तकेन रसस्याऽऽत्मत्वं निराकृतम्। काव्ये रसस्याऽनिवार्यत्वमलंकार्यत्वंच प्रतिपाद्याऽपि कुन्तकेन रस: वक्रोक्तिसम्पादितोऽस्तीति स्वीक्रियते। तन्मते-काव्ये रसो वक्रोक्त्यधीनो भवति। कुन्तकेन रीतयोऽपि वक्रोक्त्यन्त:पातिता:। वामनस्य वैदर्भीरीति: सुकुमारमार्गो गौडीरीतिर्विचित्रामार्ग: पांचालीरीतिश्च मध्यममार्गाऽस्तीति प्रतिपाद्य तने रीतीनां सम्बन्ध: कविस्वभावेन सह स्थापित:। काव्ये सर्वे मार्गा: समानार्थकत्वं भजन्ते, न च तत्रा किमपि परस्परश्रेष्ठत्वभावकथनस्यौचित्यमिति कुन्तकस्य मतम्। इत्थं प्राचीनाचार्यप्रतिपादितानां रीतीनां समावेश: कुन्तकेन वक्रोक्तिसिद्धान्ते विहित:। कुन्तकस्य महान् प्रयत्नोऽयम् आसीद् यदसौ वक्रोक्ति सिद्धान्ते ध्वने: समावेशस्य साहसं कृतवान्। ध्वने: विभिन्नभेदा: वक्रोक्ते: विभिन्नभेदेषु समाविष्टा: भवन्तीति तेनोक्तम्। अतो ध्वन्यपेक्षया वक्रोक्ते: व्यापकत्वात् तस्य काव्यात्मत्वम् उपयुक्ततरमेव। वक्रोक्ति: काव्यजीवितमिति प्रतिपादयन्नपि कुन्तको रसाद् ध्वने औचित्याच्च पराङ्.मुखो नाऽभवत्। त्रायाणामपि यथा औचित्यस्य आवश्यकताया: रसस्य आह्लाद्कताया: ध्वनेश्च महिम्न: प्रतिपादनं तेन सर्वत्रा विहितम्। रस औचित्यंच

वक्रोक्ते: प्राणा इत्यपि तेन प्रतिपादितम्।

अत्र विचारणीयोऽयं विषयो यद् रसो ध्वनिरौचित्यंच त्राणि तत्त्वानि काव्ये महनीयानि इति विमृशन्नपि कुन्तको वक्रोक्तिमवे कथं काव्यात्मत्वेन प्रतिपादितवान्। अत्रा कुन्तकेनोक्तम् -

'रसध्वन्यौचित्यतत्त्वेभ्यो वक्रोक्तित्वं व्यापकतरं विस्तृततरंच वर्तते। वैदग्ध्भघ्ङ्गीभणितिरूपा वक्रोक्ति: सर्वाणि एतानि तत्त्वानि अन्तर्निदधति। एतेषां काव्ये प्रतिपादनं वक्रोक्त्या एव भवति। रसध्वन्यौचित्यानि वक्रोक्तेरावश्यकमहत्त्वशालीन्यघ्ङानि सन्ति, परन्तु नाऽनिवार्याणि। तानि वक्रोक्ते: सौन्दर्यं वर्ध्यन्ति, परं तैर्विनाऽपि काव्ये काव्यत्वमवतिष्ठते। परन्तु वक्रोक्तिरहिते काव्ये न काव्यत्वम्। वार्तामात्रामेव तत्। अत एव कुन्तको वक्रोक्तिं काव्यस्यात्मानं प्रतिपादितवान्। परन्तु कुन्तकानन्तरं तस्येदमभिमतं नाधिकं प्रतिष्ठां लेभे। काव्यशास्त्रास्येतिहासे कुन्तक एव तथाविध: काव्यशास्त्राकारो वर्तते, यने वक्रोक्ति: काव्यस्यात्मा निरूपित:। कुन्तकस्य विवेचनं विलक्षणं वैज्ञानिकंच दृश्यते। अतोऽसौ महामान्यानां समीक्षकाणां श्रेण्यां गणनीयो वर्तते। वस्तुत: कुन्तकेन वक्रोक्तितत्त्वं यथा विमृष्टं, तद् विमशर्नं महनीयं स्तुत्यं विचारयोग्यंच वर्तते।

वस्तुत: काव्यसमीक्षकाणामाचार्याणां द्वौ वर्गौ स्त:। प्रथमो वर्गस्तेषां विदुषां वर्तते, ये काव्यशरीरं महनीयं मन्नते, शब्दार्थयो: सौन्दर्यंच काव्यत्वं गणयन्ति। अलंकारवादिनो रीतिवादिनश्चाऽऽचार्या: तथाविध: वर्तन्ते। अभिधवादिनश्चाऽपिते कथ्यन्ते। द्वितीयो वर्गस्तेषामाचार्याणां वर्तते, ये काव्यस्य बाह्यपक्षापेक्षयाऽन्तरघ्ङपक्षं विशिष्टं मन्नते। रसध्वनिसिद्धान्तौ तस्य प्रतिपादकौ आचार्यास्ते व्यंजनावादिन: कथ्यन्ते। पूर्ववर्तिनां रीतिवादिनामलंकारवादिनांचाऽऽचार्याणामभिमतानां खण्डनं कृत्वाऽऽनन्दवर्ध्न: काव्ये व्यंजनां प्रतिष्ठाप्य व्यघ्ङ्यार्थस्य श्रेष्ठत्वं सम्पादितवान्। तेन साधितम्-प्रतीयमानार्थस्य रमणीयत्वे सत्येव काव्यमुत्तमं भवति, अथ च स एव ध्वनि:। परं कुन्तक: काव्येषु कविव्यापारस्य प्राधन्यं मनुते, अतोऽसौ वक्रोक्तिव्यापारपक्षपाती। वस्तुतो वक्रोक्तिसम्प्रदायस्य प्रादुर्भाव: प्रत्युत्तररूपेण समभूत्। काव्यात्मवादिन: प्रति देहवादिनामयमन्तिमो विपफला प्रयत्न:। काव्यस्य येषां सौन्दर्यभेदानामानन्दवधर्नेन ध्वनिमार्गेण आत्मपरकव्याख्या कृता, तेषां सर्वेषां कुन्तकेन स्वाऽपूर्वप्रतिभासामर्थ्येन वक्रोक्तिमार्गेण वस्तुपरकव्याख्या प्रस्तुता। कुन्तकस्य सा चेष्टा वक्रोक्तिर्विद्यते। एवमियं वक्रोक्ति: प्रायशे ध्वनेर्वस्तुगतपरिकल्पनेव प्रतिभाति।

वक्रोक्ते: साघ्ङोपाघ्ङविवेचनानन्तरमपि कुन्तकस्याऽयं सिद्धान्तो न सर्वमान्यो बभूव। कुन्तकानन्तरं ध्वनिवादिभिराचार्यैर्वक्रोक्ति: शब्दालंकारमात्रां प्रतिपादिता। तदनन्तरं काव्यशास्त्राग्रन्थेषु वक्रोक्ति:- शब्दालंकाररूपेण प्रसिद्धा संजाता।

वक्रोक्तिसिद्धान्तो ध्वनिवादिभिराचार्यैरमान्ये कृतेऽपि काव्यसमीक्षेतिहासे कुन्तकस्य महत्त्वं न क्षीयते। कुन्तक: काव्यस्य शरीरमात्मानं च पृथग्रूपेणा अंगीकृतवान्। सर्वाणि तत्त्वानि तेन वक्रोक्तावेव समावेशितानि। वर्णत: प्रबन्ध्ररचनापर्यन्तं सर्वाणि काव्या अंगानि वक्रतायामन्तर्हितानि संलक्ष्यन्ते। अभिधवादिनोऽपि कुन्तकस्याऽभिध न सामान्या। विचित्रौवाऽभिध सा लक्षणां व्यंजनांचाप्यन्तर्निदधति। कुन्तकस्य महत्त्वमविज्ञायैवोत्तरवर्तिन आचार्यास्तस्य मूल्यांकने न समर्था बभूवु:।

9.0 विषयसंग्रह: - साहित्यशास्त्रास्य षट्सिद्धान्तेषु वक्रोक्तिसिद्धान्तोऽत्रा मया संक्षिप्तरूपेण निरूपित:। पाठेऽस्मिन् वक्रोक्तिसिद्धान्तस्य प्रवर्तक: कुन्तक:, कुन्तकस्य कृतय:, वक्रोक्तिसिद्धान्तस्य प्रवर्तनम्, वक्रोक्ते: स्वरूपनिर्धरणं लक्षणंच, वक्रोक्ते: ऐतिहासिकविकासक्रम:, वक्रोक्ति: स्वभावोक्ति: वक्रोक्ते: काव्यात्मत्वसमीक्षर्णामत्यादयो विषया विवेचिता: सन्ति।

1.0 प्रस्तावना-

साहित्यशास्त्रास्य षट्सिद्धान्तेषु वक्रोक्तिसिद्धान्तोऽन्यतम:। सिद्धान्तस्य प्रवर्तक आचार्यकुन्तको वर्तते। तेन वक्रोक्तिजीवितग्रन्थे वक्रोक्तितत्त्वम् अभिनवरीत्या प्रतिपाादितम् अथ च वक्रोक्ति: काव्यात्मतत्वरूपेण प्रतिष्ठापिता। वक्रोक्ते: सिद्धान्तसम्बद्धं मतं पूर्वस्मिन् पाठे भवान् पठितवान्। पाठेऽस्मिन् कुन्तकाचार्येण वक्रोक्ते: कति भेदप्रभेदा: प्रतिपादिता: वक्रोक्तिजीवितग्रन्थे, तेषां सर्वेषां भेदानां सोदाहरणं व्याख्यानं, वक्रोक्ते: भेदेषु काव्यस्यान्यतत्त्वानाम् अन्तर्भाव:, अथ च वक्रोक्ते: काव्यस्य अन्यतत्वै: सह सम्बन्धदीनां विषयाणां निरूपणं क्रियते।

2.0 कुन्तकृता: वक्रोक्तिभेदा: -

'वक्रोक्तिजीवितम्' इत्यस्य ग्रन्थस्य रचयितु: कुन्तकाचार्यस्य वक्रोक्ते: संकल्पना पृथक् एवास्ति। ग्रन्थस्य प्रारम्भे ग्रन्थप्रयोजनं निरूपयन् स: कथयति-

लोकोत्तरचमत्कारकारिवैचित्रयसिद्धये।

काव्यस्यायमलंकार: कोऽप्यपूर्वो विधीयते।।

कवे: कर्म काव्यं तस्य असामान्याह्लाद्धियिविचित्राभावसम्पत्तये ग्रंथोऽयं विरच्यते। अस्याभिधनमलंकार उपमादिप्रमेयजातमभिधेयम्, उक्तरूपवैचित्रयसिद्धश्च अस्य प्रयोजनम्। वैचित्रयंच तदैव प्राप्यते यदा शब्दार्थौ उभावपि केनापि शोभातिशयकारिणा अलघ्करणेन योज्येते तच्चालघ्करणं वक्रोक्तिरेवास्ति - यथा

उभावेतावलंकार्यौ तयो: पुनरलंकृति:।

वक्रोक्तिरेव वैदग्ध्यभअंगीभणितिरुच्यते।।

वक्रोक्त्या अलंकृतमेव काव्यं सुशोभते एषा वक्रोक्तिरलंकारविशेषो न वर्तते सा तु वक्रकविव्यापाररूपा वैदग्ध्यभंगीभणितिरस्ति। निपुणकवेः काव्यनिर्माणकौशलमेव वैदग्ध्यं, 'भंगी' इत्यनेन शोभा विच्छित्तिर्वा अभिप्रेता। इत्थं विदग्ध्कवेरपूर्वनिर्माणजन्या या चारूता तामाश्रित्य कथिता उक्तिरेव वक्रोक्तिरस्ति। प्रसिद्धशास्त्रालोकव्यवहारभिन्नेन काव्यनिर्माणकौशलेन अलौकिकसौन्दर्यस्योन्मीलनं भवति। अत एव कुन्तकेन वक्रोक्तिः काव्यजीवितरूपेण स्वीकृता अस्ति। इत्थं काव्ये या वक्रोक्तिः काव्यजीवितरूपेणाअंगीकृता सा वक्रता पदे पदार्थे वाक्ये प्रकरणे प्रबंधे च सर्वत्रौव विराजते। अत एव कुन्तकेन कविकौशलजनितायाः वक्रतायाः षड्भेदाः स्वीकृताः। ते च षड्भेदाः सन्ति-

वर्णविन्यासवक्रता पदपूर्वाद्धवक्रता, पदपराध्र्ववक्रता, वाक्यवक्रता, प्रकरणवक्रता, प्रबन्ध्वक्रताश्चेति। यथा चोक्तं तेन-

कविव्यापारवक्रत्वप्रकाराः सम्भवन्ति षट्।

प्रत्येकं बहवो भेदास्तेषां विच्छित्तिशालिनः।।

वर्णविन्यासवक्रत्वं पदपूर्वाद्धवक्रता।

वक्रतायाः परोऽप्यस्ति प्रकारः प्रत्ययाश्रयः।।

वाक्यस्य वक्रभावोऽन्यो विद्यते चः सहस्रध।

यत्रालंकारवर्गोऽसौ सर्वोऽप्यन्तर्भविष्यति।।

वक्रभावः प्रकरणे प्रबन्धेऽप्यस्ति यादृशः।

उच्यते सहजाऽऽहार्यः सौकुमार्यमनोहरः।।

वक्रोक्तिजीवितम् - 1-18

3.0 वर्णविन्यासवक्रता -

कुन्तकेन प्रतिपादिताः ये षड्मुख्यभेदाः सन्ति वक्रतायाः, तेषु वर्णविन्यासवक्रता प्रथमो भेदः। अक्षराणां विशिष्टन्यसनस्य वक्रभाव एव वर्णविन्यासवक्रताऽस्ति। अस्यां द्वयोरनेकेषां वा वर्णानां स्वल्पव्यवधनेन पौनःपुन्येन सन्निवेशं विदधति येन सहृदयानां चेतांसि चमत्कृतानि भवन्ति। वक्रोक्तिजीवितेऽस्य समुपस्थापनमित्थं कृतमस्ति-

एको द्वौ बहवो वर्णा बध्यमानाः पुनः पुनः।

स्वल्पान्तरस्त्रिध सोक्ता वर्णविन्यासवक्रता।।

वर्गान्तयोगिनः स्पर्शा द्विरुक्तास्त-ल-नादयः।।

शिष्टाश्च रादिसंयुक्ताः प्रस्तुतौचित्यशोभिनः।।

वर्णशब्दोऽत्रा व्यंजनपर्याय:। तने सा वर्णि वन्यासवक्रता। यथा चोक्तं कुन्तकेन-वर्णानां विन्यासो वर्णविन्यास:, अक्षराणां विशिष्टन्यसनं तस्य वक्रत्वं वक्रभाव: प्रसिद्धप्रस्थानव्यतिरेकिणा वैचित्रयेणोपनिबद्ध: सन्निवेशविशेषविहितस्तद्विदाह्लादकारी शब्दशोभातिशय: यथा-

चोदाहरणम्-

प्रथममरुणच्छायस्तावत्तत: कनकप्रभ

स्तदनु विरहोत्ताम्यत्तन्वीकपोलतलद्युति:।

प्रसरति ततो ध्वान्तक्षोदक्षम: क्षणदामुखे

सरसबिसिनीकन्दच्छेदच्छविर्मृगलांछन:।।

अथवा -

उन्निद्रकोकनदरेणुपिशंगिताड्.गा

गुंजन्ति मंजु मधुपा: कमलाकरेषु।

एतच्चकास्ति च रवेर्नवबन्धुजीव-

पुष्पच्छदाभमुदयाचलचुम्बिबिम्बम्।।

द्वयोरपि श्लोकयो: वर्णविन्यासवक्रताविहित: शब्दशोभातिशयो नितरां समन्मीलित:। वर्णविन्यासवक्रत्वमेव प्राचीनाचार्यैरनुप्रासालंकाररूपेण वर्णितमस्ति। वर्णजनितकाव्यशोभाया बहव: प्रकारा: सम्भवन्ति। काव्योपात्तविषयौचित्यदृष्ट्यैव वर्णानां मंजुलसन्निवेश: करणीय:। यथा हि वीरादिपरुषरसप्रसघ्गे तदनुकूलपरुषवणार्नां प्रयोग: कर्त्तव्य:। वर्णगतसौन्दर्यस्योपनिबंधनाय एतदपि आवश्यकं यत् काव्ये तत्तत्वर्णनिबन्धनस्याग्रहो न भवेत्। एकस्यैव वर्णस्य आवृत्तिर्न तथा सुरुचिरा भवति अत एव नवनवानां वर्णानामावृत्ति: कर्त्तव्या। एतदपि ध्यातव्यं यद् एवंविधनां संयोजनं श्रुतिपेशलं भवेत् -

नातिनिर्बन्ध्विहिता नाऽप्यपेशलभूषिता ।

पूर्वावृत्तपरित्यागनूतनावर्तनोज्ज्वला ।।

इत्थं कथयितुं शक्यते यत् - व्यं जनवर्णसौन्दर्यप्रकाराणां विवेचनं कुन्तकेन वर्णविन्यासवक्रतान्तर्गतं विहितम्। काव्यरचनायामके स्य द्वयोरध्किनां वा वर्णानां स्वल्पान्तरेण पुनरूपनिबंधनं वर्णविन्यासवक्रता वर्तते। अनुप्रासयमकालंकारयो: तिसृणां वृत्तीनां रीतीनां चाऽन्तर्भावो वर्णविन्यासवक्रतायां भवति।

4.0 पदपूर्वाद्धर्वक्रता -

पदस्य सुबन्तस्य तिघ्न्तस्य वा यतपूर्वार्धं प्रातिपदिकलक्षणं धतुलक्षणं वा तस्य वक्रता वक्रभावो विन्यासवैचित्रयम्। तत्रा च बहवः प्रकाराः सम्भवन्ति। पदपूर्वाद्धेर्न प्रातिपदिकस्य धतोर्वा वक्रता अभिप्रेताऽस्ति। स्वप्रतिभाकौशलेन कविः एवंविधनां पदानां सन्निवेशं करोति येन अपूर्वमेव वैचित्रयं समुन्मीलितं भवति। कविकौशलजनित-वक्रता एषा नवविध स्वीकृता यथा – (1) रूढिवैचित्रयवक्रता (2) पर्यायवक्रता (3) उपचारवक्रता (4) विशेषणवक्रता (5) संवृतिवक्रता (6) वृत्तिवैचित्रयवक्रता (7) भाववैचित्रयवक्रता (8) लिंगवैचित्रयवक्रता (9) क्रियावैचित्रयवक्रता च। तत्रा एतासां नवविधनां पदपूर्वाद्धर्वक्रताणां क्रमशो विवेचनं क्रियते।

4.1 रूढिवैचित्रयवक्रता -

शब्दस्य नियतवृत्तिता नाम कश्चिद् धर्मो, रूढिरुच्यते, यथा कोषगतो लोकप्रसिद्धो वाऽर्थः। यदा एवंविधः शब्दा लोकप्रसिद्धादर्थात् भिन्नेऽर्थे आरोप्यमाणः सन्तः प्रयुज्यन्ते, अथवा एतैः कस्यापि गुणविशेषस्योत्कर्षातिशयो विवक्षितो भवति तदा एवंविधेषु स्थलेषु रूढ़िवैचित्रयवक्रतायाः सौन्दर्यं परिलक्ष्यते। यथा चोक्तं कुन्तकेन- यत्रा रूढेरसंभाव्य धर्माध्यारोपगर्भता प्रतीयते। शब्दस्य नियतवृत्तिता नाम धर्मो रूढिरुच्यते, रोहणं रूढिरिति कृत्वा। सा च द्विप्रकारा संभवति - नियतसामान्यवृत्तिता नियतविशेषवृत्तिता। तेन रूढिशब्दनोत्रा रूढिप्रधनः शब्दोऽभिधीयते, धर्मधिर्मणोरभेदोपचारदर्शनात्। उदाहरणं यथा-

'रामोऽस्मि सर्वं सहे। इत्यत्रा रामपदेन 'दाशरथि राम इत्येवार्थो नाभिप्रेतः, अपितु रामस्य क्रौर्यादिगुणोपेतो लोकोत्तरतिरस्कारश्लाघ्योऽत्राभिव्यज्यते। एषा च रूढिवै-चित्रयवक्रताप्रतीयमानधर्मबाहुल्याद् बहुप्रकारा भवति। अस्यां कविविवक्षितविशेषप्रति-पादनसामर्थ्यलक्षणः शोभातिशयः सम्पद्यते।

4.2 पर्यायवक्रता -

वर्ण्यविषयस्य सौन्दर्या तशयोन्मीलनाय यत्रा कवि अनेकेषु वाचकेषु विशेषमेव वाचकं प्रयुङ्.क्ते तत्रा पयार्य वक्रता भवति। अस्याः षड्भेदाः कुन्तकेन निरूपिताः। उदाहरणं यथा-

सद्यः प्रोद्गतविस्मयैरितिगणैरालोक्यमानं मुहुः ।

पायाद्वः प्रथमं वपुः स्मररिपोर्मिश्रीभवत्कान्तया।।

अत्रा भगवतः शिवस्य 'स्मररिपोः' इति पर्यायः कामपि वक्रतामुन्मीलयति। यतो हि कामशत्रोः शरीरस्य कान्तया मिश्रीभावो न कथमपि सम्भाव्यत इति गणानां तक्षणमुत्पन्नं विस्मयत्वमुपपन्नमस्ति। अपि च रघुवंशस्य अधेलिखिते श्लोके प्रयुक्तो 'महीपाल' शब्दो विशेषार्थाभिधयी सन् विच्छित्तिविशेषमुद्घाटयति- अलं महीपाल तव

श्रमेण .... मारुतस्य।। अखिलां पृथिवीं यो रक्षति सः सिंहात् धेनुरक्षणेऽसमर्थ इति असभाव्यमर्थं प्रतिपादनाय नृपवाचकशब्दसहस्रसंभवेऽपि 'महीपाल' इति पदस्य प्रयोगः पर्यायवक्रतां विदधति। एतच्च पर्यायवक्रत्वं वाच्यासम्भवविधर्मान्तरगर्भीकरणेनापि दृश्यते। यथा-अंगराज! सेनापते! राजवल्लभ! रक्षैनं भीमाद दुःशासनम् इति। उदाहरणेऽस्मिन् अंगराजादित्रायाणामपि पर्यायशब्दानाम् असम्भावितं कर्णस्य रक्षाकरत्वरूपम् अकिन्चत्करत्वम् आधरीकृत्य उपहासः क्रियते, अमुं दुःशासनं रक्ष।

4.3 उपचारवक्रता -

यत्र प्रस्तुतवस्तुनोऽप्रस्तुतवस्तुर्ध्मेण सह सादृश्यसम्बन्धं स्थापयन् भेदारोपणं क्रियते तत्रा उपचारवक्रत्वं नाम पदपूर्वाद्धर्वक्रतायाः प्रकारान्तरं विद्यते। एषा वक्रता रूपकादीनामलंकाराणां मूले विराजमाना दृश्यते। उदाहरणं यथा-निष्कारणं निकारकणिकापि मनस्विनां मानसमायासयति। यथा- हस्तापचेयं यशः।। अर्थात् अकारणं महानेः कणिका स्वल्पमपि महापुरुषाणां चेतः पीडयति। हस्तेन संग्रहेयं कीर्तिः।

अत्रा 'कणिका' शब्दो मूर्तद्रव्यस्याल्पाभिधनकारकोऽलपत्वसाधरणेन सादृश्यात् अमूर्तस्य मानहानेरल्पकथनपरत्वेन प्रयोगे कृतः काव्यतत्त्वज्ञानामानन्ददायित्वात् वक्रतां पुष्णाति। 'हस्तापचेयम्' इति मूर्तपुष्पादिवस्तुसम्भाविसंहतत्वसामान्योपचारादमूर्तस्यापि यशसो हस्तापचेयमित्यभिधनं कथनं विचित्रातां धरयति।

4.4 विशेषणवक्रता -

यत्र विशेषणमाहात्म्यात् कारकस्य क्रियाया वा तद्विदाह्लादकारित्वलक्षणं वक्रत्वमभिव्यज्यते तत्रा पदपूर्वाद्धर्वक्रताया विशेषणवक्रता नाम भेदो भवति। यथा चाके तं कुन्तकेन -

'विशेषणस्य माहात्म्यात् क्रियायाः कारकस्य वा।

यत्रोल्लसति लावण्यं सा विशेषणवक्रता।।'

यथा चोदाहरणम्-

व्रीडायोगान्नतवदनया सन्निधने गुरुणां

बद्धोत्कम्पस्तनकलशया मन्युमन्तर्नियम्य।

तिष्ठेत्युक्तं किमिव न तया सत्समुत्सृज्य वाष्पं

मय्यासक्तश्चकितहरिणीहारिनेत्रात्रिभागः।।

अत्रा चकितहरिणीहारीति क्रियाविशेषणस्य नयनसदृशकटाक्षस्य गुरुजननिकटे

विहितस्य अप्रगलभत्वरमणीयस्य कामपि लावण्यतामावहति धरयति, चं चलहरिणीमनोरमनयनसाधरणने।

4.5 संवृतिवक्रता -

यदा कवि: कांश्चित् साक्षादभिधतुमशक्यान् विशिष्टभावान् वैचित्रयसम्पादनाय संवृतिसामर्थ्योपयोगिभि: सर्वनामादिभि: कथयति तदा तत्रा संवृतिवक्रता नाम पदपूर्वाद्धर्वक्रताया: प्रकारो भवति। उदाहरणं यथा-

''सोऽयं दम्भधृतवृत: प्रियतमे कर्तुं किमप्युद्यत:।।'' अर्थात् हे प्रेयसि! स: एषो दम्भेन एकपत्नीत्वपाखण्डेन कृतसघ्कल्प: किमपि विधतुं तत्पर:। तापसवत्सराजचरित-नाटकादुधूतं पद्यमिदम्। अत्रा वत्सराजोदयनस्य पद्मावत्या सह विवाह कर्मकालस्य शोकवणर्नं विद्यते। अस्मिन् श्लोके उदयन: वासवदत्ताविपत्तिविधुरहृदय: तस्या: वासवदत्ताया: प्राप्तिप्रलोभनवशेन पद्मावतीनायिकां परिणेतुमीहमान: तदेव पद्मावतीपरिणयमेव अकार्यमिति अभिजानन् पद्मावतीपरिणस्य महापापस्येव निन्दनीयतां प्रख्यापयति किमपीत्यनेन संवरणशक्त्या सर्वनामपदेन। अत एवाऽत्रा संवृत्तिवक्रता वर्तते।

4.6 वृत्तिवैचित्रयवक्रता -

वृत्तिरित्यनेन अव्ययीभावादिसमासतिद्धत-सुबन्तादयो वृत्तयोऽभिप्रेता: सन्ति काव्ये वैचित्रयसम्पादनाय यदा एतासां वृत्तीनां प्रयोग: क्रियते तदा काव्ये चमत्कारातिशय: समासाद्यते। यथा-'मध्येऽघ्कुरं पल्लवा:'' अत्रा 'अघ्कुराणां मध्ये' इत्यस्य स्थाने मध्येऽअंकुरं इति यत् प्रयुक्तं तेन किमपि माधुर्यमभिव्यनक्ति।

एवमेव पदपूर्वाद्धर्वक्रताया अन्येषां भेदानामपि विवेचनं कृतमस्ति कुन्तकाचार्येण।

4.7 लिंगवैचित्रयवक्रता-

अपरं लिंगवैचित्रयं नाम पदपूर्वार्ध्वक्रताया: प्रकारान्तरं दृश्यते यत्रा भिन्नलिघ्गाानामपिशब्दानां वैचित्रयाय समानाध्किरितया उपनिबन्ध्नं क्रियते, तत्रा लिंगवैचित्रयवक्रता। यथा- मैथिली तस्य दारा:।। मिथिलेशनन्दनी सीता रामस्य पत्नी:। अन्यदपि लिंगवैचित्रयवक्रत्वम्-यत्रानेकलिंगसम्भवेऽपि सौकुमार्यात् कविभि: स्त्रालिंगमेव प्रयुज्यते। नामैव स्त्राति पेशलम्' इति विधय। यथा-एतां पश्य पुरस्तटीम् इति। इमां तटभूमिं समक्षमवलोकय इति।

4.8 क्रियार्थवैचित्रयवक्रता-

पदपूर्वाध्र्स्य धतो: क्रियार्थवैचित्रयवक्रत्वं नाम वक्रत्वप्रकारान्तरं विद्यते। यत्रा

क्रियावैचित्रयप्रतिपादनपरत्वेन वैदग्ध्यभअंगीमणिरमणीयान् प्रयोगान् निबध्नन्ति कवय:। तत्रा क्रियावैचित्रयं बहुविधं विच्छित्तिविततव्यवहारं दृश्यते। यथा-

स्वेच्छाकेसरिण: स्वच्छस्वच्छायायासितेन्दव:।

त्रायन्तां वो मधुरिपो: प्रपन्नार्तिच्छिदो नखा:।।

अत्रा नखानां सकललोकप्रसिद्धच्छेदनव्यापारव्यतिरेकि किमप्यपूर्वमेव प्रपन्नार्तिच्छेदनलक्षणं क्रियावैचित्रयमुपनिबद्धम्। यथा च-'' स दहतु दुरितं शाम्भवो व: शराग्नि:।। असौ शिवस्य बाणवह्नि: युष्माकं पापं ज्वलयतु। अत्रा च पूर्वपद्यसदृशमेव क्रियावैचित्रयप्रतीति:।

5.0 पदपराद्धर्वक्रता – (प्रत्ययवक्रता)

पदस्य परार्ध: प्रत्ययो भवति। अत एव पदपराद्धर्वक्रतैव प्रत्ययवक्रतेत्यभिधीयते। पदस्योत्तरार्धे स्थितानां प्रत्ययादीनां सुप्तिअंगादीनां विन्याससौन्दर्यमत्राऽन्तर्निहितं भवति। अस्या: वक्रताया: प्रमुखा: भेदा: षट् वर्तन्ते- (1) कालवैचित्रयवक्रता (2) कारकवक्रता (3) वचनवक्रता (4) उपग्रहवक्रता (5) पुरुषवक्रता (6) प्रत्ययवक्रता च। एतेषु केषांचत् भेदानां विवेचनमित्थं क्रियते -

(क) वचनवक्रता -

वचनवक्रता एव संख्यावक्रता अस्ति। संख्या इत्यनेन एकवचनद्विवचनादयोऽभिप्रेता: सन्ति। यत्रा कवि: काव्यशोभायै वचनविपर्ययं निबंधनाति तत्रा संख्यावैचित्रयविहितो वक्रभावो भवति। यथा-

'वयं तत्त्वान्वेषान्मधुकरहतास्त्वं खलु कृती' - इत्यत्रा अहमित्यस्य स्थाने वयमित्यस्य बहुवचनस्य प्रयोगो दुष्यन्तस्य ताटस्थ्यं प्रदर्शयन् किमपि सहृदयहृदयसंवेद्यं वैचित्रयं समुन्मीलयति।

(ख) कारकवक्रता -

यत्रा काव्ये चमत्कारोत्पादनाय कारकविपर्यासं निबध्नन्ति कवयस्तत्राकारकवक्रता भवति।

(ग) पुरुषवक्रता -

यत्रा कवि: काव्यसौन्दर्यापेक्षया उत्तममध्यमपुरुषयो: स्थाने प्रथमपुरुषं प्रयुनक्ति तत्रा पुरुषवक्रताजन्यवैचित्रयं समुपजृम्भते। उत्तमपुरुषेण अन्तरघ्गतादयो बहवो भावा: प्रदर्शिता: भवन्ति। यदि तु ताटस्थ्यं कवेरभिप्रेतं तर्हि अन्यपुरुषस्य प्रयोग: कवेर्विवक्षितार्थं प्रतिपादयन् कामपि सहृदयदृदयाह्लादकां विच्छित्तिं प्रकटयति। उदाहरणार्थं

कुमारसम्भवस्य उक्तिरियं निभालनीया -

अयं जन: प्रष्टुमनास्तपोध्ने न चेद्रहस्यं प्रति वक्तुमर्हसि। अत्रा वक्तृतयोपनिबद्ध: प्रभुशंकरोऽहमित्यस्य स्थाने अयं जन: इत्यस्य प्रथमपुरुषस्य प्रयोगं विदधति। अनेन चमत्कृति: संजायते।

एवमेवान्येषां भेदानामपि विवेचनं कृतमस्ति।

6.0 वाक्यवक्रता -

एवं वाक्यावयवानां पदानां अक्षराद्यवयवमाध्यमेन यथासम्भवं वक्रभावं व्याख्याय साम्प्रतं पदसमुदायरूपस्य वाक्यस्य व्याख्यायते। पदसमुदायभूतस्य वाक्यस्य वक्रभाव: सहस्रध भिद्यते। कुन्तकमते आख्यातं साव्ययकारकविशेषणं वाक्यमस्ति। वाक्य-वक्रतायां सर्वोऽप्यलंकारवर्गोऽन्तर्भवति। अत एवोक्तं -

वाक्यस्य वक्रभावोऽन्यो भिद्यते य: सहस्रध।

यत्रालंकारवर्गोऽसौ सर्वोऽप्यन्तर्भविष्यति।।

औचित्यानुकूलमेव रमणीयतया काव्ये अलंकारयोजना कर्तव्या। अस्यां कवि-कर्मकौशलं विशिष्टरूपेण विभाति। यथा चोक्तं कुन्तकाचार्येण - 'यद्यपि रसस्वभावाल-ंकाराणां सर्वेषां कविकर्मकौशलमेव जीवितम्, तथाप्यलंकारस्य विशेषस्तदनुग्रहं विना वर्णनाविषयवस्तुने भूषणाभिधयित्वेनाभिमतस्य स्वरूपमात्रोण परिस्पफुरता यथार्थत्वेन निबध्यमानस्य तद्विदाह्लादविधनानुपत्तेर्मनाघ्मात्रामपि न वैचित्रयमुत्प्रेक्षामहे, प्रचुरप्रवाह-पतितते रपदार्थसामान्यने प्रतिभासनात्। इयं वाक्यवक्रता वस्तुवक्रता चाऽप्युच्यते। द्विरूपा चेयं वक्रता कुन्तकेन प्रोक्ता- सहजा आहार्या च। कुन्तकमते वस्तु रसश्च अलंकार्यौ स्त:। काव्यस्य वर्ण्यवस्तु द्विविध् भवति - स्वभावप्रधनं रसप्रधानंचेति। यथोक्तं वक्रोक्तिजीविते - 'तदेवंविध् स्वभावप्राधन्येन रसप्राधन्येन च द्विप्रकारं सहजसा-कुमार्यसरसं स्वरूपं वर्णनाविषयवस्तुन:।'' अत एव कुन्तकेन एकत: परिवृत्ति-हेतुसूक्ष्-मलेशादीनामलंकाराणां खण्डनं कृतम्, अपरतश्च रसवदादयोऽलंकारा अपि खण्डिता:। अलंकाराणामनावश्यको विस्तार: कुन्तकाभिमतो न वर्तते। अत एव चिरन्तनाचार्यै: स्वीकृतालंकाराणां संख्यां न्यूनीकृत्य सप्तदशालंकारा एव तेन परिगणिता:। एतत्कृते तेन हेतुत्रायं समुपस्थापितम्। यथा हि

भूषणान्तरभावेन शोभाशून्यतया तथा।

अलंकारास्तु ये केचिन्नालंकारतया मनाक्।।

3-43

इत्थं कुन्तकाचार्येण कविव्यापारस्यानन्यप्रकारत्वेन वाक्यस्य वक्रभावो निरूपित: यस्मिन् सर्वेऽप्यर्थालंकारा समाविशन्ति।

7.0 प्रकरणवक्रता-

कुन्तकाचार्येण वाक्यवैचित्रयं विविच्य वाक्यसमुदायरूपस्य प्रकरणस्य (सन्दर्भस्य) वक्रता निरूप्यते-प्रबंधस्यैकदेश एव प्रकरणं भवति प्रकरणानां परस्परसहयोगेन प्रबंधस्योत्कृष्टत्वं प्रतिपाद्यते। प्रबंधस्यैकदेशोऽपि नीरस: सौन्दर्यविहीनो वा भवति चेत् सम्पूर्णप्रबन्धस्यैव रमणीयत्वहानिर्भवति। अत एव कवि: स्वकौशलेन प्रत्येकं प्रकरणं रमणीयं विदधति। रामायणमहाभारतभागवतपुराणादिसदृशोपजीव्यग्रन्थात् संगृहीतं कथाशरीरं वर्ण्यवस्तु कवि: स्वकीयनवनवोन्मेवशालिन्या प्रतिभया बहुविधं संस्करोति। अत एव प्रकरणवक्रताया नैके भेदा: सम्भवन्ति।

कदाचित् औचित्यापेक्षया रसापेक्षया वा नवकथांशान् उद्भावयति, अनौचित्यप्रवर्तितं परित्यज्य अन्यथा वा करोति, निर्माति च। यथोक्तं वक्रोक्तिजीविते -

इतिवृत्तप्रयुक्तेऽपि कथावैचित्रयवर्त्मनि।

उत्पाद्यलवलावण्यादन्या लसति वक्रता।

तथा यथा प्रबन्धस्य सकलस्यापि जीवितम्।

भाति प्रकरणं काष्ठाध्रिढरसनिर्भरम्।।

उत्पाद्यलवलावण्यादिति द्विध व्याख्येयम् यथा-क्वचिदसदेवोत्पाद्यम्, क्वचिदौचित्यत्यक्तं, सदप्यन्यथासम्पाद्यं, सहृदयहृदयाह्लादनाय' इति। यथा चाभिज्ञानशाकुन्तले

महाकविकालिदासेन महाभारतस्य नीरसमपि कथानकं स्वकल्पनाप्रसूतोद्भावनाभि: सरसतयोपनिबद्धम्। तत्रापि दुर्वाससः शापप्रकरणमभिज्ञानप्रकरणंच विशिष्टमेव महत्त्वं बिभ्रत:। शापप्रकरणस्य सौन्दर्येण सम्पूर्णमेव नाटकं रमणीयं संजातम्। इयं प्रकरणवक्रता नवभि: प्रकारि र्नेष्पन्ना भवति- यथा-

(1) पात्राणां चरित्रावैशिष्ट्येन

(2) नवीनप्रसघ्गानामामुत्पादनेन

(3) प्रकरणस्य प्रधानकार्यस्य प्रबंधप्रत्युपकारकभावेन विन्यासने ,

(4) भावपूर्णस्थलानां विन्यासने

(5) रुचिकरबाह्यवर्णनै: प्रकृतिचित्राणादिविस्तरेण

(6) प्रधनरसस्योत्कर्षकप्रकरणकल्पनया

(7) प्रधनोद्देश्यसिद्धये नूतनप्रसघ्गानामवधरणेन

(8) गर्भाड्.कविधनेन

(9) प्रकरणेषु पूर्वापरान्विितिक्रमे मुखादिसन्धीनां विधनेन -

इत्थं प्रकरणवक्रताया विविध्रूपाणां विवेचनं कृतं कुन्तकेन, उक्तं च 'एवमन्येष्वपि महाकविप्रबन्धेषु प्रकरणवक्रतावैचित्रयमेव विवेचनीयम्।

8.0 प्रबंधवक्रता -

समग्रप्रबन्धेनोद्भासितं सर्वांगलावण्यमेव प्रबंधवक्रताऽस्ति। प्रबन्ध्माध्यमेन यत्किमपि उपदेष्टव्यमस्ति, अथवा अंगीरूपेण यस्य रसस्य निर्वाहोऽभिप्रेतो भवति तदनुकूलमेव कवि: कथांशानां संयोजनं कृत्वा स्वाभिप्रायं नियोजयति। यथोक्तं वक्रोक्तिजीविते -

'इति वृत्तान्यथावृत्तरससम्पदुपेक्षया।

रसान्तरेण रम्येण यत्रा निर्वहणं भवेत्।।

तस्या एव कथामूर्तेरामूलोन्मीलितश्रिय:।

विनेयानन्दनिष्पत्त्यै सा प्रबन्ध्स्य वक्रता।।

यथा हि महाभारतस्याअंगीरसो यद्यपि शान्तोऽस्ति परं भट्टनारायणेन वेणीसंहा-रनाटकस्य मूलकथां महाभारतात् गृहीत्वा तत्राअंगीरूपेण वीररसो निरूपित: तस्यैव तत्रासहृदयाह्लादकारित्वात।

अपि च कुत्राचित् नायकोत्कर्षप्रदर्शनध्यि इतिहासस्यैकदेशमाश्रित्यैव स्वप्रबन्धं

रचयति। वस्तुतस्तु एकमेवोपजीव्यमाश्रित्य प्रतिभाया आनन्त्यात् विविधरूपेण प्रबन्धं निबध्नन्ति कवय:। तत्रा प्रबन्ध्वक्रता एव प्राधन्येन विलसति। वस्तुतस्तु आमूलाद् येन कौशलेन रसोन्मीलनपूर्वकं कथां नियोजयति सत्कवि: तत्सर्वमेव प्रबन्ध्वक्रतान्तर्गतं समाविशति।

कुन्तकेन अस्या वक्रताया: षड्भेदा: प्रदर्शिता: - यथा

(1) मूलरसपरिवर्तनवक्रता

(2) समापनवक्रतो

(3) कथाविच्छेदवक्रता

(4) आनुषंगिककथावक्रता

(5) नामकरणवक्रता

(6) तुल्यकथावक्रता

एतेषां सर्वेषां प्रकाराणां कुन्तकेन विस्तृता विवेचना विहिताऽस्ति। तेन एतदप्युक्तम्- वक्रतानामन्येऽपि प्रकारा: सम्भवन्ति। प्रतिभानामनन्तप्रकारा इव वक्रतानामप्यनन्तप्रकारा: वर्तन्ते। अत्रा वक्रतानां मुख्यभेदानां निदर्शनं विहितम्। शेषा: सहृदयै: स्वयमुत्प्रेक्षणीया:।

9.0 काव्यस्यान्यतत्त्वै: सह वक्रोक्ते: सम्बन्ध:

(1) वक्रोक्ति: रसश्च -

वक्रोक्तिवादी कुन्तकाचार्यो विचित्राऽभिधरूपवक्रोक्तिं काव्यस्य जीवितरूपेण प्रतिपादयन्नपि काव्ये रसस्य अनिवार्यत्वं स्वीकृतवान्। काव्यप्रयोजनलक्षणगुणादीनां वर्णनप्रसंगेषु असौ रसमपि प्रतिपादितवान्। कुन्तकेन प्रोक्तम्-काव्यमर्मविदां सहृदयानामन्त:करणेषु धर्मार्थकाममोक्षाणामतिक्रमणकारी काव्यामृतरसश्चमत्कारं वितनोति। काव्यस्याऽयं सुकुमारो मार्गो रसादितत्त्वविदां सहृदयानां मनोऽनुकूलत्वात् रमणीयो भवति। काव्यस्य विभिन्नामअंगानां प्रतिपादने वक्रतास्वरूपनिरूपणे च कुन्तको रसस्य महनीयतां निरूपितवान्। यथा-

निरन्तररसोद्गारगर्भसन्दर्भनिर्भरा:।

गिर: कवीनां जीवन्ति न कथामात्रामाश्रिता:।।

काव्यवस्तुविवेचने कुन्तको रसमहत्त्वं प्रतिपादितवान्। वर्ण्यमानं वस्तु द्विविधं भवति-स्वभावप्रधानं रसप्रधानंच। अत्रा स्वभावप्रधनं वस्तु प्रशस्यतरम्। काव्ये चे-

तनाचेतनवस्तुवर्णने चेतनमेव प्रधनम्। रत्यादिभावा अत्रौव अक्लिष्टरूपपरिपोषं प्राप्ता: रसतामाप्नुवन्ति।

अलंकारसम्प्रदायाचार्या: काव्ये रसादीन् रसवदाद्यलंकारत्वेन प्रतिपाद्य गौणस्थानीयान् प्रत्यपादयन्, परन्तु कुन्तकेन रसादयोऽलंकार्या: प्रोक्ता:, यथा ध्वनिवादिन आमनन्ति। काव्ये रसं महनीयं मत्त्वाऽपि रसस्य वक्रोत्यधीनत्वात् कुन्तको वक्रोक्तिमेव काव्यजीवितं न्यरूपयत्।

(2) वक्रोक्ति: रीतयो गुणाश्च -

कुन्तकानुसारं रीतिरपि वक्रताया: भेद:। रीतिस्थाने कुन्तको मार्गपदं प्रयुक्तवान्। वैदर्भीरीति: सुकुमारमार्गो, गौडीरीति: विचित्रामार्ग: पां चालीरीतिश्च मध्यममार्ग इति तेन निरूपितम्। त्रायाणामपि मार्गाणां मूलं कविस्वभावो प्रतिपादित: तेन। वामनेन रीतीनां मूलं गुणा: कल्पिता:। विंशतिर्गुणा: भवन्ति, तेषां चाधरेण रीतय: सम्पाद्यन्ते। कुन्तकोऽपि कविस्वभावमेव मार्गाणां मूलं परिकल्प्य तै: सह गुणानां सम्बन्धं निरूपितवान्। वक्रोक्ति रीतेरधिकं विस्तृतक्षेत्रां व्यापनोति। रीतिस्तु पदसंघटनापर्यन्तं प्रवर्तते, या वक्रोक्ते: वर्णवक्रताप्रकृतिवक्रताप्रत्ययवक्रतावाक्यवक्रतापर्यन्तं परिमिता भवति। परं वक्रोक्ति:

काव्याघ्गानां विस्ततृ तरं क्षेत्रां व्याप्नोति।

(3) वक्रोक्तिरौचित्यंच -

कुन्तकाचार्येण औचित्यस्यापि महत्त्वं स्वीकृतम्। काव्यलक्षणं प्रदर्श्य असौ प्रबन्ध्वक्रतापर्यन्तमौचित्यमेव वक्रताया: प्राणत्वेन न्यरूपयत्। कुन्तकनिरूपिता वक्रता यत्रा तत्रा औचित्यरूपत्वेनैव प्रवर्तते। यथा-

आं जसेन स्वभावस्य महत्त्वं येन पोष्यते।

प्रकारेण तदौचित्यमुचिताख्यानजीवितम्।।

सौभाग्येन सहौचित्यमपि सर्वसाधरणे गुण:। काव्यस्य सर्वेष्वपि मार्गेषु इदमाचित्यमन्तर्निहितमनिवार्यत्वेन भवति। औचित्यस्य स्वल्पेऽप्यभावे काव्यस्याऽऽह्लादकत्वं, ध्रुवं विहन्यते। यथा उचिताभिधनजीवितत्वाद् वाक्यस्याऽप्येकदेशेऽप्यौचित्यविरहात् तद्विदामाह्लादकारित्वहानि:।

काव्यस्यान्यतत्त्वै: यथा अलंकारध्वन्यादिभि: सह अपि वक्रोक्ते: सम्बन्धे निर्धारयितुं शक्यते।

वक्रोक्तिर्ध्वनिश्च -

कुन्तकस्य वक्रोक्तिसिद्धान्ते ध्वनिकारस्य च ध्वनिसिद्धान्ते साम्यैरनेकै: सह

वैषम्यमपि भूयिष्ठं परिलक्ष्यते। द्वयोरपि सिद्धान्तयोः लोकप्रसिद्धशब्दार्थातिक्रमणं, वैचित्रयप्रतिपादनाय च कवेरलौकिकी प्रतिभेति सर्वेऽनतिक्रमणीयाः हेतवः सन्ति। परन्तु कुन्तकेन वक्रोक्तिरभिधाव्यापारो मतः। सा अभिधरूपवृतिवाच्या भवति।

ध्वनिकारो वाचकशब्दार्थभिन्नव्यघ्यव्यं जकभावमेव काव्ये रमणीयत्वप्रतिपादकं न्यरूपयत्। यत्रा वाच्यार्थ आत्मानं वाचकशब्दश्च आत्मानं स्वार्थंचोपसर्जनीकृत्य वाच्यार्थभिन्नप्रतीयमानमथर्म भिव्यनक्ति तत्रौव ध्वनिकाव्यं भवतीति ध्वनिकारस्य प्रतिपादनम्। परन्तु कुन्तकस्य वाचकशब्दो ध्वनिकारस्य व्यंजकशब्दं व्यंग्यार्थंच स्वात्मन्यन्तो निवेशयति। कुन्तको जगाद-द्योत्यव्यंग्ययोः प्रत्येयत्वसाम्यादुपचाराच्च तावपि वाचकौ स्तः। इत्थंच कुन्तकेन ध्वनिकारस्य व्यंग्यव्यंजकभावो वाच्यवाचकभावे समावेशितः। कुन्तकानन्दवर्धनयोः काव्यसौन्दर्यसमीक्षाविषये यत्रा तत्रा साम्यमपि संलक्ष्यते। यथा आनन्दवधर्नेन सुप्तिङ्.वचनकारककृततिद्धतसमासोपसर्गनिपातकालादयो ध्वनेरभिव्यंजकाः मता। कुन्तकेनाऽपि वर्णवक्रतातः प्रबंधवक्रतापर्यन्तं सर्वत्रा वक्रता प्रतिपादिता। कुन्तको ध्वनेरनेकान् भेदान् वक्रोक्ति र्वैशिष्टभेदेषु समादध्रे। पदपूर्वाद्धर्वक्रतायाः भेदो रूढिवैचित्रयवक्रता वर्तते। तत्रालक्षणामूलोऽर्थान्तरसंक्रमितवाच्यध्वनिः समावेश्यते। अथ च पर्यायवक्रतायां शब्दशक्तिमूलानुरणनरूपध्वनेः समावेशो भवति। इति कुन्तकेन स्वयं स्वीक्रियते। उपचारवकतायां ध्वनिकारस्याऽत्यन्ततिरस्कृतवाच्यध्वनिः समाविष्टः। अत्रा ध्वनिकारेण प्रस्तुतमुदाहरणमेव कुन्तकेनाऽपि प्रस्तुतम्। एवं कुन्तकस्य वस्तुवक्रतायां वस्तुध्वनेः, वाच्यवक्रतायामलंकारध्वनेः प्रबन्ध्वक्रतायांच प्रबन्धध्वनेः समावेशोऽवगन्तव्यः।

कुन्तकेन प्रतीयमानोऽर्थः सुस्पष्टं स्वीकृतः। काव्यस्य विचित्रामार्गे वाच्यवाचकवृत्त्यतिरिक्तं वाच्यार्थस्य प्रतीयमानत्वं विद्यते। अलंकारेष्वपि कुन्तकः प्रतीयमानार्थमअंगीकरोति। कुन्तकेन प्रोक्तम्-द्विविध ह्यलंकाराः-वाच्याः प्रतीयमानाश्च प्रतीयमाना अलंकार न वाच्याः। ते व्यंग्यमेव प्रस्तूयन्ते। रूपकव्यतिरेकनिदर्शनादीपकोपमादयोऽलंकारा वाच्यत्वेन सह प्रतीयमानभावमपि दध्ति।

ध्वनिवक्रोक्तिसिद्धान्तयोस्तयाभूतेऽपि साम्ये कुन्तको ध्वनिविरोध्विचार्येषु गण्यते। अत्रा मुख्यो हेतुरयमेव यद् ध्वनिकारेण ध्वनितत्त्वं व्यंजनावृत्तिप्रि तपाद्यं प्रतीयमानं निरूपितं, परं कुन्तकेन तत् तत्त्वं विचित्राभिधवृत्तिप्रि तपादितमभिधीयमानं साध्तिम्।

10.0 विषयसंग्रहः-

पाठेऽस्मिन् कुन्तप्रतिपादिताः वक्रोक्तिभेदाः, यथा- वर्णविन्यासवक्रता- पदपूर्वाद्धर्वक्रता (रूढिवैचित्रयवक्रता-पर्यायवक्रता-उपचारवक्रता-विशेषणवक्रता-संवृतिवक्रता-वृत्तिवैचित्रयवक्रता) पदपराद्धर्वक्रता-वाक्यवक्रता-प्रकरणवक्रता-प्रबन्ध्वक्रताश्च

भेदोपभेदैः सह निरूपिताः एभिः भेदैः सह वक्रोक्तेः काव्यस्यान्यतत्त्वैः सह सम्बन्धेऽपि निरूपितः। यथा-वक्रोक्तिः रसश्चः वक्रोक्तिः रीतयो गुणाश्च, वक्रोक्त्यौचित्यंच, वक्रोक्तिर्ध्वनिश्चेति।

## 1.0 प्रस्तावना

साहित्यशास्त्रस्य विविधतत्वेषु औचित्यतत्वस्य स्थानं महत्वपूर्णमस्ति। औचित्यतत्वस्य सिद्धांतसम्बद्धं मतं पूर्वस्मिन् पाठे भवान् पठितवान्। अस्मिन् पाठे औचित्यस्य कति भेदाः प्रतिपादिताः आचार्यक्षेमेन्द्रेण, तेषां सर्वेषां भेदानां सोदाहरणं व्याख्यानं, औचित्यस्य काव्यस्य अन्यतत्वैः सह संबंधः, तथा च औचित्यस्य काव्यात्मत्वसमीक्षणमित्यादीनां विषयाणां निरूपणं क्रियते। साहित्यशास्त्रस्य विकासयात्रायां कालक्रमेण षड्सिद्धांताः प्रादुर्भूताः। यथा-रससिद्धान्तः, अलङ्.कारसिद्धांतः, रीतिसिद्धांतः, ध्वनिसिद्धांतः, वक्रोक्तिसिद्धांतः, औचित्यसिद्धान्तश्च। तत्र रससिद्धांतमन द्वितीयस्थनमलङ्.कारसिद्धांतो भजते। काव्यसमाचलोचननायाः प्रारंभिकयुगे काव्यस्य प्रमुखं सौन्दर्याधायकं तत्वमलङ्.कार एव सम्मतं विद्वदभिः। तेषु भाहदण्डयदभटादयः प्रमुखाः सन्ति। काव्यात्मतत्वानसंधानाय विभिन्नकालेषु नव-नवसिद्धांतानामाविर्भावः कथं संजातः, कश्चाधारस्तत्र गृहीत इत्यस्य विश्लेषणं समुद्रबंधनेन इत्थं कृतम् - ''इह विशिष्टौ शब्दार्थौ काव्यम्, तयोश्च वैशिष्टयं धर्ममुखेन व्यापारमुखेन व्यंग्यमुखेन चेति त्रयः पक्षाः। आद्येऽप्यलंकारतो गुणते वेति द्वैविध्यम्। द्वितीयेऽपि भणितिवैचित्र्येण भोगकृत्वेन चेति द्वैविध्यमिति पंचसु पक्षेषु प्रथम उद्भटादिभिरंगीकृतो द्वितीयो वामनेन तृतीयो वक्रोक्तिजीवितकारेण चतुर्थो भट्टनायकेन पंचमश्च आनंदवर्धनेन।'' भतरमनु काव्यशास्त्रेतिहासेऽनेकैराचार्यैरनुसंधानं विहितं यत् काव्येषु किंचिदीदृशं तत्वं मूलभूतं विद्यते, यत्प्रति सहृदयजना आकर्षणमनुभवन्ति काव्यानंदंचाऽऽस्वादयन्ति। येनाऽऽचार्येण यत्काव्यांगं प्रति तथाभूतमाकर्षणमनुभूतं तेन तदेव काव्याअंगं काव्यस्याऽऽत्मरूपेण प्रतिष्ठापितम्। केचन आचार्याः काव्येषु प्रमुखं तत्वं रसमनुभूतवन्तः। काव्यरचनायाः मुख्यतम उद्देश्यो रसनिष्पादनमेव वर्तते। रसमास्वाद्यैव सहृदयाकर्षकमाह्लादजननं तत्वमलंकारं स्वीकृतवन्तः। शब्दार्थशरीरं तावत्काव्यम्। शब्दार्थालंकरणसमर्थ अलंकारा एव काव्यस्यात्मेति तेषां विचाराः। अपरे मनीषिणः प्राहुः-पदसंघटनैव काव्यसौर्न्दयेहेतुः। पदसंघना रीति। अतो रीतिरेव काव्यस्याऽऽत्मा। परे जगदुः-काव्येषु वैचित्र्यमेव सहृदयहृदयानामाह्लादकत्वस्याऽऽकर्षणस्य च हेतुः। वैचित्र्यसंयुतोक्तिरेव वक्रोक्तिः। अथ च वैदग्ध्यभंगीभणितिर्वक्रोक्तिः। सा वक्रोक्तिरेव काव्यस्याऽऽत्मा। केचन आचार्या औचित्मेव काव्यस्याऽऽत्मानं जगदुः। काव्येष्वौचित्यमेव परमं रहस्यं सहृदयहृदयाह्लादकरं तत्वं काव्स्याऽऽत्मा। अथ चान्ये मनीषिणः प्रतिपादितवन्तः-काव्येषु सौन्दर्यं व्यंग्यार्थेनैव सम्भवति। व्यंग्यार्थप्रधानं काव्यं ध्वनिरित्यभिधीयते। स ध्वनिरेव काव्यस्याऽऽत्मा।

एतेषु अलंकारपक्षस्य विवेचनं पाठेऽस्मिन् क्रियते।

2.0 औचित्यस्य भेदा: - आचार्यक्षेमेन्द्रेण औचित्यं काव्यजीवितं प्रतिपाद्य, साहित्यशास्त्रे औचित्यसिद्धांन्तस्य प्रतिष्ठापना कृता। औचित्यमेव काव्यस्य जीवनाधयकं प्राणभूतं च तत्त्वमिति तेषां तात्पर्यम्। औचित्यं काव्ये प्रत्यंगं सन्निविष्टं भवति। औचित्यं काव्ये प्रत्यंगं सन्निविष्टं भवति। औचित्यस्य क्षेत्रां यद्यपि अतिविस्तृतं वर्तते, न केवलं काव्ये अपितु लोकेऽपि औचित्यस्य निर्वाहो अनिवार्य एव। औचित्यस्य अनन्तभेदा: भवितुं शक्यन्ते न च ते संख्यातुं गण्यन्ते। तथापि दृष्टान्तरूपेण केषांचिद् भेदानां गणना अत्रा क्रियते। यथा चोक्तं क्षेमेन्द्रेण औचित्यविचारचर्चाग्रन्थे-

'अधुना सकलकाव्यशरीरजीवातुभूतस्यौचित्यस्य प्राधन्येन (न तु नि:शेषेण) उपलभ्यां स्थितिं दर्शयितुमाह।'' एतेन ज्ञायते यत् निर्दिष्टस्थालातिरक्तमपि औचित्यस्य बहूनि स्थलानि भवन्ति इति सूचितम्। तत्रा मुख्यरूपेण औचित्यस्य सप्तविंशतिभेदा: विमृष्टा: यथा -

पदे वाक्ये प्रबन्धर्थे गुणेऽलंकरणे रसे।

क्रियायां कारके लिंगे वचने च विशेषणे।

उपसर्गे निपाते च काले देशे कुले ब्रते।

तत्त्वे सत्त्वेऽप्यभिप्राये स्वभावे सारसंग्रहे।।

प्रतिभायामवस्थायां विचारे नाम्न्यथाशिषि।

काव्यस्याअंगेषु च प्राहुरौचित्यं व्यापि जीवितम्।।

अर्थात् (1) पदम् (2) वाक्यम् (3) प्रबन्ध: (4) गुण: (5) अलंकार: (6) रस: (7) क्रिया (8) कारकम् (9) लिघ—म् (10) वचनम् (11) विशेषणम् (12) उपसर्ग: (13) निपात: (14) काल: (15) देश: (16) कुलम् (17) व्रतम् (18) तत्त्वम् (19) सत्त्वम् (20) अभिप्राय: (21) स्वभाव: (22) सारसंग्रह: (23) प्रतिभा (24) अवस्था (25) विचार: (26) नाम (27) आशी: इति।

इत्थम् उपर्युक्तेषु स्थलेषु मुख्यतया औचित्यमुपलभ्यते इति कारिकाया आशय:।

अत्र पदे सुप्तिड्.न्तरूपे शब्दे इत्यर्थ:। वाक्ये पदसमूहे, प्रबन्धर्थे प्रबंधस्य कुमारसंभवरघुवंशादेरर्थे अभिधेये, गुणे ओज:प्रसादादौ, अलंकरणे उपमोत्प्रेक्षाद्यलंकारे, रसे शृंगारादिरसे, क्रियायां पचति भवतीत्यादिपदबोध्ये, कारके कर्तृ-कर्म रूपे, लिंगे स्त्री-पुंनपुंसकरूपे, वचने एकवचन-द्विवचनादौ, विशेषणे विशेष्यगतगुणाख्यापके, उपसर्गे क्रियायोगाश्रिते प्र-परादिरूपे, निपाते अद्रव्यार्थके च, वाहेत्यादिरूपे, काले

समये, देशे स्थानविशेषे, कुले वंशपरम्परायाम्, व्रते नियमविशेषरूपे, तत्त्वे तत्त्वाख्याने यथावद्वस्तुवर्णने इत्यर्थः, सत्त्वे सत्त्वस्यान्तर्बलस्य वर्णनायाम्, अभिप्राये तात्पर्ये, स्वभावे प्रकृतौ, सारसंग्रहे निष्कृष्टार्थकथने, प्रतिभायां नवनवोन्मेषशालिबुद्धिरूपायाम्, अवस्थायां वयःक्रमे, विचारे विवेचनायां, नाम्नि संज्ञाभिधने, आशिषि आशीर्वादे च। एतेषु केषांचिद् उदाहरणानि यथा -

2.1 पदौचित्यम् - तत्रा सर्वप्रथमं पदगतौचित्यं विवेचयति यथा -

तिलकं बिभ्रती सूक्तिर्भात्येकमुचितं पदम्।

चन्द्राननेव कस्तूरीकृतं श्यामेव चान्दनम्।।

यथा गौरवर्णनायिका कस्तूर्यादिघटितकृष्णतिलकेन, अपि च श्यामवर्णा कामिनी श्रीखण्डद्रवतिलकेन विभूषिता समस्तसरसजनस्पृहणीयं चमत्कारमातनोति तथैव एकमप्युचितं पदं किमुत बहूनि पदानि काव्यरूपा वाक् भाति इत्यर्थः। एकेन उचितपदेन एव सम्पूर्णं पद्यम् अपूर्वकाव्यशोभां धरयति। यथा चोदाहरणम् -

'मग्नानि द्विषतां कुलानि समरे त्वत्खड्गधराकुले,

मुग्ध गुर्जरभूमिपालमहिषी प्रत्याशया पाथसः।

कान्तारे चकिता विमुंचति मुहुः पत्युः कृपाणे दृशौ।

अत्रा मुग्धपदेन सूक्तिः काव्यवाक् नाम काव्यं सम्पूर्णं पद्यं वा

सकलकविकुलललामभूतां समस्तसरसजनस्पृहणीयां विच्छित्तिं चमत्कारम् आतनोति

विस्तारयतीत्यर्थः। पद्येऽस्मिन् कृपाणधरातः पिपासाशान्तिमिच्छन्त्याः गुर्जरराजमहिष्याः मुग्धेति विशेषणतया प्रयोगं कुर्वाणः कविः सम्पूर्णमपि पद्यं चमत्कारचर्चितमिव अकरोत् इति सुतरां

पदगतौचित्यमत्रा विद्यते।

पदौचित्यस्यापरमुदाहरणम् -

'परिम्लानं पीनस्तनजघ्न संगदुभयत-

स्तनोर्मध्यस्यान्तः परिमिलनमप्राप्य हरितम्।

इदं व्यस्तन्यासं श्लघभुजलताक्षेपवलनैः,

कृशाड्.ग्याः सन्तापं वदति विसिनीपत्राशयनम्।।

अत्रा सागरिकाया विरहावस्थासूचकं 'कृशाङ्.या:' इति पदं परमौचित्यं पुष्णाति।

2.2 वाक्यगतौचित्यम् - पदगतौचित्यं प्रदश्र्य सम्प्रति द्वितीयं वाक्यगतौचित्यं विवेचयति

आचार्यक्षेमेन्द्र: -

औचित्यरचितं वाक्यं सततं संमतं सताम्।

त्यागोदग्रमिवैश्वर्यं शीलोज्ज्वलमिव श्रुतम्।।

अर्थात् औचित्याभिनिवेशपूर्वकं निर्मितं वाक्यं त्यागेन दानादिना उदात्तं विभूतिरिव सत्स्वभावेन प्रशस्तं शास्त्रामिव सर्वदा सज्जनानाम् अभिमतं भवतीति। अस्याऽयं आशय: औचित्येन निर्मितं वाक्यं काव्यालोचनचतुराणां विदुषां निरतिशयमभीष्टं भवति।

2.3 प्रबन्धैचित्यम् -

पदवाक्यगतयोरौचित्ययो: विवेचनां विधय सम्प्रति तृतीयं प्रबन्धर्थगतौचित्यं विचारयति

-यथा-

''उचितार्थ=विशेषेण प्रबंधार्थ: प्रकाशते

गुणप्रभावभव्येन विभवेनेव सज्जन:।।''

अर्थात् उचितार्थविशेषेण समुचितार्थवैशिष्टयेन प्रबन्धार्थो महावाक्यात्मकप्रबन्धभिध-ोयो,

गुणप्रभावेण दाक्षिण्यादिगुणोत्कर्षेण, भव्यं स्पृहणीयं, तेन विभवेन ऐश्वर्येण सज्जन: सत्पुरुष

इव प्रकाशते शोभते इति। उदाहरणं यथा -

जातं वंशे भुवनविदिते पुष्करावर्तकानां

जानामि त्वां प्रकृतिपुरुषं कामरूपं मघोन:।

तेनार्थित्वं विधिपरवशाद् दूरबन्धुर्गतोऽहं

याचां मोघा वरमध्गुिणे नाध्मे लब्ध्कामा।।

पद्यमिदं महाकविकालिदासविरचितमेघदूतकाव्यात् उद्धतमस्ति। अत्रा यक्षो मेघं प्रति कथयति हे मेघा! त्वां जानामि तव कुलं संसारे प्रसिद्धमस्ति, तव जन्म उच्चकुले जातम् एतेन मेघस्य आभिजात्यं सूचितम्। त्वं इन्द्रस्य प्रधनामात्यमसि, तेन उदात्त-

कुलप्रसूतत्वेन परापे कारकरणक्षमतया च कान्तावियोगविधुरोऽहं यक्षो दैवयोगात् तवाग्रे याचकत्वमुपेत:। उत्तमजने याचनहेतुमाह-अधिगुणे अधिकगुणशालिनि जने कृता याचना असपफलाऽपि श्रेष्ठा भवति, नीचपुरुषे कृता याचना सफलाऽपि न श्रेष्ठा इति भाव:।

अत्र उत्प्रेक्षितं कल्पितमपि इतिवृत्तं अनेन निरतिशयम् अत्यन्तम् औचित्यं प्रकाशितम्।

2.4 अलंकारौचित्यम् - अलंकारौचित्यं दर्शयितुमाह -

अर्थौचित्यवता सूक्तिरअलंकारेण शोभते।

पीनस्तनस्थितेनेव हारेण हरिणेक्षणा।।

अर्थात् प्रस्तुतार्थस्य औचित्येन अनुप्राणितेन अलंकारेण सुभाषितं तथैव सुशोभते यथा पीनस्तनस्थितने मौक्तिकेन मनोहरहारेण कामिनी शोभते।

उदाहरणं यथा -

विश्रान्तविग्रहकथो रतिमांजनस्य

चित्ते वसन् प्रियवसन्तक एव साक्षात्।

पर्युत्सुको निजमहोत्सवदर्शनाय

वत्सेश्वर: कुसुमचाप इवाभ्युपैति।

पद्येऽस्मिन् उदयनस्य कामदेवेन सहोपमा कामप्यपूर्वां हृद्याह्लाददायिनीम् औचित्येन शृंगारकालोपयुक्तस्निग्ध्सुन्दरतां प्रकटयति। अत: पद्यमिदम् अलंकारौचित्यस्य सुन्दरमुदाहरणमस्ति।

2.5 रसौचित्यम् -

अलंकारगतैचित्यं सोदाहरणं प्रदश्र्य सम्प्रति रसौचित्यं विवेचयितुमाह -

'कुर्वन्सर्वाशये व्याप्तिमौचित्यरुचिरो रस:।

मधुमास इवाशोकं करोत्यअंकुरितं मन:।।

अर्थात् सर्वेषां सहृदयानां हृदयेषु व्यापकरूपेण स्थित औचित्यचमत्कृतो रस: सहृदयानां चित्तं तथैव प्रपफुल्लं करोति यथा अशोकतरुं वसन्त: करोति।

उदाहरणं यथा -

बालेन्दुवक्राण्यविकासभावाद्बभु: पलाशान्यतिलोहितानि।

सद्यो वसन्तेन समागतानां नखक्षतानीव वनस्थलीनाम्।।

उमायां शंकरस्य अभिलाषात्मके शृंगारे, कथयिष्यमाणे प्रथमं उद्दीपनकारणरूपस्य वसन्तस्य वर्णनप्रसंगे पद्यमिदं लिखितम्। अत्रा वसन्तस्य नायकत्वेन वनस्थल्या: नायिकात्वेन च वर्णनं वर्तते। अर्थात् वसन्ते नायकस्याभेद:, वनस्थल्यां च नायिकाया अभेद आरोपितो अपि च संभावितानि नवसंगमोचितनखचिह्नानि, एतत्सर्वम् अत्यन्तौचित्य-प्रयुक्तसौन्दर्यं विबोधयन्ति। अनेन औचित्यपूर्णवर्णनेन काव्यस्य सौन्दर्यम् आतनोति।

2.6 गुणैचित्यं यथा -

प्रस्तुतार्थोचित: काव्ये भव्य: सौभाग्यवान्गुण:।

स्यन्दतीन्दुरिवानन्दं संभोगावसरोदित:।।

अर्थात् वर्ण्यमानार्थस्य समुचितविन्यासेन ओजप्रसादादिलक्षणो वामनाभिमतो गुणो दशसंख्याक इति यावत्, काव्ये (कविकृतौ) कल्याणात्मक:, निरतिशयाभिराम:, सहृदयहृदयाभोदपरम्परामिन्दुचन्द्र: इव स्यन्दति स्रावयतीत्यर्थ:।

यथा भट्टनारयणस्य

महाप्रलयमारुतक्षुभितपुष्करावर्तक-

प्रचण्डघनगर्जितप्रतिरवानुकारी मुहु:।

ख: श्रवणभैरव: स्थगितरोदसीकन्दर:

कुतोऽद्य समरोदधेरयमभूतपूर्व: पुर:।।

अत्रा पद्ये तेज: शलिन: द्रोणात्मजस्य उत्कृष्टोय: प्रताप: तदनुकूल पदसमूह: ओजोनाम्ना काव्यगुणेन युक्तत्वात् सहस्रगुणीभूतमिव पराक्रमानुरूपगुरूताम् धयति।

2.7 लिंगौचित्यम् -

उचितेनैव लिंगेन काव्यमायाति भव्यताम्। साम्राज्यसूचकेनेव शरीरं शुभलक्ष्मणा।। अनुरूपेणैव स्त्रीपुंनपुंसकरूपेण लिंगेण काव्यं साम्राज्यव्यंजकेनशुभाकारकलक्षणेन वपुरिव स्पृहणीयतामायाति प्राप्नोति।

निद्रां न स्पृशति व्यजत्यपि धृतिं धृते स्थितिं न क्वचिद् दीर्घां वेत्ति कथां व्यथां न भजते सर्वात्मना निर्वृतिम्। तेनाराध्यता गुणस्तव जपध्यानेन रत्नावली: नि:संगेन परांगनापरिगतं नामापि नो सहते।।

अत्रा स्थितिधृतिकथनिर्वृतीनां स्त्रीलिघ्गाभिधनेन अघ्गनात्वाध्यारोपेण परमौचित्यं प्रतिपादितम्।

2.8 क्रियापदौचित्यम्

रसौचित्यविचारानन्तरं क्रियापदौचित्यं दर्शयितुमाह-

सगुणत्वं सुवृत्तत्वं साधुता च विराजते।

काव्यस्य सुजनस्येव यद्यौचित्यवती क्रिया।।

अर्थात् काव्यस्य माधुर्यौज: प्रसादादिलक्षणगुणयुक्तत्वं

वसन्ततिलकेन्द्रवज्रादिसुन्दरवृत्तत्वम्, या काव्यगता साधुता शुद्धित्वमथवा सर्वथा काव्यलक्षणानुसारितेति समुदायार्थ: तदैव शोभते, यदि क्रियापदं भवति

गच्छतीत्यादिरूपमाचित्ययुक्तमैचित्यन्नितं भवति। यथा सज्जनानां दयाद-ाक्षिण्यादिगुणवत्वं, सदाचरणं च तदैव स्पृहणीयतामर्हति यदा क्रिया (व्यापार:) आ-चित्यानुप्राणिता तिष्ठति, तथैवकाव्यस्यापि क्रियापदौचित्येनैव गुणादीनां स्पृहणीयत्वमिति भाव:।

2.9 कारकौचित्यम्

क्रियापदौचित्यप्रदर्शनानन्तरं क्रमागतं कारकौचित्यमित्थं विवेचयति-

सान्वयं शोभते वाक्यमुचितैरेव कारकै:।

कुलाभरणमैश्वर्यमौदार्यचरिव।।

अर्थात् यथा सद्वंशेन भूषितमपि ऐश्वर्यमौदार्यादिसच्चरित्रैरेव शोभते तथैव अन्वयेन युक्तं वाक्यं समुचितैरेव कारकै: कर्तृकर्मादिरूपै: शोभते। तत्रा कर्तृपदौचित्यं यथा-

स्तनयुगमश्रुस्नातं समीपतरवर्ति हृदयशोकाग्ने:।

चरत विमुक्ताहारं व्रतमिव भवतो रिपुस्त्रीणाम्।।

कारकपदौचित्यप्रदर्शनप्रसंगे प्रथमं कर्तृपदौचित्यमुपस्थापयितुमाह। पद्यमिदं बाणभट्टविरचितस्य कादम्बरीगद्यकाव्यस्य वर्तते। राज्ञ: शुद्रकस्यशीर्वचनरूपेण शुकद्वारा पठितोऽयं श्लोक:। अत्रोक्तपद्ये: 'शत्रुस्त्रियो व्रतं चरन्ति' इति वक्तव्ये 'स्तवयुगं, वाष्पसलिलस्नातं, शोकाग्निसमीपवर्ति, विमुक्तभोजनं विगतमुक्ताहारं च सत् सदव्रतं चरति'' इति कथने कर्तृपदं स्तनयुगमिति पदम्, स्मृद्धम् औचित्यं जनयति।

कर्मकरणसंप्रदानाऽऽपादानसंबंधाधिकरणकारकाणमौचित्यमपि प्रदशितं क्षेमनेद्रेण।

2.10 वचनौचित्यम्

उचितैरेव वचनै: काव्यमायाति चारूताम्।

अदैन्यध्न्यमनसां वदनं विदुषामिव।।

उचितैरेकवचनद्विवचनबहुवचनैः काव्यं-चारुतामायाति, सौन्दर्यमासादयतीति भावः।

दशमं वचनौचित्यं प्रदर्शितम्।

2.11 विशेषणौचित्यम्

वचनौचित्यप्रदर्शनात्परं क्रमप्राप्तमेकादशतमं विशेषणौचित्यं विवेचयितुमाह-

विशेषणैः समुचितैर्विशेष्योऽर्थः प्रकाशते।

गुणाधिकैर्गुणोदारः सुहृद्भिरिव सज्जनः।।

काव्ये विशेष्योऽर्थः समुचितैरेव विशेषणैः शोभां लभते गुणोदारः साधुर्यथाऽभ्यधिकगुणैः सुहृभिः। अर्थात् काव्यरसाभिव्यंजककविकर्मणि, विशेष्यमूतोऽर्थः समुचितैरनुरूपैरेव विशेषणैः शोभां सौन्दर्य लभते प्राप्नोति, यथा उदात्तगुणशाली सज्जनोऽभ्यधिकगुणवप्रिमित्रौः।

2.12 उपसर्गौचित्यम्-

विशेषणौचित्यप्रदर्शनानन्तरं क्रमागतं द्वादशतममुपसर्गौचित्यं विवेचयितुमाह-

योग्योपसर्गसंसर्गैर्निरर्गलगुणोचिता।

सूक्तिर्विवध्ते सम्पत्सन्मार्गगमनैरिव।।

अर्थात् निर्बाधगुणसंयुक्ता सूक्तिः काव्यरूपं सत्कथनंमनुरूपोपसर्गसंपर्कैः सन्मार्गविनियोगैः संपतिरिव अतितरां वृद्धिमाप्नोति।

कारिकार्थमेव विवृणोति- उचितैरनुरूपैः प्रादिभिः प्रपरादिरूपैरप्रसर्गैः-सत्काव्योिक्त वृद्धिमासादयति। उदाहरणं यथा-

आचारं भजते त्यजत्यपि मदं वैराग्यमालम्बते,

कर्तुं वांछति संगभंगगलितोतुंगाभिमानं तपः।

देवन्यस्तविपर्ययैः सुखशिखाभ्रष्टः प्रणष्टो जनः।

प्रायस्तापविलीनलोहसदृशीमायाति कर्मण्यताम्।।

अत्र दुर्योधनस्य घोषयात्रायां गर्न्ध्वकृतबंधनजन्मपराभवेन नष्टगर्वस्य प्रचुरं साम्राज्यं परित्यज्य तपोविषयकयत्नाग्रहशीलस्यदुराग्रहे प्रतिपाद्यमाने-'सर्वो जनः सुखशिखरच्युतो विनष्टैश्वर्यः सदाचारं श्रयति, अभिमानं जहाति, वैराग्यमाश्रयति, विषयसंसर्गप्रणाशने विगलितोतुंगाभिमानं यथा स्यात्तथा तपः कर्तुमिच्छति, प्रायो बाहुल्येनोष्णतागलितलोहगा-

लकतुल्यां कार्यक्षमतामायातीति, यदुक्तं तत्रा तत्कथने, उत्पूर्वतयोदित्यस्य प्राक्स्थित्या, सोपसर्गस्य तुंगशब्दस्य स्वभावोन्नतिरुन्नतिरूपस्वाभाविकोऽर्थो द्विगुणतां प्राप्तासती मदमत्तजनगर्वरूपार्थस्यानुकूलतामुच्चैः करोति वर्धयति।

2.13 निपातौचित्यम्

उपसर्गगतौचित्यं प्रदश्र्यं सम्प्रति क्रमप्राप्तं त्रायोदशतमं निपातौचित्यं निरूपयति। यथा-

उचितस्थानविन्यस्तैर्निपातैरर्थसंगतिः।

उपादेयैर्भबत्येव सचिवैरिव निश्चला:।।

यथा समुचितस्थाननियुक्तैः सन्मन्त्रिभिः राजकोषोऽक्षयो भवति तथैवोचित्तस्थानविन्यस्तैः च-वा-हप्रभृतिभिर्निपातैः काव्यार्थस्य सामंजस्य सन्देरहितं भवति।

यथा-

सर्वे स्वर्गसुखार्थिनः क्रतुशतैः प्राज्यैर्यजन्ते जडा-

स्तेषां नाकपुरे प्रयाति विपुलः कालः क्षणार्घं च तत्।

क्षीणे पुण्यघने स्थितिर्न तु यथा वेश्यागृहे कामिनां,

तस्मान्मोक्षसुखं समाश्रयत भोः ? सत्यं च नित्यं च यत्।।

अत्रा स्वर्गसुखस्य वेश्याभोगवदवसानविरसचपलतायां कथितायां सत्यां

सुस्थिरमोक्षावाप्तिरूपसुखस्य सन्देहशून्यस्थिरा प्रतिपतिखबोधे निपातपदोपबृंहिता च रूप निपात वर्धिता (सती) वाक्यायौचित्यं जनयत्युपादयति। ''सत्यं च नित्यं च यत्'' इत्यत्रा प्रयुक्तने चरूपेण निपातेन काव्यसौन्दर्यं वर्धयति।

2.14 कालौचित्यम् -

निपातौचित्यं प्रदश्र्य साम्प्रतं चतुर्दशतमं कालौचित्यं निरूपयति। यथा-

कालौचित्येन यात्येव वाक्यमर्थेन चारूतम्।

जनावर्जनरम्येण वेषेणेव सतां वपुः।।

कालकृतौचित्ययुक्तेन भूतभविष्यदादिकालकृतौचित्यसहितेनार्थेनाभिधेयेन, वाक्यं चारुतां रुचिरतामेतिप्राप्नोति, कालयोग्येन समयोचितेन वेषपरिग्रहेण वेषधरणेनाववसरज्ञानामवसरज्ञानवता, सज्जनानां वपुर्विग्रह इव। उदाहरणं यथा-

च्युतसुमनसः कुन्दाः पुष्पोद्गैरलसा द्रुमा,

मनसि च गिरं गृहणन्तीमे किरन्ति न कोकिला:

अथ च सवितु: शीतोल्लासं लुनन्ति मरीचयो

न च जरठतामालम्बन्ते क्लमोदयदायिनीम्।।

अस्मिन्पद्ये सद्य: समागतेन वसन्तेन कमनीयं यदुपवनं, तस्य यो नूतनो रसोल्लास्तेन अभिव्यज्यमाना, या कामस्योत्कण्ठा तस्या वर्णनायां शिशिरवसन्तयो: सन्धेरनुरूपा: कुन्दा: कुसुमावसानशून्यतनव:, किंशुकाशोका: अंकुरोद्गमभरावनता:, कोकिला: मनसि स्वाव्यक्तमधुररावाननुसन्दधति अथ च सूर्यस्य रश्मय: शीताधिक्यं निवारयन्ति, न च सन्तापदायिकां प्रखरतामालम्बन्ते, इत्युक्ते वर्तमानकाल पदेष्वेव तत्तत्स्थानप्रयुक्तवर्तमानकालिकक्रियापदेष्वेव, हृदयसंवादसुन्दरं हार्दिकभावनानुरूपकमनीयं, किमप्यपूर्वमौचित्यमामोदते प्रस्पफुटति।

2.15 देशौचित्यम्-

कालौचित्यं विचार्य सम्प्रति क्रमोपगतं पंचदशतमं देशौचित्यं प्रदर्शयति। यथा-

देशौचित्येन काव्यार्थ: ससंवादेन शोभते।

परं परिचयाशंसी व्यवहार: सतामिव।।

कारिकार्थमेव विवृणोति हार्दिकभावनानुरूपेण स्थानविशेषौत्येन देशविशेषानुरूपवर्णनेनेत्यर्थ:, काव्यार्थ: सतां सज्जनानां पूर्वपरिचयान्नाख्यापक: पूर्वपरिचयसूचको व्यवहार इव शोभते परमुत्कृष्टं यथा स्यात्तया शोभते। उदाहरणं यथा-

पुरा यत्रा स्रोत: पुलिनमधुना तत्रा सरिता

विपर्यासं यातो घनविरलभाव: क्षितिरुद्यम्।

बहोर्दृष्टं कालादपरमिव मन्ये वनमिदं

निवेश: शैलानां तदिदमिति बुद्धि द्रढयति।।

उत्तररामचरितनाटकादुदधृतं पद्यमिदम्। शम्बूकवधप्रसंगेन पुनर्दण्डकारण्यं प्रविष्टवतो रामचन्द्रस्योक्तिरियम्। पुरा वनवासकाले यस्मिनन्स्थाने नदीनां प्रवाह आसीत्, तत्राधुना सम्प्रति, तस्मिन् स्थाने पुलिनं जलादुत्थितं बालुकामयं तटं सम्पन्नमिति। पूर्वं यत्रा वृक्षा घना आसन् तत्रोदानीं विरला: संयाता, यत्रा च विरला आसन्, तत्राद्य घना अभूवन्निति भाव:। अत एव बहो: कालात् परमवलोकितमिदमेतद्वनमरण्यमपरं तप्रिन्नमिव मन्येऽनुभवामि। तत्प्रत्यभिज्ञाने हेतु दर्शयति निवेश: शैलानामिति। पर्वमानां निवेशो यथापूर्वमवस्थानं, तदेवेदं वनमिति बुद्धि मतिं, द्रढयति। अर्थात् बहुकालानन्तरं दृष्टमिदं

वनमदृष्टपूर्वमिव प्रतिभति, परन्तु पर्वतानां यथापूर्वस्थितिस्तदेवेदं वनमिति बुद्धिं स्थिरीकरोति' इत्युक्ते पद्येऽस्मिन् चिरकालस्य विपर्यासेन परिवर्तितं संघटनं यस्यैवंभूतस्य वनस्य वर्णनेन हृदयसंमतो, देशस्वभाव: स्थान विशेषप्रकृति: परमौचित्यमुद्द्योतयति।

2.16 तत्त्वौचित्यम् -

तत्त्वौचित्यमित्थं विवेचयति क्षेमेन्द्र:-

काव्यं हृदयसंवादि सत्यप्रत्ययनिश्चयात्।

तत्त्वोचिताभिमानेन यात्युपादेयतां कवे:।।

अर्थात् यथास्थित वस्त्वनुरूपवर्णनेन कवे: काव्यं निश्चयादस्मात्काव्यात्सत्यस्य प्रतीतिर्भवतीव्या कारकविश्वासाद् हृदयसम्मतं सदुपायेतां ग्राह्यतां याति। उदाहरणं यथा-

दिवि भुवि पफणिलोके शैशवे वा

जरसि निधनकाले गर्भशय्याश्रये वा।

सहगमनसहिष्णो: सर्वथा देहभाजां

नहि भवति विनाश: कर्मण: प्राक्तनस्य।।

अत्र ''पूर्वोपार्जितस्य कर्मणस्त्रिलोक्यां बाल्यतारुण्यवार्धक्यावस्थासु शरीरिणां सहगमने समर्थत्वान्न क्षयो भवति'' इत्युक्ते नि:संशयसकलजनहृदयसंवादितत्त्वाख्यानं सन्देहरहितसम्पूर्णमानवमनोभावानुमोदित- तत्त्वाभिधनमौचित्यं ख्यापयति प्रकाशयति।

2.17 सत्त्वौचित्यम्-

तत्त्वौचित्यप्रतिपादनानन्तरं सत्त्वौचित्यं प्रदर्शयति। यथा-'चमत्कारं करोत्येव वच: सत्त्वोचितं कवे:। विचाररूचिरोदारचरितं सुमतेरिव।।''

अर्थात् सत्त्वोचितमन्तर्बलोपयुक्तं, काव्यं (कविवाणी) सुमते: सुधियौ विचारचरितोदारचरितं विवेकानुमोदितोदात्तचरित्रामिव, चमत्कारं विच्छित्तिविशेषं करोति सम्पादयत्येव। यथा चोदाहरणम्-

नदीवृन्दोद्दामप्रसरसलिलापूरिततनु:,

स्पफुरत्स्पफीतज्वालानिबिडबडवाग्निक्षतजल:।

न दर्पं नौ दैन्यं स्पृशति बहुसत्त्व: परिरपा-

मवस्थानां भेदाद्भवति विकृतिर्नैव महताम्।।

अर्थात् अवस्थानां परिस्थितीनां, भेदाद्विपर्ययान्महतां महाशयानां, विकृतिर्विकारो,

नैव, भवति जायते। पद्येऽस्मिन्, समुद्रव्याजेन युधिष्ठिरस्य सत्त्वाध्क्यि प्रतिपाद्यमाने, ''बहुसत्त्वः समुद्रो नदीप्रवाहपरिपूर्णकलेवरो वडवानलशोषितश्च नोत्सेकं नोदर्पं नवा-दैन्यं स्पृशति, परिस्थिति-विपर्ययाद्बृहदाशयानां विकृतिर्न भवतीत्युक्ते'' गम्भीरधीरा धैर्यगाम्भीर्यपरिपूर्णा, सत्त्ववृत्तिः - सात्त्विकव्यापार औचित्यमातनोति जनयति इति।

2.18 नामौचित्यम्

नामौचित्यमित्थं निरूपयति क्षेमेन्द्रः। यथा-

नाम्ना कर्मानुरूपेण ज्ञायते गुणदोषयोः।

काव्यस्य पुरूषस्येव व्यक्तिः संवादपातिनी।।

अर्थात् यथा पुरुषस्य कर्मानुरूपेण नाम्ना गुणदोषयोरभिव्यक्तिः संवादिनी जायते तथैव

काव्यस्यापि गुणदोषयोरभिव्यक्तिः कर्मानुरूपेणाभिधेयेन संवादिनी प्रतीयते। उदाहरण यथा-

इदमसुलभवस्तुप्रार्थनादुर्निवारः

प्रथममपि मनो मे पंचबाणः क्षिणोति।

किमुत मलयवातान्दोलितापाण्डुपत्रौ-

रूपवन सहकारैर्दर्शितेष्वंकुरेषु।।

अस्मिपद्ये, पूर्वमेव ममेदं मनः पंचसायको मदनः प्रियतमायाः कामनया दुर्निवारः सन्, शकलीकरोति, सुरभितवातकम्पितग्रबालैरूपवनस्थानम्रवृक्षैरअंकुरेषु दर्शितेषु किमुत? इत्युक्तें कामदेवस्य 'पंचबाण' इति नामोपादानं नितरां समुचितम्। अर्थात् हृदयभेदनरूपकर्मकारिणः पंचबाण एव संज्ञोपयुक्तास्ति, यद्यत्रौव 'अनंग' इत्युच्येत न तर्हि समुचितं स्यात्तस्मादत्रा- कर्मौचितपंचबाणनाम्ना नामौचित्यमत्यन्तं समुज्ज्वलमिति ज्ञेयम् अथवा द्वितीयमुदाहरणम्-

तारूण्येन निपीत शैशवतया साऽनंगशृंगारिणी,

तन्नअंगया सकलाघ्गसघ्गमसखी भंगिर्नावांगीकृता।

निःसंवरम्भपराक्रमः पृथुतरारम्भाभियोगं विना,

साम्राज्ये जगतां यथा विजयते देवो विलासायुद्धः।।

अत्रा 'तारुण्यदूरीकृतबाल्यया कृशाघ्गया कामव्यंजकशृंगारशालिनी, सकला-वयवकृतसख्या तादृशीकाव्यभिनवैव भंगिः स्वीकृता यया भघग् यैवायत्नसिद्धप्रभावो

निरतिशयारम्भसाधनं विनैव त्रैलोक्यराज्ये देवो विलासायुधे जयती'' त्युक्ते कामस्य 'विलसायुद्ध' इति नामधेयमुपपन्नं सयुक्तमेव।

एवमेव कुलौचित्य-व्रतौचित्याभिप्रयौचित्यस्वभावौचित्य-सार संग्रहौचित्य प्रतिभा-चित्यावस्थौचित्य-विचारौचित्यनामौचित्याऽऽशीर्वचनौचित्यादीनामपिविवेचनं कृतमस्ति औचित्यविचारर्चाग्रन्थे।

इत्थमन्येषाम् औचित्यस्थलानामपि उदाहरणानि औचित्यविचारचर्चाग्रन्थे प्रदत्तानि सन्ति। क्षेमेन्द्रेण औचित्यस्य मुख्या: सप्तविंशतिभेदा: परिगणिता:। शेषास्तु समीक्षकै: स्वयमेव कल्पनीया:। यथा - अन्येषु काव्याअंगेषु अनयैव दिशा स्वयमौचित्यमुत्प्रे-रक्षणीयम्।

3.0 औचित्यस्य काव्यस्याऽन्यतत्त्वै: सह संबंध: -

सर्वेषु अन्येषु काव्यतत्त्वेषु औचित्यं व्याप्तमिति रीत्या क्षेमेन्द्र: तत् काव्यस्य जीवितरूपेण प्रतिपादितवान्। परं औचित्यं विहाय अन्येऽपि पंचसिद्धन्ता: रस अलंकार रीति-ध्वनि-वक्रोक्तिरूपेण प्रतिपादिता: सन्ति। अत: तै: तत्त्वै: सह औचित्यस्य सम्बन्धे निर्धरणीयो निरूपणीयश्च।

3.1 औचित्यं रसश्च - क्षेमेन्द्रेण काव्ये रस एवोत्कर्षकतमं तत्त्वमिति प्रोक्तम्। अपि च तेन रससिद्धस्य काव्यस्य जीवितम् औचित्यमेव साधितम्। एवम् औचित्यं व्यापकं रसश्च व्याप्यो वर्तते। औचित्ययुतो रस एव सहृदयाह्लादको भवति। यथा मधुमासो अशोकतरुमअंकुरयति तथैव औचित्यने रुचिरो रस: सहृदयहृदयानि प्रपफुल्लयति।

ध्वनिवादिन आचार्या अपि औचित्यस्य रसस्य च सम्बन्धं् सगभीरं विमृष्टवन्त:। तै: अनौचित्यमेव रसभंगस्य प्रधनं कारणं प्रतिपादितम्। औचित्यविधनमेव परमं रहस्यं रसस्य। काव्ये रसगतौचित्यस्य प्रतिपादनेन बहुविध दोषा नोत्पद्यन्ते। अत: काव्ये प्रत्यंगम् औचित्यस्य सन्निवेशनं तथा विधतव्यं यथा रसस्य निष्पत्तौ रमणीयत्वे च न काचिद् बाध भवेत्।

3.2 औचित्यमलंकारश्च -

अलंकारतत्त्वेन सह औचित्यस्य सर्वदा सम्बन्धे विद्यते। यत: काव्येषु अल-ंकारविनियोजनम् औचित्यपूर्वकं भवेदिति आचार्याणाम् आशय:। यथा चोच्यते आनन्दवर्धनेन ध्वन्यालोके -

ध्वन्यात्मभूते शृंगारे समीक्ष्य विनिवेशितः।

रूपकादिरलंकारवर्ग एति यथार्थताम्।।

विवक्षा तत्परत्वेन नाऽगित्वेन कदाचन।

काले च ग्रहणत्यागौ नातिनिर्वहणैषिता।।

निर्व्यूढावपि चाअंगत्वे यत्नेन पर्यवेक्षणम्।

रूपकादिरलंकाररवर्गस्याअंगत्वसाध्नम्।।

-ध्वन्यालोकः- 2-17-19

अर्थात् अलंकाराणां योजना काव्येषु रसस्य अंगरूपेणैव कर्तव्या न तु अंगिरूपेण। क्षेमेन्द्रेणापि प्रोक्तम् अलंकारेषु अलंकारत्वं तेषाम् औचित्यपूर्णनियोजने भवति। आ-चित्ययुक्तैः अलंकारैः सूक्तयः तथैव शोभन्ते, यथा पीनपयोध्रस्थितेन हारेण मृगनयनी नायिका शोभते। उचितस्थानसन्निविष्टा एव अलंकाराः काव्यशोभावर्धकाः भवन्ति। अनुचितस्थाने सन्नियोजितास्ते सर्वथा अलंकारत्वरहिताः भवन्ति। उदाहरणरूपेण तेन लौकिका अलंकाराः प्रस्तुता। यथा कण्ठे मेखला, नितम्बयोहारः, करयोः नूपुरे, पादयोश्च केयूरे नाअंगशोभावर्धकाः भवन्ति, तथैव औचित्यं विना काव्यगता अलंकारा अपि न काव्यशोभावर्धकाः भवन्ति। अनेन अलंकारेण सह औचित्यस्य सम्बन्धे निर्धयते।

3.3 औचित्यं रीतयश्च - आचार्यक्षेमेन्द्रेण औचित्यविचारचर्चाग्रन्थे रीतितत्त्वं न चर्चितम्, न वा औचित्यभेदेषु रीतिभेदस्य गणना कृता। रीत्यौचित्यसंबंधविचारोः ध्व-न्यालोककारेण आनन्दवर्धने कृतः। रीतिनियामकतत्त्वानि तेन व्याख्यातानि। रीत्यौचित्यं रसौचित्यस्य आश्रयेणैव प्रवर्तते। यथा च तेनोक्तम्-

अंगरूपेण वक्तृवाच्यविषयोचित्यानि खलु रीतिनियामकानि अपि भवन्ति अस्य विमर्शस्य अयमभिप्रायो यत् काव्येषु पदसंघटना रसानुकूला भवेत्। कोमलप्रकृतिषु शृंगारादिरसाभिव्यक्तिप्रसंगेषु कोमलकान्तपदावली, कठोरप्रकृतिषु च रौद्रादिरसाभि-व्यक्तिप्रसंगेषु कठोरपदावली कविभिः प्रयोज्या। एतदेव वर्तते सघटनाया औचित्यम्। अर्थात् पदानां संघटना वक्तृवाच्यविषयौचित्येन कार्या। वक्तुः अभिप्रायो वर्तते - कविः कविनिबद्धपात्रां वा। वाच्यस्याऽभिप्रायः काव्यप्रतिपाद्यविषयो वर्तते। सुकुमारवर्ण्यविषय-वर्णनाय कोमलपदावली अथ च कठोरवर्ण्यविषयवर्णनाय कठोरपदावली प्रयोजनीया भवति। विषयस्याऽभिप्रायो वर्तते काव्यस्य विविधविधाः। तत्रा पदावलीप्रयोगः तदनुकूलो अनुरूपश्च भवेत्। कुत्रा कीदृशी पदावली प्रयोक्तव्येति विस्तृतनिर्देशो ध्वन्यालोके ध्वनि-कारेण कृतः। पदसंघटनारूपरीतेः औचित्यविधनं कृत्वा आनन्दवर्धनेन उपनागरिकादीनां शब्दवृत्तीनां कैशिक्यादीनांच अर्थवृत्तीनामपि औचित्यं निरूपितम्। सर्वत्रा औचित्यस्य

विधनाभावे रसभंगो जायते।

3.4 औचित्यं ध्वनिश्च -

क्षेमेन्द्रेण काव्यस्य जीवितम् औचित्यं प्रतिपादितं परम् आनन्दवर्धनेन ध्वनि: काव्यस्यात्मा उदघोषित:। यद्यपि द्वौ भिन्नसिद्धान्तौ स्त: परं द्वयोर्मध्ये अस्ति कश्चित् विलक्षण: संबंध:। रसादिध्वनि: यदि काव्यस्य आत्मा,तदा औचित्यं तस्य जीवितम्। आत्मानं विना यथा जीवनस्य अस्तित्वं न वर्तते, तथैव रसादिध्वन्यभावे औचित्यस्यापि अस्तित्वं नैव स्वीकर्तुं शक्यते। क्षेमेन्द्रेण सम्भवतो ध्वन्यालोक एव स्वग्रन्थस्य औचित्यविचारचर्चाया: मूलाधर: स्वीकृत:। रसादिनिबंधने ध्वनिकारेण औचित्यस्य अनिवार्यत्वं प्रतिपादितम् अथ च औचित्यं रसस्य परमं रहस्यं निरूपितम्। तेन एतदपि प्रतिपादितं यत् शब्दार्थसंघटनादीनां सर्वेषामपि प्रतिपादनं रसौचित्यनैव करणीयम्। क्षेमेन्द्र: तदेव औचित्यं काव्यस्य प्राणभूतं परिकल्प्य औचित्यसिद्धान्तम् अकल्पयत्। इत्थं द्वयो: सिद्धान्तयो: संबंध: पूरकत्वेन स्वीकर्तुं शक्यते।

3.5 औचित्यं वक्रोक्तिश्च -

वक्रोक्तिं काव्यस्य आत्मत्वेन प्रतिपादयता अपि कुन्तकेन औचित्यं नोपेक्षितम्। औचित्यं तेन वक्रताया: जीवितं प्रोक्तम्। औचित्ययुता एव वक्रता काव्यजीवितं भवति। सुकुमारविचित्रामध्यमेषु त्रिषु एव मार्गेषु खलु औचित्यगुणो अनिवार्य:। वस्तुस्वभाव-पोषणमेव वक्रताया: परमरहस्यम्। तस्य च जीवितम् उचिताऽभिधनम्। वाक्यस्यैकदेशे अपि औचित्यस्य अभाव: सहृदयहृदयाह्लादहानिहेतु: भवति। कुन्तकस्य पदवाक्यप्र-बन्धदिषु सर्वासु एव वक्रतासु औचित्यविधनमनिवार्यं वर्तते। अतो अनेकेषु प्रबन्धेषु वक्रतौचित्ययो: अभिन्नत्वमेव प्रतिभाति। कुन्तकेन स्वयमेव औचित्यं वक्रताया: मूलं प्रोक्तम्। एवंच वक्रतासिद्धये साधनभूतमेव औचित्यम्।

4.0 औचित्यस्य काव्यात्मत्वसमीक्षा:-

क्षेमेन्द्रो लोकमर्यादाम् अंगीकृत्य औचित्यं काव्यजीवितम् अकथयत्। लोकव्य-वहारे यथा औचित्यस्य निर्वाह: परमावश्यक: तथैव काव्यव्यवहारे मर्यादापालनाय, सौन्दर्यसम्पादनाय च औचित्यस्य निर्वाहो अनिवार्य एव। काव्ये अलंकारगुणरसरीति-वृत्त्यादितत्त्वानां नियोजनं नूनमेव औचित्यपूर्वकं भवेत्। तदा एव काव्ये काव्यत्वं जायते। अस्य औचित्यस्य अभावे सर्वे गुणा: निरर्थका: निष्पफलाश्च संजायन्ते। आचार्यक्षेमेन्द्रस्य विचारोऽयं यत् औचित्यं सर्वस्मिन् लोके व्याप्तमस्ति, अनेन हेतुना औचित्यं काव्यस्य प्रत्यंगं व्याप्नोति। अत एवेदं काव्यजीवितमुच्चते। औचित्यस्याभावे काव्यमुपहासास्पदं भवति। रसानां विनिवेशनेऽपि औचित्यविधनमनिवार्यम्।

लोकव्यवहारे हि औचित्यपालनं कर्तव्यमेव। अन्यथा जनो निश्चयेनोपहासपात्रां भवति। तथैव काव्येऽप्यौचित्यस्याभावे काव्यमुपहासास्पदं विदधाति। कामिनीवक्षसि स्थिता मौक्तिकस्रक् सौन्दर्यं वर्धयति। परं सैव स्रक् पादयोः स्थितापे हासास्पदं जायते। तथैव काव्येऽलंकाराः सौन्दर्योत्कर्षकास्तदैव भवन्ति यदा ते समचित स्थानेषु विनियोज्यन्ते। विप्रलम्भशृघ्गारे यमकालंकारविनियोजनं निश्चयेन रसस्यापकर्षकरं भवति।

मनुष्येषु शौर्योदायर्कारुझयादयो गुणाः ध्रुवं गौरवमावहन्ति, परन्त्वौचित्यमर्यादायामवस्थिता एव। प्रणतशत्रुं प्रति शौर्यप्रदर्शनमाक्रमणकारिणंच प्रति कारुण्यप्रदर्शनं निश्चयेनाऽवगुणकोटिमध्रिोहति। तत्रा न भवति गुणत्वम्। एवमेव रौद्रदिषु कठोररसेषु माधुर्यगुणनिवेशो यथा दोषावहस्तथैव शृंगारादिषु कोमलरसेषु ओजोगुणनिवेशनं काव्यस्यापकर्षहेतुरेव। अत एव क्षेमेन्द्रेण प्रोक्तम् -

अलंकारेषु तदैवालंकारत्वं भवति यदा तेषां विन्यासः समुचित स्थानेषु विधीयते।

एवं गुणेष्वपि तदैव गुणत्वं जायते, यदा ते औचित्ययुता वर्तन्ते।

रसानां विनिवेशनेऽप्यौचित्यविधन मनिवार्यम्। लोके मधुराम्ललवणकटुतिक्तकषाया रसाः भोजनपदार्थेषु पाचकेनौचित्येन नियोजिता यथा भोजनस्य रमणीयत्वं वर्धयन्ति, तथैव रसनियोजनमौचित्येन संविधीयमानं काव्यस्य रमणीयतामाह्यादकतां वा पुष्णाति। शृंगारसः सर्वेषां रसानामधिपतिः, परमसमयेऽस्य विनियोगो विरसतामेवाऽऽवहति। यथा वेणसंहारनाटके दुर्योधनस्य भानुमतीं प्रति प्रणयप्रसंग। महाभारतीये युद्धे दुर्योधनप्रक्षीयेष्वनेकमहावीरेषु हतेषु सत्सु दुर्योधनस्य भानुमतीं प्रति प्रेमप्रदर्शनं ध्रुवमनुचितं शृंगारसस्याऽपकर्षकरं वर्तते।

कस्यचिद्ररसस्य पौनः पुन्येनाऽभिव्यक्तिरपि विरसत्वहेतुर्भवति। कुमारसम्भवमहाकाव्ये कामदेवभार्यायाः शोकस्य करूणरसस्थायिभावस्य पानैः पुन्येनोद्दीपनं रसदोषत्वमुपैतीति समीक्षकाः स्वीकुर्वन्ति।

उपभुक्तरसस्य पौनःपुन्येनपरिपोषोऽप्यानन्दवर्धनेन रसदोषोऽभिहितः। औचित्यं रसस्य परमं रहस्यमनौचित्यंच रसभंगहेतुरित्यानन्दवर्धनस्य विमर्शः। यथा

अनौचित्यादृते नाऽन्यद् रसभंगस्य कारणम्।

औत्यिौपनिबद्धस्तु रसस्योपनिषत्परा।।

अयमेव हेतुर्यत् क्षेमेन्द्रोऽपि रससिद्धकाव्ये यद्यौचित्यमेव तस्याऽऽत्मानं जीवितं वा प्रतिपादितवान् तदत्रा को दोषः किमनौचित्यं वा सम्भावनीयम्।

एवं कावयात्मरूपमौचित्यसंविधनं क्षेमेन्द्रेण स्वीकृतम्। परन्त्वनेन तस्य का-

व्यात्मभावो न सिध्यति। गुणात्वअंकारादीनामौचित्यस्येयमेव स्थिति:। गुणलंकारदीनां विनियोजनं नौचित्याय परमौचित्यमेतेषासुत्कर्षसिद्धये साध्नत्वेनाऽवतिष्ठते। एवं काव्येष्वौचित्यं साध्नत्वेन तिष्ठति, न तु साध्यत्वेन। अत: काव्ये रसध्वनिगुणलघ्का-रादीनामपेक्षात औचित्यस्याऽऽत्मतत्त्वप्रतिपादनं न समुचितम्।

औचित्यं रससिद्धकाव्यस्य जीवितं प्रतिपादयन् क्षेमेन्द्र प्रोवाच-उचितरूपेण धतुवादरससिद्धमौषधं यथा वपुषि जीवनं स्थिरयति, तथैव शृंगारादिरससिद्धकाव्यस्य जीवितमौचित्यं स्थिरीकरणसाधनं तत्त्वं वर्तते। काव्यस्य जीवनं रसादिध्वनिवर्तते, परमौचित्यं तस्य स्थिरीकरणसाधनं विद्यते।

उपर्युक्तविवेचनेन सिद्धमिदं यत काव्ये औचित्यस्य महत्त्वमनिवार्य वर्तते, परं तस्य काव्यात्मरूपेण स्थिति: न स्वीकरणीया। अनिवार्यरूपेण स्थितमप्यौचित्यं न काव्यस्य आत्मा। तद्विना काव्ये काव्यत्वं न वर्तते इति नैव लक्ष्यते। अत: समीक्षणीयं यत् औचित्यं काव्योत्कर्षसा धनं वर्तते साध्यं वा। साध्यरूपेण यदि स्थिति: औचित्यस्य भवेत् तदैव तस्य आत्मत्वं सम्भवेत्, परन्तु तन्न साध्यम्। तत्तु साध्यस्स रसस्य आत्मतत्त्वस्योत्कर्षहेतु: साध्नमेव। कविना काव्यरचना काव्यरसानन्दानुभूत्यै क्रियते न तु औचित्यप्रतिपादनाय। परं क्षेमेन्द्रस्य दृष्टि: काव्यस्य बाह्यक्षेत्रापर्यन्तमेव परिमिता बभूव। काव्यस्यान्तरंगत्वअंगतेन रसध्वनिना परिचितोऽप्यसौ तस्य महिमानं व्याख्यातु न समर्थो बभूव। वस्तुतो रसध्वनिरेव काव्यस्याऽऽत्मा। स एव साध्य:। औचित्यं तत्वं साध्यस्य रसस्य साध्नत्वात् तस्य अंगत्वमेव स्वीक्रियते।

5.0 विषयसंग्रह: -

इत्थं पाठेऽस्मिन् औचित्यस्य सप्तविंशतिभेदा: नामत: परिगणिता:, तेषु केषांचिद् भेदानाम् उदाहरणपूर्वकं निरूपणमपि कृतम्। तदनन्तरं काव्यस्य अन्यतत्त्वै: यथा- रसा लंकाररीतिध्वनिवक्रोक्तिभि: सह औचित्यस्य सम्बन्धेऽपि संक्षेपेण निरूपित:। तेन सह औचित्यं काव्यस्याऽऽत्मा अस्ति न वा इत्यपि समीक्षितम्।

1.0 प्रस्तावना -

साहित्यशास्त्रास्य विकासयात्रायां कालक्रमेण षट्सिद्धान्ता: संप्रदाया: पक्षा: वा प्रादुर्भूता:। यथा रससिद्धान्तो अलंकारसिद्धान्तो रीतिसिद्धान्तो ध्वनिसिद्धान्तो वक्रोक्तिसिद्धान्तो औचित्यसिद्धान्तश्च। एते षट्सिद्धान्ता: काव्यात्मतत्त्वप्रतिपादनाय उत वा काव्यस्य सर्वप्रधनतत्त्वं किमिति जिज्ञासायाम् आविर्भूता:। तत्रा भरताचार्येण प्रवर्तितो रससिद्धान्तो भामहदण्डयुद्भटादिभि: प्रवर्तितोऽलंकारसिद्धान्तो वामनाचार्येण प्रतिपादितो रीतिसिद्धान्त:, आनन्दवधर्नाचार्येण प्रतिपादितो ध्वनिसिद्धान्त: कुन्तकाचार्येण प्रवर्तितो

वक्रोक्तिसिद्धान्तः, आचार्यक्षेमेन्द्रेण प्रवर्तित औचित्यसिद्धान्तश्च। एतेषु औचित्यसिद्धान्तो महत्त्वपूर्णः सिद्धान्तोऽस्ति साहित्यशास्त्रे।

साहित्यशास्त्रस्य विकासयात्रायां कालक्रमेण षड्सिद्धांताः प्रादुर्भूताः। यथा-रससिद्धांतः, अलंकारसिद्धांतः, रीतिसिद्धांतः ध्वनिसिद्धांतः वक्रोक्तिसिद्धांतः, औचित्यसिद्धांतश्च। तत्र रससिद्धांतमनु द्वितीयस्थानमलंकारसिद्धांतो भजते। काव्यसमालोचनायाः प्रारंभिकयुगे काव्यस्य प्रमुखं सौन्दर्याधायकं तत्वमलंकार एव सम्मतं विद्वद्भिः। तेषु भामहदंडयुद्भटादयः प्रमुखाः सन्ति। काव्यात्मतत्वानुसंधानाय विभिन्नकालेषु नव-नवसिद्धांतानामविर्भावः कथं संजातः, कश्चाधारस्तत्र गृहीत इत्यस्य विश्लेषणं समुद्रबंधनेन इत्थं कृतम् - ''इह विशिष्टौ शब्दार्थौ काव्यम्, तयोश्च वैशिष्टयं धर्ममुखेन व्यापारमुखेन व्यंग्यमुखेन चेति त्रयः पक्षाः। आद्येऽप्यलंकारतो गुणतो वेति द्वैविध्यम्। द्वितीयेऽपि भणितिवैचित्र्येण भोगकृत्वेन चेति द्वैविध्यमिति पंचसु पक्षेषु प्रथम उद्भटादिभिरंगीकृतो द्वितीयो वामनेन तृतीयो वक्रोक्तिजीवितकारेण चतुर्थो भट्टनायकेन पंचमश्च आनंदवर्धनेन।'' भतरमनु काव्यशास्त्रेतिहासेऽनेकैराचार्यैनुसंधानं विहितं यत् काव्येषु किंचिदीदृशं तत्वं मूलभूतं विद्यते, यत्प्रति सहृदयजना आकर्षणमनुभवन्ति काव्यानंदंचाऽऽस्वादयन्ति। येनाऽऽचार्येण यत्काव्यांगं प्रति तथाभूतमाकर्षणमनुभूतं तेन तदेव काव्यांगं काव्यस्याऽऽत्मरूपेण प्रतिष्ठापितम्। केचन आचार्याः काव्येषु प्रमुखं तत्वं रसमनुभूतवन्तः। काव्यरचनायाः मुख्यतम उद्देश्यो रसनिष्पादनमेव वर्तते। रसमास्वाद्यैव सहृदयसामाजिका आनंदमनुभवन्ति। अतो रस एव काव्यस्यात्मा। अन्ये आचार्याः मुख्यतमं सहृदयाकर्षकमाह्लादजननं तत्वमलंकारं स्वीकृतवन्तः। शब्दार्थशरीरं तावत्काव्यम्। शब्दार्थलंकरणसमर्था अलंकारा एव काव्यस्यात्मेति तेषां विचारः। अपरे मनीषिणः प्राहुः-पदसंघटनैव काव्यसौन्दर्यहेतुः। पदसंघना रीति। अतो रीतिरेव काव्यस्याऽऽत्मा। परे जगदुः-काव्येषु वैचित्र्यमेव सहृदयहृदयानामाह्लादकत्वस्यऽऽकर्षणस्य च हेतुः। वैचित्र्यसंयुतोक्तिरेव वक्रोक्तिः। अथ च वैदग्ध्यभंगीभणितिर्वक्रोक्तिः। सा वक्रोक्तिरेव काव्यस्याऽऽत्मा। केचन आचार्या औचित्यमेव काव्यस्याऽऽत्मानं जगदुः। काव्येष्वौचित्यमेव परमं रहस्यं सहृदयहृदयाह्लादकरं तत्वं काव्यस्याऽऽत्मा। अथ चान्ये मनीषिणः प्रतिपादितवन्तः- काव्येषु सौन्दर्यं व्यंग्यार्थेनैव सम्भवति। व्यंग्यार्थप्रधानं काव्यं ध्वनिरित्यभिधीयते। स ध्वनिरेव काव्स्याऽऽत्मा।

एतेषु अलंकारपक्षस्य विवेचनं पाठेऽस्मिन् क्रियते।

2.0 औचित्यसिद्धान्तस्य प्रवर्तनम् -

औचित्यसिद्धान्तस्य प्रवर्तकोऽस्ति आचार्यक्षेमेन्द्रः। क्षेमेन्द्रविरचितो ग्रन्थोऽस्ति औचित्यविचारचर्चा, यत्रा तेन औचित्यसिद्धान्तस्य प्रतिपादनं कृतम्। तत्रा औचित्यविचा-

रचर्चाग्रन्थे क्षेमेन्द्रेण औचित्यतत्त्वस्य लक्षणं निरूप्य औचित्यस्य सप्तविंशति: स्थलानि निरूपितानि। काव्येषु विभिन्नतत्त्वानाम् औचित्येन सन्निवेश एव सौन्दर्याधयकं भवतीति काव्यशास्त्रिाणामभिमतम्। औचित्यव्यवहारयुक्त एव जनो यथा लोके प्रतिष्ठां प्राप्नोति अनौचित्ययुक्तव्यवहारेण च हास्यास्पदत्वम् अनादरमप्रतिष्ठां वा आप्नोति, तथैव काव्येष्वपि दृश्यते। काव्येषु रसालंकाररगुणरीत्यादितत्त्वानि तदैव सौन्दर्याधयकानि भवन्ति यदा तेषां विनियोजनम् औचित्यपूर्णं भवति। औचित्यस्य अभावे न केवलं काव्यस्य वैशिष्ट्यं काव्यत्वंच न्यूनं भवति अपितु काव्यकर्तु: कवे: प्रतिष्ठा अपि न्यूना संजायते। लोके तस्य निन्दामपि प्रसरति। अथार्त् औचित्येन एव गुणानां सत्ता भवति, औचित्यं विना गुणा: अपि काव्यशोभां सम्पादयितुम् असमर्था: भवन्ति। यथा चोच्यते क्षेमेन्द्रेण औचित्यविचारचर्चाग्रन्थे -

काव्यस्यालमलंकारै: किं मिथ्यागणितैर्गुणै:।

यस्य जीवितमौचित्यं विचिन्त्यापि न दृश्यते।।

अलंकारास्त्वलंकाररा गुणा एव गुणा: सदा।

औचित्यं रससिद्धस्य स्थिरं काव्यस्य जीवितम्।।

अर्थात् काव्ये गुणालंकारा: सर्वे व्यर्था: भवन्ति यदि तत्रा रसजीवातुभूतम् आचित्यतत्त्वं विचार्य्यापि न अवलोक्यते, अन्वेषणे सत्यपि न प्राप्यते। अर्थात् प्राणतत्त्वं विना शरीरे यथा भूषणं व्यर्थं भवति तथैव काव्येऽपि औचित्यं विना गुणालंकारदयो व्यर्था: भवन्ति। अलंकारररा अनुप्रासोपमादय:, अलंकारा एव अर्थात् बाह्यशोभाधयकानि भूषणानि एव, गुणा ये च माधुर्य-ओज-प्रसादा: तेऽपि सत्यशीलादिवद् गुणा एव, काव्यस्य स्थिरमविनश्वरं जीवनं तु औचित्यम् एव अस्ति।

गुणालंकारादय: शोभाधयकधर्मा: तदा एव काव्यमलङ्.कुर्वन्ति यदा तेषां विन्यास: यथोचिते स्थाने जायते। उचितस्थानविन्यासात् एव अलंकारा अलंकाररपदवाच्या: भवितुमर्हन्ति, एवमेव औचित्येन युक्ता एव गुणा: गुणत्वं धरयन्ति।

यथा च कथयति आचार्यक्षेमेन्द्र:-

उचितस्थानविन्यासादलङ्.कृतिरलङ्.कृति:।

औचित्यादच्युता नित्यं भवन्त्येव गुणा गुणा:।।''

आचार्यक्षेमेन्द्रस्याभिमतं वर्तते यत् औचित्यं काव्यस्य प्रत्यंगं भवेत्। काव्ये यत्रा औचित्यस्य अभावो भवति, तत्रौव रसभंगो जायते। तेन अचारुत्वमागच्छति, पाठकेषु दर्शकेषु च अरुचि: उत्पद्यते, अत एव औचित्यनिर्वाहो अनिवार्य एव। औचित्येन एव

काव्येषु सौन्दर्यमागच्छति, अर्थात् सौन्दर्यम् औचित्यमेव आश्रयते।

लौकिकालंकाररेषु अपि तदैव अलंकाररत्वं तिष्ठति यदा ते अंगानां शोभां वध्-र्यिन्ति, नो चेत् स्वयं सुन्दरत्वेऽपि अलंकाररा: नोच्यन्ते। यदि काचित् कामिनी कण्ठे मेखलां, नितम्बयोर्हारं, करयोर्नूपुरे, चरणयोश्च केयूरे धरयति, तदा सा नूनमेव लोकस्य उपहासास्पदतां प्राप्स्यति। तथैव यदि कश्चिद् वीरपुरुषो विनम्रशरणागतेषु वीरतां प्रदर्शयति शत्रुषु च करुणां करोति, क: तं नोपहसिष्यति ? इयमेव स्थिति: काव्येषु वर्तते। अत: तत्रौचित्याभावे न गुणा: नाऽलंकाररा: रमणीयतां रोचकतांच आवहन्ति। यथा चोक्तं तेन-

कण्ठे मेखलया नितम्बपफलके तारेण हारेण वा,

पाणौ नूपुरबन्धनेन चरणे केयूरपाशेन वा।

शौर्येण प्रणते रिपौ करूणया नायान्ति के हास्यताम्,

औचित्येन विना रुचिं प्रतनुते नालघ्कृतिर्नो गुणा:।।

3.0 औचित्यलक्षणम् -

औचित्यस्य स्वरूपम् इत्थं प्रतिपादितं क्षेमेन्द्रेण -

‘उचितं प्राहुराचार्या: सदृशं किल यस्य यत्।

उचितस्य च यो भावस्तदौचित्यं प्रचक्षते।।

अर्थात् किं तदौचित्यमिति जिज्ञासायाम्- उच्यते यद् वस्तु यस्यानुरूपं भवति तदेव आचार्या: उचितं कथयन्ति। उचितस्य भाव एव औचित्यमिति कथ्यते। औचित्यमिदं न केवलं काव्ये, लोकेऽपि सर्वत्रा व्याप्तं दृश्यते। काव्यगतस्यौचित्यस्य निम्नलिखितानि

वैशिष्टयानि सन्ति-

1. काव्येषु इदमौचित्यतत्त्वं चमत्कारमातनोति।

2 काव्येषु अनेन ग्राह्मता उपादेयता चोत्पद्यते।

3 काव्यस्य इदं जीवितभूतमस्ति, प्राणतत्त्वमस्ति।

क्षेमेन्द्रस्य मन्तव्यमस्ति यत् औचित्यमेव काव्यस्य प्राणभूतं तत्त्वं वर्तते। काव्यस्य प्रत्यंगं व्याप्नोति इति हेतो: औचित्यतत्त्वं काव्यजीवितमिति इति व्यवस्थापितम्। कथनस्याभिप्रायोऽयमस्ति यत् रसेषु रसत्वम्, अलघ्कारेषु अलंकारत्वं गुणेषु गुणत्वं रीतषु रीतित्वं तदैव भवति, यदा तेषां सन्निवेशनम् औचित्ययुतं भवति। औचित्याभावे तत्त्वान्येतानि विरसत्वमेव आवहन्ति। अलंकारा: बाह्योपकरणानि वर्तन्ते काव्यस्य। अन्तरघ्गत्त्वभूता अपि गुणा: गुणा एव, न तु प्राणप्रतिष्ठातार:। परन्तु रससन्निविष्टं का-

व्यस्य स्थिरजीवितमौचित्यमेव वर्तते। यथास्थानं विन्यस्तषु अलंकाररेषु अलंकारत्वं भवति। औचित्यसीमासु निबद्धा एव गुणा: गुणत्वम् आवहन्ति। अत एव क्षेमेन्द्र: काव्यस्य जीवितम् औचित्यमेव प्रतिपादितवान्।

साहित्यशास्त्रे औचित्यस्य विकासक्रम:-

साहित्यशास्त्रे यद्यपि औचित्यं काव्यस्य प्राणभूतत्त्वेन क्षेमेन्द्रेण प्रतिष्ठापितं प्रतिपादितंच, परं काव्येषु औचित्यतत्त्वं भरतमुनिविरचितनाट्यशास्त्रादैव प्रादुर्भूतम्। तत: शनै शनै: एतस्य परिवधर्नं पल्लवनं च जातम्। औचित्यस्य ऐतिहासिकविकासक्रमस्य अवबोधनाय चीनकाव्यशास्त्राचार्याणां मतानि अवलोकनीयानि, कथं ते काव्येषु आचित्यतत्त्वस्य अनिवार्यत्वं प्रतिपादितवन्त:।

4.1. नाट्यशास्त्रे औचित्यतत्त्वम् -

काव्येषु औचित्यस्य अनिवार्यत्वं भवेत् इत्यत्रा आचार्येषु मतैक्यं दृश्यते- सर्वप्रथमं भरतमुनि: नाट्यशास्त्रे प्रोक्तम्- लोकवृत्तानुचरितनाट्ये नाट्याभिनये च लोकव्यवहारसिद्धानामेव धर्माणां वस्तूनां व्यवहाराणांच ग्रहणं कत्रत्व्यम्। यथा-

लोकसिद्धं भवेत् सिद्धं नाट्यं लोकस्वभावजम्।

तस्मान्नाटयप्रयोगेषु प्रमाणं लोक इष्यते।।

प्रकृतिस्वभावानामनेकत्वात् तेषां प्रयोगो लोकाधारणैव कर्तव्य:। अत एव नाटय् प्रयोगे अवस्थानुकूला वेशभूषा भवेत्, गतिक्रिया: वेशानुरुपा: साधनीया:, संवादादयो गतिप्रचारानुरूपा: कार्या अभिनयाश्च संवादानुरूपा: प्रयोक्तव्या:। यथा-

वयोऽनुरूप: प्रथमस्तु वेशो वेशानुरूपस्तु गतिप्रचार:।

गतिप्रचारानुगतं च पाठ्यं पाठ्यानुरूपोऽभिनयश्च कार्य:।

यदि वेशभूषादिकं देशानुकूलं न भवति तदा तेन शोभां न वर्धते, यथा वक्षसि मणिबन्धे च मेखलाधरणं उपहासाय एव भवति। यथा चोक्तं भरतने -

अदेशजो हि वेशस्तु न शोभां जनयिष्यति।

मेखलोरसि बन्धे च हास्यायैवोपजायते।।

यद्यपि नाट्यशास्त्रे औचित्यपदव्यवहारो नोपलभ्यते तथापि नाटय् प्रयोगाय भरतमुनिप्रदत्तेषु निर्देशेषु औचित्यस्य महत्त्वं सुकरतया अनुमातुं शक्यते। अतो नाट्यशास्त्रास्य उपर्युक्तेषु उद्धरणेषु औचित्यस्य उद्भावना नूनमेव जायते इति।

4.2 भामहमते औचित्यम् -

भामहदण्डिरुद्रटादय आचार्या अपि औचित्यस्य महत्त्वं प्रतिपादितवन्त:। भामहाचार्य: स्वग्रन्थे काव्यालंकाररे प्रतिपादयति-काव्येषु औचित्यं महत्तमो गुण:। अनौचित्यमेव महान् दोष:। तन्मते दुष्टोक्तिरपि सन्निवेशवैशिष्टयेन तथैव शोभां जनयति यथा माला-मध्ये ग्रथितं नीलपलाशमपि शोभामावहति। यथा कामिनीलोचनगतं कृष्णकज्जलमपि शोभावर्धकं भवति, तथैव आश्रयसौन्दर्येण असुन्दरमपि वस्तु सौन्दर्यमादधति। एवमेव अन्येऽपि असुन्दर-पदार्था औचित्यपूर्णविधनेन सौन्दर्यं धरयन्ति। यथा च -

सन्निवेशविशेषात्तु दुरुक्तमपि शोभते।

नीलपलाशमाबद्धमन्तराले स्रजामिव।।

किन्चिदाश्रयसौन्दर्याद् धत्ते शोभामसाध्वपि।

कान्ताविलोचनन्यस्तं मलीमसमिवांजनम्।। -काव्यालंकार: 1-54,55

4.3 दण्डिमते औचित्यम् -

गुणदोषविधने अनौचित्यौचित्यकारणत्वं आचार्यदण्डिनाऽपि प्रतिपादितम् –तने प्रोक्तम्-समुदायार्थशून्यवाक्येषु अपार्थो दोषो भवति, परन्तु उन्मत्तमत्तबालकानाम् आलापेषु नाऽसौ दोषो विचारणीय:।

यथा च - समुदायार्थशून्यं यत् तदपार्थमितीष्यते।

उन्मत्तमत्तबालानामुक्तेरन्यत्रा दुष्यति।।

काव्यादर्श:- 3-128

दण्डिभामहयोर्वचसामयमेवाऽभिप्रायो यद् गुणा: स्वयं न गुणा दोषाश्च स्वयं न दोषा:, परन्तु औचित्यस्य विधने गुणा गुणा भवन्ति। अथ च अनौचित्ये सति दोषेषु दोषत्वमुप-लक्ष्यते। वस्तुतो एकस्मिन्नेव औचित्ये सति गुणानां राशयो भवन्ति, अनौचित्ये च सति सर्वगुणसमूहो विषतुल्य: प्रतीयते।

4.4 रुद्रटमते औचित्यम् -

रुद्रटाचार्येणापि अलंकारदोषविवेचनप्रससंगे औचित्यतत्त्वस्य माहात्म्यं प्रति-पादितम्। यत् दोषा अनौचित्येनैव भवन्ति। देशकुलजातिविद्याधनवय:स्थानपात्राणां व्यवहाराकारवेशवचनेषु अनौचित्यमेव ग्राम्यत्वदोष:। परन्तु विशेषावस्थासु अस्य ग्राम्यत्वदोषस्य अपहारपूर्वकं गुणो जायते।

### 4.5 ध्वन्यालोके औचित्यतत्त्वम् -

ध्वनिकार आनन्दवर्धन: काव्येषु औचित्यस्य माहात्म्यं सविशेषेण निरूपितवान्। रसालंकाररगुणादीनां सर्वेषां विनियोजनं औचित्येन एव भवेदिति तेषामाशय:। क्षेमेन्द्रेण हि औचित्यसिद्धान्तप्रतिपादने ध्वनिकारादेव प्रेरणा गृहीता। अथ च तेन औचित्यविचा-रचर्चाग्रन्थे औचित्यसिद्धान्त: प्रतिपादित:।

रसौचित्यमेव उपलक्ष्य काव्येषु अलंकारराणां संनिवेशनं कत्र्तव्यम्। रसानामलं-कारर्यत्वाद् रसादितात्पर्येण विनियोजिता अलंकारा अलंकाररत्वं धरयन्ति।

यथा - रसभावादितात्पर्यमाश्रित्य विनियोजनम्।

अलंकृीतानां सर्वासामलंकाररत्वसाध्नम्।।

आनन्दवर्धनेन अलंकाराणाम् औचित्यपूर्णसन्निवेशमहत्त्वं ध्वन्यालोके स्पष्टरूपेण प्रतिपादितम्।

आनन्दवर्धनो अलंकाररै: सह गुणरीति-वृत्ति-संघटनाप्रबंधरसानां सन्नियोजने अपि औचित्यं विमृष्टवान्। गुणानां सम्बन्धे रसै: सह वर्तते। गुणा रसधर्मा एव। अतो वर्णानां शब्दानांच विनियोजनं तथा कत्र्तव्यं यथा प्रकृतगुणै: रसैश्च सह तेषां समन्नयो भवेत्। वृत्तिविषयेऽपि औचित्यस्य महत्त्वं तेन प्रतिपादितम्। यथा-

रसाद्यनुगुणत्वेन व्यवहारोऽर्थशब्दयो:।

औचित्यवान् यस्ता एता वृत्तयो द्विविध स्थिता:।।

अर्थात् रसाद्यनुकूलशब्दवर्णानामौचित्यव्यवहार एव द्विध वृत्तय:। अनौचित्येन नियोजिता एता वृत्तयो वा रीतयो वा रसभंगहेतवो भवन्ति। रीतीनां नियमनं रसवक्तृ-वाच्यविषयौचित्यने भवति। माधुर्यादीन् गुणानाश्रित्य तिष्ठन्ती त्रिविध संघटना रसानभि-व्यनक्ति। वक्तृवाच्यौचित्येन सा नियम्यते। यथा चोक्तम् आनन्दवर्धनेन- ‘गुणानाश्रित्य तिष्ठन्ती माधुर्यादीन् व्यनक्ति सा। रसांस्तन्नियमे हेतुरौचित्यं वक्तृवाच्ययो:।।

आन्दवर्धनेन प्रबन्धैचित्यस्यापि अनिवार्यत्वं निरूपितम्। प्रबंधकाव्ये कथाशरीरं द्विविधं भवति- वृत्तमुत्प्रेक्षितंच। सर्वत्रा एव औचित्यमनिवार्यम्। कथाशरीरं विभावभावा-नुभावस्थायिभावानाम् औचित्येन कविना रमणीयं कार्यम्। काव्ये रसध्वनि: महनीयतमो अत एव आनन्दवर्धनेन रसौचित्यं सविशेषं विवेचितम्। अलंकाररगुणरीतिसंघटनाप्रबन्ध-ानां सर्वेषां काव्याघ—ानां नियोजनं रसौचित्येन विधीयते। रसनिबंधनौचित्येनैव रचना शोभावहा भवति। रसानुकूलानां वाच्यवाचकानां विनियोजनमेव कवे: मुख्यं कर्म। यथा-

रसबंधोक्तमौचित्यं भाति सर्वत्रा संश्रिता।

रचना विषयापेक्षं तत्तु किन्चिद् विभेदवत्।।- ध0-3/9

वाच्यानां वाचकानां च यदौचित्येन बन्धनम्।

रसादिविषयेणैतन्मुख्यं कर्म महाकवे:। ध्व0-3/32

आनन्दवर्धनमते अनौचित्यादृते रसभंगस्य अन्यत् कारणं न विद्यते। अत: सर्वदा सर्वथा च कविभि: रसनिवेशने रस-योजने च औचित्यस्य निर्वाहो करणीय:, नो चेत् तत्रा रसप्रतीतौ रसास्वादने च विघ्न: सं जायते। यथा च -

अनौचित्यादृते नाऽन्यद् रसभंगस्य कारणम्।

प्रसिद्धौचित्यबंधस्तु रसस्योपनिषत्परा।।

ध्वन्यालोक: - 3.14 वृति

आनन्दवर्धनस्य अनन्तरम् अभिनवगुप्तेनापि काव्ये औचित्यस्य अनिवार्यत्वं समर्थितम्। रसध्वने: औचित्येन सह नित्यसम्बन्ध्:, औचित्यं च रसध्वनेर्जीवितमिति। इत्थमभिनवगुप्तस्य शिष्येण क्षेमेन्द्रेण आनन्दवर्धनाभिनवगुप्ताभ्यां निरूपतिम् औचित्यमेव काव्यजीवितं मत्वा औचित्यसिद्धान्तस्य प्रतिष्ठापना कृता।

4.6 वक्रोक्तिजीविते औचित्यतत्त्वम् -

अन्येऽपि आचार्या भाजे राज-कुन्तकध्नं जय-महिमभट्टप्रभतृयोऽपि काव्येषु औचित्यस्य अनिवार्यत्वं स्व-स्व ग्रन्थे प्रतिपादितवन्त:। एतेषु वक्रोक्तिजीवितकारस्य कुन्तकाचार्यस्य औचित्यनिरूपणं विशिष्टमस्ति। यथा-वक्रोक्तिजीवितग्रन्थे वक्रोक्ति: काव्यजीवितं प्रतिपादयन्नपि कुन्तकाचार्य: औचित्यस्य अनिवार्यतां प्रतिपादितवान्। काव्येषु गुणवर्गो द्विविध्: - औचित्यं सौभाग्यं च। कुन्तककृतम् औचित्यलक्षणं वर्तते -

आंजसेन स्वभावस्य महत्त्वं येन पोष्यते।

प्रकारेण तदौचित्यमुचिताख्यानजीवितम्।।

यत्रा वक्तु: प्रमातुर्वा वाच्यं शोभातिशायिना।

आच्छाद्यते स्वभावेन तदप्यौचित्यमुच्यते।।

वक्रोक्तिजीवितम्- 53,54

अर्थात् वस्तुस्वभावस्पष्टवर्णनं यथानुरूपकथनमेव औचित्यगुण:। अत्रा स्वभावमहत्त्वं पोष्यते। वक्तु: श्रोतु: वा अतिरमणीयस्वभावेन वाच्यवस्तुन: सर्वथा आच्छादनमपि औचित्यगुण:। विविधवक्रताभेदान् प्रतिपादयन् कुन्तक औचित्यमेव तदाधरत्वेन। अकल्पयत् वर्णविन्यासवक्रतायां वृत्यौचित्यं रीत्यौचित्यमलंकाररौचित्यं च तेन समर्थितम्।

यथा च- वृत्त्यौचित्यं मनोहारिरसानां परिपोषणम्। इति।

5.0 औचित्यस्य काव्यात्मत्वसमीक्षा:-

क्षेमेन्द्रो लोकमर्यादाम् अंगीकृत्य औचित्यं काव्यजीवितम् अकथयत्। लोकव्यवहारे यथा औचित्यस्य निर्वाह: परमावश्यक: तथैव काव्यव्यवहारे मर्यादापालनाय, सौन्दर्यसम्पादनाय च औचित्यस्य निर्वाहो अनिवार्य एव। काव्ये अलंकाररगुणरसरीतिवृत्त्यादितत्त्वानां नियोजनं नूनमेव औचित्यपूर्वकं भवेत्। तदा एव काव्ये काव्यत्वं जायते। अस्य औचित्यस्य अभावे सर्वे गुणा: निरर्थका: निष्पफलाश्च सं जायन्ते। आचार्यक्षेमेन्द्रस्य विचारोऽयं यत् औचित्यं सर्वस्मिन् लोके व्याप्तमस्ति, अनेन हेतुना औचित्यं काव्यस्य प्रत्यघं— व्याप्नोति। अत एवेदं काव्यजीवितमुच्चते। औचित्यस्याभावे काव्यमुपहासास्पदं भवति। रसानां विनिवेशनेऽपि औचित्यविधनमनिवार्यम्।

लोकव्यवहारे हि औचित्यपालनं कर्तव्यमेव। अन्यथा जनो निश्चयेनोपहासपात्रां भवति। तथैव काव्येऽप्यौचित्यस्याभावे काव्यमुपहासास्पदं विदधति। कामिनीवक्षसि स्थिता मौक्तकस्त्रक् सौन्दर्यं वर्धयति। परं सैव स्त्रक् पादयो: स्थितापे हासास्पदं जायते। तथैव काव्येऽलंकारा: सौन्दर्योत्कर्षकास्तदैव भवन्ति यदा ते समचित स्थानेषु विनियोज्यन्ते। विप्रलम्भशृंगारे यमकालंकारविनियोजनं निश्चयेन रसस्यापकर्षकरं भवति।

मनुष्येषु शौर्योदार्यकारुझयादयो गुणा: ध्रुवं गौरवमावहन्ति, परन्त्वौचित्यमर्यादायामवस्थिता एव। प्रणतशत्रुं प्रति शौर्यप्रदर्शनमाक्रमणकारिणं च प्रति कारुण्यप्रदर्शनं निश्चयेनाऽवगुणकोटिमध्रिोहति। तत्रा न भवति गुणत्वम्। एवमेव रौद्रदिषु कठोरसेषु माधुर्यगुणनिवेशो यथा दोषावहस्तथैव शृंगारादिषु कोमलरसेषु ओजोगुणनिवेशनं काव्यस्यापकर्षहेतुरेव। अत एव क्षेमेन्द्रेण प्रोक्तम् -

अलंकारेषु तदैवालंकारत्वं भवति यदा तेषां विन्यास: समुचित स्थानेषु विधीयते। एवं गुणेष्वपि तदैव गुणत्वं जायते, यदा ते औचित्ययुता वर्तन्ते।

रसानां विनिवेशनेऽप्यौचित्यविधन मनिवार्यम्। लोके मधुराम्ललवणकटुतिक्तकषाया रसा: भोजनपदार्थेषु पाचकेनौचित्येन नियोजिता यथा भोजनस्य रमणीयत्वं वर्धयन्ति, तथैव रसनियोजनमौचित्येन संविधीयमानं काव्यस्य रमणीयतामाह्लादकतां वा पुष्णाति। शृघ्गारस: सर्वेषां रसानामधिपति:, परमसमयेऽस्य विनियोगो विरसतामेवाऽऽवहति। यथा वेणसंहारनाटके दुर्योधनस्य भानुमतीं प्रति प्रणयप्रसघ्ग। महाभारतीये युद्धे दुर्योधनप्रक्षीयेष्वनेकमहावीरेषु हतेषु सत्सु दुर्योधनस्य भानुमतीं प्रति प्रेमप्रदर्शनं ध्रुवमनुचितं शृंगारसस्याऽपकर्षकरं वर्तते।

कस्यचिद्ररसस्य पौन: पुन्येनाऽभिव्यक्तिरपि विरसत्वहेतुर्भवति। कुमारसम्भ-

वमहाकाव्ये कामदेवभार्याया: शोकस्य करूणरसस्थायिभावस्य पानै: पुन्येनोद्दीपनं रसदोषत्वमुपैतीति समीक्षका: स्वीकुर्वन्ति।

उपभुक्तरसस्य पौन:पुन्येनपरिपोषोऽप्यानन्दवर्धनेन रसदोषोऽभिहित:। औचित्यं रसस्य परमं रहस्यमनौचित्यं च रसभंगहेतुरित्यानन्दवर्धनस्य विमर्श:। यथा -

अनौचित्यादृते नाऽन्यद् रसभंगस्य कारणम्।

औत्यिौपनिबद्धस्तु रसस्योपनिषत्परा।।

अयमेव हेतुर्यत् क्षेमेन्द्रोऽपि रससिद्धकाव्ये यद्यौचित्यमेव तस्याऽऽत्मानं जीवितं वा प्रतिपादितवान् तदत्रा को दोष: किमनौचित्यं वा सम्भावनीयम्।

एवं कावयात्मरूपमौचित्यसंविधनं क्षेमेन्द्रेण स्वीकृतम्। परन्त्वनेन तस्य का-व्यात्मभावो न सिध्यति। गुणात्वड्.कारादीनामौचित्यस्येयमेव स्थिति:। गुणलंकारदीनां विनियोजनं नौचित्याय परमौचित्यमेतेषासुत्कर्षसिद्धये साध्नत्वेनाऽवतिष्ठते। एवं काव्येष्वौचित्यं साधनत्वेन तिष्ठति, न तु साध्यत्वेन। अत: काव्ये रसध्वनिगुणलघ्का-रादीनामपेक्षात औचित्यस्याऽऽत्मतत्त्वप्रतिपादनं न समुचितम्।

औचित्यं रससिद्धकाव्यस्य जीवितं प्रतिपादयन् क्षेमेन्द्र प्रोवाच-उचितरूपेण धतुवादरससिद्धमौषधं यथा वपुषि जीवनं स्थिरयति, तथैव शृंगारादिरससिद्धकाव्यस्य जीवितमौचित्यं स्थिरीकरणसाधनं तत्त्वं वर्तते। काव्यस्य जीवनं रसादिध्वनिवर्तते, परमौचित्यं तस्य स्थिरीकरणसाधनं विद्यते।

उपर्युक्तविवेचनेन सिद्धमिदं यत काव्ये औचित्यस्य महत्त्वमनिवार्य वर्तते, परं तस्य काव्यात्मरूपेण स्थिति: न स्वीकरणीया। अनिवार्यरूपेण स्थितमप्यौचित्यं न काव्यस्य आत्मा। तद्विना काव्ये काव्यत्वं न वर्तते इति नैव लक्ष्यते। अत: समीक्षणीयं यत् औचित्यं काव्योत्कर्षसाधनं वर्तते साध्यं वा। साध्यरूपेण यदि स्थिति: औचित्यस्य भवेत् तदैव तस्य आत्मत्वं सम्भवेत्, परन्तु तन्न साध्यम्। तत्तु साध्यस्स रसस्य आत्मतत्त्वस्योत्कर्षहेतु: साध्नमेव। कविना काव्यरचना काव्यरसानन्दानुभतू यै क्रियते न तु औचित्यप्रतिपादनाय। परं क्षेमेन्द्रस्य दृष्टि: काव्यस्य बाह्यक्षेत्रापर्यन्तमेव परिमिता बभूव। काव्यस्यान्तरंगत्वड्.गतेन रसध्वनिना परिचितोऽप्यसौ तस्य महिमानं व्याख्यातु न समर्थो बभूव। वस्तुतो रसध्वनिरेव काव्यस्याऽऽत्मा। स एव साध्य:। औचित्यं तत्त्वं साध्यस्य रसस्य साधनत्वात् तस्य अंगत्वमेव स्वीक्रियते।

6.0 विषयसंग्रह:-

साहित्यशास्त्रे ये षट्सिद्धांता: सन्ति तेषु आचार्यक्षेमेन्द्रप्रतिपादितस्य औचित्य- ि-सद्धान्तस्य संक्षिप्तरूपेण अत्रा निरूपणं कृतम्। तदनन्तरं औचित्यस्य किं स्वरूपं, कथम्

औचित्यं काव्यजीवितं प्राणभूतं वा इत्यपि मया प्रतिपादितम्। तेन सह क्षेमेन्द्रात् पूर्ववर्तिनाम् आचार्याणां औचित्यतत्त्वसन्दर्भे यदभिमतं वर्तते तदपि अत्रा संक्षेपेण निरूपितम्।

❖❖❖